प्रभावते हरि मनुष्यको विद्यावान् तथा यशस्वी करि देते हैं ॥५॥ हे राजन् ! पापकी हरनवारी जो याकी कथा है ताहि म कहौं हौं तुम सुनो भद्रावती नाम एक पुरी है तामें सुकेतुमान् नाम एक राजा होत भयो ॥६॥ वा राजाकी शैब्या नाम रानी होत भई पुत्रनकरि हीन वा राजाने मनोरथन करिके समय व्यतीत कियो॥७॥और वह राजा वंशके चलावनहारे पुत्रको न प्राप्त होत भयो तब वाहि राजाने बहुत काललों धर्मते

शृणु राजन् प्रवक्ष्यामि कथां पापहरां पराम् ॥ पुरी भद्रावती नाम्नी राजा तत्र सुकेतुमान् ॥ ६ ॥ तस्य राज्ञोऽथ राज्ञी च शैब्या नाम्नीति विश्रुता ॥ पुत्रहीनेन राज्ञा च कालो नीतो मनोरथैः ॥ ७ ॥ नैवात्मजं नृपो लेभे वंशकर्त्तारमेव च ॥ तेनैव राज्ञा धर्मेण चिंतितं बहुकालतः ॥ ८ ॥ किं करोमि क्व गच्छामि सुतप्राप्तिः कथं भवेत् ॥ न राष्ट्रे न पुरे सौख्य लेभे राजा सुकेतुमान् ॥ शैब्यया कांतया सार्द्धं प्रत्यहं दुःखितोऽभवत् ॥ ९ ॥ तावुभौ दंपती नित्यं चिंताशोकपरायणौ ॥ पितरस्तु जलं दत्त कवोष्णमुपभुञ्जते ॥१०॥ राज्ञः पश्चान्न पश्यामो योऽस्मान्सन्तर्पयिष्यति ॥ इत्येवं संस्मरंतोऽस्य पितरो दुःखिनोऽभवन् ॥ तेषां तद्दुःखमूलं च ज्ञात्वा राजाप्यतप्यत ॥ ११ ॥

चिंतवन कीन्हों॥८॥कहा करौं कहां जाऊं पुत्र कसे प्राप्त होय ऐसे कहतो भयो वह राजा सुकेतुमान् देशमें और नगरमें कहूं सुखको न प्राप्त होत भयो और शैब्या नाम रानीसमेत प्रतिदिन दुःखित होत भयो ॥९ ॥ वे दोनों स्त्रीपुरुष या चिंता और शोकमें नित्यही परायण रहते कि, पितर हमारे दिये भये जलको कुछ उष्ण पान करे हैं॥१०॥कि राजाके पीछे हम काहू नहीं देखे हैं जो हमारो तर्पण करै या प्रकार स्मरण

करिके याके पितर दुःखी होत भये उनको यह दुःखको मूल जानि राजाहूं संतापको प्राप्त होत भयो॥ ११॥बाको न भाई न मित्र न मंत्री न सुहृद् रुचते और न हाथी घोडे प्यादे रुचते॥ १२॥या प्रकार वा राजाको मन निराश होगयो कि, पुत्ररहित मनुष्यनको जन्म निष्फलहै॥ १३॥ पुत्रहीन मनुष्यको घर सूनो रहै है और वाको हृदय सदा दुःखी रहै है और पुत्रके बिना पितृ देवता और मनुष्यको ऋण नहीं दूर होय है

न बांधवा न मित्राणि नामात्याः सुहृदस्तथा ॥ रोचंते तस्य भूपस्य न गजाश्वपदातयः ॥ १२ ॥ नैराश्यं भूपतेस्तस्य मनस्यैवमजायत ॥ नरस्य पुत्रहीनस्य नास्ति वै जन्मनः फलम् ॥ १३ ॥ अपुत्रस्य गृहं शून्यं हृदयं दुःखितं सदा ॥ पितृदेवमनुष्याणां नानृणत्वं सुतं विना ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन सुतमुत्पादयेन्नरः ॥ इह लोके यशस्तेषां परलोके शुभा गतिः ॥ १५ ॥ येषां तु कर्मकर्तॄणां पुण्यं जन्मशतोद्भवम् ॥ आयुरारोग्यसंपच्च तेषां गेहे प्रवर्तते ॥ १६ ॥ पुत्रपौत्राश्च लोकाश्च भवेयुः पुण्यकर्मणाम् ॥ पुण्यं विना च न प्राप्तिर्विष्णुभक्तिं विना तथा ॥ १७ ॥ पुत्राणां संपदो वापि विद्यायाश्चेति मे मतिः ॥ एवं विचिंत्यमानोऽसौ राजा शर्म न लब्धवान् ॥ १८ ॥

॥ १४॥ताते मनुष्य सब प्रकारके यत्ननसे पुत्रको उत्पन्न करै जिनके पुत्रहै उन मनुष्यनको यालोकमें सुख और परलोकमें शुभगति प्राप्त होयहै॥ १५ जिस शुभ कर्म करनेवाले मनुष्यनके सैकरन जन्मनके पुण्य होय हैं उनके घरमें आयु आरोग्य और संपत्ति सदा रहैहै॥ १६॥ पुण्य कर्म करनेवाले पुरुषनके पुत्र पौत्र और लोक ये सब होय हैं पुण्य विना और विष्णुभक्ति बिना इनकी प्राप्ति नहीं होयहै॥ १७॥पुत्रनकी संपत्ति और विद्याकी

संपत्ति पूर्वजन्मके पुण्य विना नहीं मिलती है या प्रकार चिंतवन करतो भयो वह राजा सुखको न प्राप्त होतो भयो ॥ १८ ॥ प्रातःकाल तथा अर्द्धरात्रिके समय वह राजा चिंता करत भयो ता पीछे वह सुकेतुमान् अपनो विनाश विचारत भयो॥१९॥फिर वा समयमें राजा आत्मघातमें दुर्गतिको विचारिके पुत्ररहित अपनी देहको क्षीण देखत भयो॥२०॥फिरि अपनी बुद्धिसों निज हितको कारण विचार घोडेपर चढि बडे वनें

प्रत्यूषेऽचिन्तयद्राजा निशीथेऽचिन्तयत्तथा ॥ ° ततश्चात्मविनाशं वै विचार्याथ सुकेतुमान् ॥ १९ ॥ आत्मघाते दुर्गतिं च चिन्तयित्वा तदा नृपः ॥ दृष्ट्वाऽऽत्मदेहं प्रक्षीणमपुत्रत्वं तथैव च ॥ २० ॥ पुनर्विचार्यात्मबुद्ध्या ह्यात्मनो हितकारणम् ॥ अश्वारूढस्ततो राजा जगाम गहनं वनम् ॥ २१ ॥ पुरोहितादयः सर्वे न जानंति गतं नृपम् ॥ गंभीरे विपिने राजा मृगपक्षिनिषेविते ॥ २२ ॥ विचचार तदा तस्मिन्वने वृक्षान्विलोकयन् ॥ वटानश्वत्थबिल्वांश्च खर्जूरान् पनसांस्तथा ॥ २३ ॥ बकुलान् सप्तपर्णांश्च तिंदुकांस्तिलकानपि ॥ शालांस्तालांस्तमालांश्च ददर्श सरलान्नृपः ॥ २४ ॥ इंगुदीककुभांश्चैव श्लेष्मातकविभीतकान् ॥ शल्लकीकरमर्दांश्च पाटलान् खदिरानपि ॥ २५ ॥

वनको जात भयो॥२१॥पुरोहित आदि सब गये भये राजाको नहीं जानत भयेहैं राजा मृग और पक्षिन करके सेवन करे गये गहन वनमें गयो ॥२२॥और वा समय वा वनमें वट,पीपर, बेल, खजूर, और कटहरके वृक्षनको देखतो भयो विचारन लगो ॥ २३ ॥ और मौलसरी, सप्तपर्ण, तेंदू, तिलक, शाल, तमाल और सरल इन वृक्षनको देखत भयो ॥ २४ ॥ और हिंगोट, अर्जुन, बभेरा, शल्लकी, करोंदा, पाढल, खैर,

और वैरी इन सब वृक्षनको देखत भयो ॥२५॥ शाखा और ढाक इन सबनको राजा शोभायमान देखत भयो और मृग बाघ और सुअर सिंह तथा वानरनको देखत भयो ॥२६॥ और बाँबीसे निकरे भये सापनको देखत भयो तैसेही अपने बच्चनके साथ मिले भये मत्त जंगली हाथिनको देखत भयो ॥ २७ ॥ नील गवय, काले मृग, गौ, स्यार, शशवन, बिलाव, शल्लक, सुरागौ इन सबनको देखत भयो ॥२८॥ चारि दांतनके यूथप

शाखांश्चैव पलाशांश्च शोभितान्ददृशे नृपः ॥ मृगव्याघ्रवराहांश्च सिंहाञ्छाखानृगानपि ॥ २६ ॥ ददर्श भुजगान् राजा वल्मीकादभिनिस्सृतान् ॥ तथा वनगजान्मत्तान्कलभैः सह संगतान् ॥ २७ ॥ गवयान्कृष्णसारान् गाः सृगालाञ्छशकानपि॥ वनमार्जारकान् क्रूराञ्झल्लकांश्चमरानपि ॥२८॥ यूथपांश्च चतुर्दन्तान्करिणीगणमध्यगान् ॥ तान्दृष्ट्वा चिन्तयामास ह्यात्मनस्स गजान्नृपः ॥२९॥ तेषां स विचरन्मध्ये राजा शोकमवाप ह ॥ महदाश्चर्यसंयुक्तं ददर्श विपिनं नृपः ॥ ३० ॥ क्वचिच्छिवारुतं शृण्वन्नुलूकविरुतं तथा ॥ तांस्तान्पक्षिगणान्पश्यन्बभ्राम वनमध्यगः ॥३१॥ एवं ददर्श गहनं नृपो मध्यंगते रवौ ॥ क्षुत्तृड्भ्यां पीडितो राजा इतश्चेतश्च धावति ॥ ३२ ॥

हाथिनको हाथिनियोंके समूहमें स्थित देखत भयो उनको देखके वह राजा अपने हाथिको स्मरण करत भयो॥२९॥उनके मध्यमें विचरतो भयो वह राजा शोकको प्राप्त होत भयो और राजा बड़े आश्चर्य करके युक्त वनको देखत भयो ॥ ३० ॥ कहूं स्यारनको शब्द और उलूकनको शब्द सुनत भयो और नाना प्रकारके पक्षिनके समूहको देखतो भयो वह राजा उनके मध्यमें जायके विचरत भयो॥३१॥ऐसे राजाको वनमें फिरते२

दो पहर होगये तब भूख प्याससे व्याकुल राजा इधर उधर भ्रमण करत भयो ॥३२॥ सूखिगयो है गरो जाको ऐसे राजा अपने मनमें चिन्ता करत भयो कि, मैंने कहा कर्म कियो है जाते मोको ऐसे दुःख प्राप्त भयो॥३३॥मैं यज्ञनसों और पूजासू देवतानकूं संतुष्ट कियो है तैसेही दक्षिणानसों और मीठे भोजननसों ब्राह्मणनको संतुष्ट कीनो है॥३४॥और मैंने यथाकाल पुत्रके समान प्रजानको पालन कीनो है नहीं जानो हौं कि

चिंतयामास नृपतिः संशुष्कगलकन्धरः ॥ मया तु किं कृतं कर्म प्राप्तं दुःखं यदीदृशम् ॥ ३३ ॥ मया च तोषिता देवा यज्ञैः पूजाभिरेव च ॥ तथैव ब्राह्मणा दानैस्तोषिता मिष्टभोजनैः ॥ ३४ ॥ प्रजाश्चैव यथाकालं पुत्रवत्परिपालिताः ॥ कस्माद्दुःखं मया प्राप्तमीदृशं दारुणं महत् ॥ ३५ ॥ इति चिंतापरो राजा जगामाथाग्रतो वनम् ॥ सुकृतस्य प्रभावेण सरो दृष्टं मनोरमम् ॥ ३६ ॥ मानसं स्पर्धमानं च पद्मिनीपरिशोभितम् ॥ कारंडवैश्चक्रवाकै राजहंसैश्च नादितम् ॥ ३७ ॥ मकरैर्बहुभिर्युक्तं मत्स्यैर्जलचरैर्युतम् ॥ समीपे सरसस्तत्र मुनीनामाश्रमान्बहून् ॥ ३८ ॥

ऐसो बडो दारुण दुःख काहेत प्राप्त भयो ॥ ३५ ॥ ऐसे चिन्ता करतो भयो वह राजा आगेकू वनमें जात भयो और वाने सुकृतके प्रभावते एक मनोहर सर देख्यो ॥३६॥ वह सर कैसो है कि, मानसरोवर की बराबरी कर रह्यो है और कमलनके फूलनसू शोभित हो रह्यो है और जलकुक्कुट चक्रवाक तथा राजहंसन करके शब्दायमान रह्यो है ॥ ३७ ॥ और बहुतसे मगर मच्छी तथा और जलके जीवनकरिके युक्त है और

वा सरके समीप बहुतसे मुनीश्वरनके आश्रमनको देखत भयो ॥३८॥ शुभके कहनवारे निमित्तते करके राजाने वे मुनिनके आश्रम देखे और राजाको दाहिनो नेत्र तथा भुजा फरकन लगी ॥ ३९ ॥ उनके फरकनेके कारण राजाको शुभको लक्षण सूचित होत भयो और वा तलावके किनारे वैदिकमन्त्रनको जपत भये मुनि देखे ॥ ४० ॥ तब वो घोडेते उतरिके राजा मुनीश्वरके आगे स्थित होत भयो और उन व्रत करनहारे

ददर्श राजा लक्ष्मीवान्निमित्तैः शुभशंसिभिः ॥ सव्यात्परतरं चक्षुः प्रास्फुरच्च तथा करः ॥ ३९ ॥ स्फुरितस्तस्य राज्ञश्च शंसित शुभलक्षणम् ॥ तस्य तीरे मुनीन् दृष्ट्वा कुर्वाणान्नैगम जपम् ॥ ४० ॥ अवतीर्य हतातस्मान्मुनीनामग्रतः स्थितः॥पृथक् पृथक् ववंदे स मुनींस्ताञ्शंसितव्रतान् ॥४१॥ कृतांजलिपुटो भूत्वा दण्डवच्च प्रणम्य सः ॥ हर्षेण महताविष्टो वभूव नृपसत्तमः॥४२॥ तमूचुस्तेऽपि मुनयः प्रसन्नाः स्मो वयं तव ॥ कथयस्वाद्य वै राजन् यत्ते मनसि वर्तते ॥ ४३ ॥ राजोवाच ॥ के यूयमग्रतपसः किमाख्या भवतामपि ॥ किमर्थमागता यूयं वदंतु मम तत्त्वतः ॥ ४४ ॥

मुनीश्वरनको पृथक् २ नमस्कार करत भयो ॥४१॥ वह श्रेष्ठ राजा मुनीश्वरनको हाथ जोरिके दण्डवत् प्रणाम करि अत्यन्त हर्षयुक्त होत भयो ॥४२॥ वे मुनीश्वर वा राजासे बोले–कि, हम तुम्हारे ऊपर प्रसन्न हैं हे राजन्! जो तुम्हारे मनमें वर्त्तमान है सो हमसे कहो ॥ ४३ ॥ राजा बोलो–कि, तपस्विनमें मुख्य आप कौन हैं आपलोगनके नाम कहा हैं और यहां काहेके लिये आये हैं ? यह मोसे ठीक ठीक कहो ॥ ४४ ॥

मुनीश्वर बोले–कि, हे राजन् ! हम विश्वेदेवा हैं यहां स्नान करनेको आये हैं आजके दिनते पांचवें दिन माघको महीना निकट आय गयो है ॥ ४५ ॥ हे राजन् ! आज पुत्रदा नाम एकादशी है यह शुक्लपक्षकी पुत्रदा एकादशी पुत्रकी इच्छावाले मनुष्यको पुत्र देय है ॥ ४६ ॥ राजा बोलो–कि, पुत्रके उत्पन्न करनेमें यह मोको बडो संदेह है जो आपलोग मोपै प्रसन्न होयं तो मोको पुत्र दीजिये ॥ ४७ ॥

मुनय ऊचु ॥ विश्वेदेवा वयं राजन्स्नानार्थमिह चागताः ॥ माघो निकटमायात एतस्मात्पंचमेऽहनि ॥ ४५ ॥ अद्य ह्येकादशी राजन्पुत्रदा नाम नामतः ॥ पुत्रं ददात्यसौ शुक्ला पुत्रदा पुत्रमिच्छताम् ॥४६॥ राजोवाच ॥ एष मे संशयो मह्यं सुतस्योत्पादने महान् ॥ यदि तुष्टा भवन्तो मे पुत्रो वै दीयतां तदा ॥ ४७ ॥ मुनय ऊचुः ॥ अस्मिन्नेव दिने राजन्पुत्रदा नाम वर्त्तते ॥ एकादशीति विख्याता क्रियतां व्रतमुत्तमम् ॥ ४८ ॥ आशीर्वादेन चास्माकं केशवस्य प्रसादतः ॥ अवश्यं तव राजेन्द्र पुत्रप्राप्तिर्भविष्यति ॥ ४९ ॥ इत्येवं वचनात्तेषां कृतं राज्ञा व्रतं शुभम् ॥ द्वादश्यां पारणं कृत्वा मुनीन्नत्वापुनः पुनः ॥ ५० ॥ आजगाम गृहं राजा राज्ञी गर्भं समादधौ ॥ मुनीनांवचनेनैव पुत्रदायाः प्रभावतः ॥ ५१ ॥

मुनि बोले–कि, हे राजन् ! आजहीके दिन पुत्रदा नामसों विख्यात एकादशी है ताते याको उत्तम व्रत करिये॥४८॥हमारे आशीर्वादसे और केशव भगवान्के प्रसादते हे राजन् ! तुमको अवश्य पुत्रकी प्राप्ति होगी ॥ ४९ ॥ या प्रकार उन मुनीश्वरनके वचनते राजाने उत्तम व्रत कीन्हो और द्वादशीके दिन राजा पारण करिके वारंवार मुनीश्वरोंको नमस्कार करत भयो॥५०॥और राजा घरको आवत भयो तब रानी मुनीश्वरनके

वचनते और पुत्रदाके प्रभावसे गर्भको धारण करती भई॥५१॥और समयमें तेजस्वी तथा पुण्य कर्म करनहारो पुत्र उत्पन्न होत भयो वह पिताको संतुष्ट करत भयो और वह प्रजाके पालनमें तत्पर होत भयो॥५२॥हे राजन्! या कारणते पुत्रदाको व्रत करनो चाहिये लोकनके हितके लिये मैंने तुम्हारे आगे कह्यो ॥५३॥ जे मनुष्य पुत्रदा नाम यह व्रत करै हैं उन मोक्षभागी मनुष्यनके अवश्य पुत्र होय हैं ॥ ५४ ॥ हे राजन् ! याके

पुत्रो जातस्तथा काले तेजस्वी पुण्यकर्मकृत् ॥ पितरं तोषयामास प्रजापालो बभूव सः ॥ ५२ ॥ एतस्मात्कारणाद्राजन्कर्तव्यं पुत्रदाव्रतम् ॥ लोकानां च हितार्थाय तवाग्रे कथितं मया ॥ ५३ ॥ एतद्व्रतं तु येमर्त्याः कुर्वंति पुत्रदाभिधम् ॥ तेषां चैव भवेत्पुत्रो ह्यवश्यं मोक्षभागिनाम् ॥ ५४ ॥ पठनाच्छ्रवणाद्राजन्नश्वमेधफलं लभेत् ॥ ५५ ॥ इति श्रीभविष्योत्तरपुराणे पौषशुक्लैकादश्याः पुत्रदानाम्न्या माहात्म्यं सम्पूर्णम् ॥ ४ ॥

पढने और श्रवण करनेसों अश्वमेध यज्ञको फल प्राप्त होय हैं॥५५॥इति श्रीमत्पण्डितपरमसुखतनयपण्डितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायां पौषशुक्लैकादशीव्याख्या समाप्ता ॥ ४ ॥

अथ माघकृष्णैकादशीकथा ॥ अथ माघस्य कृष्णे या षट्तिलकादशी स्मृता ॥ तन्माहात्म्यस्य भाषायां विवृतिं संतनोम्यहम् ॥१॥ दाल्भ्य ऋषि बोले कि, मर्त्यलोकमें प्राप्त जीव पापको करै हैं ब्रह्महत्या आदि तथा नाना प्रकारके अन्य पापन करिके युक्त होव हैं ॥१॥ पराये धनके हरण करनहारे और पराये दुःखसों मोहित पुरुष कैसे नरकको नहीं जाय हैं हे ब्रह्मन् ! मोसों तत्त्वसे कहो ॥२॥ हे भगवन् ! अनायास करिके काहू

अथ माघकृष्णैकादशीकथा ॥ दाल्भ्य उवाच ॥ मर्त्यलोके तु संप्राप्ताः पापं कुर्वंति जन्तवः ॥ ब्रह्महत्यादिपापैश्च ह्यन्यैश्च विविधैर्युताः ॥ १ ॥ परद्रव्यापहाराश्च परव्यसनमोहिताः ॥ कथं न यांति नरकान् ब्रह्मंस्तद ब्रूहि तत्त्वतः॥ २ ॥ अनायासेन भगवन्दानेनाल्पेन केनचित् ॥ पापं प्रशममायाति येन तद्वक्तुमर्हसि ॥ ३ ॥ पुलस्त्य उवाच ॥ साधु साधु महाभाग गुह्य मेतदुदाहृतम् ॥ यन्न कस्य चिदाख्यातं ब्रह्मविष्णिवन्द्रदेवतैः ॥ ४ ॥ तदहं कथयिष्यामि त्वया पृष्टो द्विजोत्तम ॥ ततो माघे तु संप्राप्ते शुचिः स्नातो जितेन्द्रियः॥५॥ कामक्रोधाभिमानेर्ष्यालोभपैशुन्यवर्जितः ॥ देवदेवं च संस्मृत्य पादौ प्रक्षाल्य वारिणा ॥६॥

छोटेसे दानसों जासो पाप शांत होय सो कहनेको योग्य हो ॥ ३ ॥ पुलस्त्य बोले कि, हे महाभाग ! साधु साधु अर्थात् बहुत अच्छी २ तुमने गुह्य बात कही जाको कभी ब्रह्मा विष्णु इन्द्र और देवतानन काहूसों नहीं कह्यो है ॥ ४ ॥ हे द्विजोत्तम ! तुम्हारे पूछनेसों वह गुप्त वस्तु मैं तुमसों कहागो तो पीछे माघ महीनाके आवनेपै शुद्ध हो स्नान करिके जितेंद्रिय रहै ॥५॥ काम, क्रोध, अभिमान, ईर्षा, लोभ और चुगलीते बचो रहै और निज पांयनको धोयके देवदेव जे विष्णु भगवान् हैं तिनको स्मरण करै ॥ ६ ॥

भूमिमें न गिरो होय एसो गोबर ले वामें तिल और कपास मिलाके पिंड बनावै॥७॥एक सौ आठ१०८पिंड बनावे यामें कुछ विचार न करै तो पीछे माघ मासके आनेपै आदिहीसों नियम करै ॥८॥ अथवा कृष्णपक्षके मूलमें तो पीछे पुत्रफलकी देनहारी एकादशीके नियमको ग्रहण करै ताको विधान मोते सुनो॥९॥स्नान करि शुद्ध होके सावधान मनसों देवनके देव जे भगवान्हैं तिनको पूजन करै और छींक तथा जँभाई आवें तो

भूमावपतितं ग्राह्यं गोमयं तत्र मानवः ॥ तिलान् प्रक्षिप्य कार्पासं पिण्डकांश्चैव कारयेत ॥ ७ ॥ अष्टोत्तरशतं चैव नात्र कार्या विचारणा ॥ ततो माघे च संप्राप्ते ह्यादौ चैव भवेद्यदि ॥ ८ ॥ मूले वा कृष्णपक्षस्यैकादश्यां नियमं ततः ॥ गृह्णीयात्पुत्रफलदं विधानं तत्र मे शृणु ॥ ९ ॥ देवदेवं समभ्यर्च्य सुस्नातः प्रयतः शुचिः ॥ कृष्णनामानि संकीर्त्य क्षुज्जृंभासु च सर्वदा ॥ १० ॥ रात्रौ जागरणं कुर्याद्रात्रौ होमं च कारयेत् ॥ अर्चयेद्देवदेवेशं शंखचक्रगदाधरम् ॥ ११ ॥ चन्दनागरुकर्पूरैर्नैवेद्यैः शर्करादिभिः ॥ संस्मृत्य नाम्ना च ततः कृष्णाख्येन पुनः पुनः ॥ १२ ॥ कूष्माण्डैर्नारिकेलैश्च ह्यथवा बीजपूरकैः ॥ सर्वाभावेऽपि विप्रेन्द्र शस्तं पूगीफलं तदा ॥ १३ ॥

सदा कृष्णके नामनको कीर्तनको करै॥१०॥और रात्रिमें जागरण करै और रात्रिहीमें उन एकसौ आठ पिंडनसों होम करै और शंख,चक्र,गदा धारण करे भये जो देवदेवेश भगवान्हैं तिनको ध्यान करै॥११॥चंदन अगर कपूर तथा शर्करा आदि नैवेद्यन करिके वारंवार कृष्णनामको उच्चारण करि भगवान्को पूजन करै ॥१२॥ कुह्मडों करिके अथवा नारियलों करिके वा बिजौरों करिके पूजन करै जो ये सब वस्तु न हों तो सुपारी सबते उत्तम

है ॥१३॥ विधिसों अर्घ्य द जनार्दनको पूजन करि ऐसे कहे कि, हे कृष्ण ! हे कृष्ण ! हे कृपालो ! हे गतिरहितनको गति देनेहारे ! ॥ १४ ॥ संसाररूपी समुद्रमें डूबे मनुष्यके ऊपर प्रसन्न होउ हे पुण्डरीकाक्ष ! हे विश्वभावन ! तुमको नमस्कार है ॥ १५ ॥ हेसुब्रह्मण्य ! हे महापुरुष ! हे पूर्वज ! हे जगत्पते ! मेरो दियो भयो अर्घ्य लक्ष्मी करिके सहित ग्रहण करो ॥ १६ ॥ ता पीछे छत्र उपानह तथा वस्त्रनकरि ब्राह्मणका

अर्घ्यं दत्त्वा विधानेन पूजयित्वा जनार्दनम् ॥ कृष्ण कृष्ण कृपालो त्वमगतीनांगतिप्रद ॥ १४ ॥ संसारार्णवमग्नानां प्रसीद परमेश्वर ॥ नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ १५ ॥ सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वज ॥ गृहाणार्घ्यं मया दत्तं लक्ष्म्या सह जगत्पते ॥ १६ ॥ ततस्तु पूजयेद्विप्रमुदकुंभं प्रदापयेत् ॥ छत्रोपानहवस्त्रैश्च कृष्णो मे प्रीयतामिति ॥ १७ ॥ कृष्णा धेनुः प्रदातव्या यथाशक्त्या द्विजोत्तम ॥ तिलपात्रं द्विजश्रेष्ठ दद्यात्तत्र विचक्षणः ॥ १८ ॥ स्नानप्राशनयोः शस्ताः श्वेताः कृष्णास्तिला मुने ॥ तान् प्रदद्यात्प्रयत्नेन यथाशक्त्या द्विजोत्तम ॥ १९ ॥

पूजन करै और मेरे ऊपर प्रसन्न होयँ ऐसे कहिके जलसों भरे भये घटको दान करैं ॥ १७ ॥ और हे ब्राह्मण ! यथाशक्ति कृष्णगौको दान करनो चाहिये हे द्विजश्रेष्ठ ! वा दिन चतुर मनुष्य तिल भरके पात्रको दान करै ॥१८॥ हे मुनि ! नहानेमें तथा खानेमें सफेद और काले दोनों प्रकारके तिल श्रेष्ठहैं अथवा स्नानमें श्वेत और भोजनमें काले तिल उत्तम कहेहैं । हे द्विजोत्तम! उन तिलनका दान यथाशक्ति यत्नसों करै ॥१९॥

जितने तिलनको दान करै उतने हजार वर्षलों स्वर्गलोकमें आनन्द करै तिल जलमें मिलाके स्नान करै १ तिलनको पीसिके उबटना लगावै २ तिलनको होम करै ३ और तिल मिलाके जल पीवै ४ तिलनको भोजन करै ५ तथा तिलनको दान करै ६ यह छः प्रकारके तिल पापनके नाश करनेहारे हैं॥ नारद मुनि बोले—कि हे कृष्ण ! हे कृष्ण ! हे महाबाहो ! हे भक्तभावन ! आपके अर्थ नमस्कार है ॥२०॥२१॥ षट्तिला एकादशीते

तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ॥ २० ॥ तिलभुक् तिलदाता च षट्तिलाः पापनाशकाः ॥ नारद उवाच ॥ कृष्ण कृष्ण महाबाहो नमस्ते भक्तभावन ॥ २१ ॥ षट्तिलैकादशीभूतं कीदृशं फलमश्नुते ॥ सोपाख्यानं मम ब्रूहि यदि तुष्टोऽसि यादव ॥ २२ ॥ श्रीकृष्ण उवाच ॥ शृणु ब्रह्मन्यथावृत्तं दृष्टं तत्कथयामि ते ॥ मृत्युलोके पुरा ह्यासीद्ब्राह्मणी तत्र नारद ॥ २३ ॥ व्रतचर्यरता नित्यं देवपूजारता तदा ॥ मासोपवासनिरता मम भक्ता च सर्वदा ॥२४॥ कृष्णोपवाससंयुक्ता मम पूजापरायणा ॥ शरीरं क्लेशितं नित्यमुपवासैर्द्विजोत्तम ॥ २५ ॥

उत्पन्न फल कसो मिलै है हे यादव ! जो आप प्रसन्न हो तो याको उपाख्यान सहित मोसों कहो॥२२॥ श्रीकृष्ण बोले—कि, हे ब्रह्मन् ! जैसे वृत्तांत मैंने देख्यो है सो मैं तुमसे कहौं हे नारद ! पहले समय मृत्युलोकमें एक ब्राह्मणी होती भई ॥ २३ ॥ वह सदा व्रतनके रहनेमें और देवपूजामें लगी रहती सदा मेरी भक्त वह स्त्री महीने भरके व्रत करनेमें तत्पर होत भई ॥२४॥ कृष्णके व्रत करिके युक्त वह मेरी पूजामें परायण होत भई

हे द्विजोत्तम ! सदा व्रत करनेसों वाको शरीर क्लेशित हो जात भयो ॥२५॥ वह अति बुद्धिमती स्त्री दीन ब्राह्मणनको और कुमारिनको भक्ति पूर्वक वर आदिकनको दान सदा देती ॥२६॥ हे द्विज ! वह अति कठिन व्रतनमें तत्पर होत भई व्रतन करिके और कृच्छ्रन करिके वाको शरीर शुद्ध होगयो यामें संदेह नहींहै॥२७॥और वाने कायाके क्लेशसों काहू मँगता ब्राह्मणको अन्नदान नही कीन्हों जासो मेरी परम तृप्ति होती॥२८॥

दीनानां ब्राह्मणानां च कुमारीणां च भक्तितः ॥ गृहादिकं प्रयच्छन्ती सर्वकालं महामतिः ॥ २६ ॥ अतिकृच्छ्ररता सा तु सर्व कालेषु वै द्विज ॥ शुद्धमस्याः शरीरं हि व्रतैः कृच्छ्रैर्न संशयः॥ २७ ॥अर्थिनं वैष्णवं लोकं कायक्लेशेन वै तया॥ न दत्तमन्नदानं हि येन तृप्तिः परा भवेत् ॥ २८ ॥ एतज्जिज्ञासया ब्रह्मन्मृत्युलोकमुपागतः ॥ कापिलं रूपमास्थाय भिक्षापात्रेण याचिता ॥२९॥ ब्राह्मण्युवाच ॥ कस्मात्त्वमागतो ब्रह्मन्वद यस्मात्समागतः ॥ पुनरेव मया प्रोक्तं देहि भिक्षां च सुन्दरि॥ ३० ॥ तया कोपेन महता मृत्पिंडस्ताम्रभाजने ॥ क्षिप्तो यावत्तया देव्या पुनः स्वर्गं गतो द्विज ॥३१। ततः कालेन महता तापसी सुमहाव्रता ॥ कदाचित्स्वर्गमायाता व्रतचर्याप्रसादतः ॥ ३२ ॥

हे ब्रह्मन् ! या बातके जानिवेको इच्छा करिके मैं मृत्युलोकमें आयो और कपिलब्राह्मणको रूपधरिके मैंने वाते केवल भिक्षा मांगी ॥ २९ ॥ ब्राह्मणी बोली—कि, हे ब्रह्मन्! तुम कहांते आये हो जहाँते आये हो ताहि बताओ परन्तु मैंने फिर यही कही कि हे सुन्दरि ! भिक्षा दे ॥३०॥ हे द्विज ! वाने बहुतसो क्रोध करिके एक माटीको पिंड हमारे ताम्रके पात्रमें डारि दीन्हों फिर हम स्वर्गको गये ॥३१॥ ता पीछे बहुत कालमें

बडी व्रत करनहारी वह तापसी व्रत करनेके प्रसादसों स्वर्गको आवती भई ॥ ३२ ॥ मिट्टीके पिंडके प्रभावते वाने सुन्दर मनोहर घर पायो, हे विप्रर्षे ! वह घर धान्यके भण्डारसों रहितहोत भयो ॥३३॥ जब घरको देख्यो तो वामें कुछ न देखत भई । हे ब्राह्मण ! तब वह घरते निकरिके हमारे समीप आवत भई ॥३४॥ बडे क्रोधसों भरी वह यह वचन बोलत भई कि, मैंने अनेक व्रत और चन्द्रायण कृच्छ्र करिके तथा उपवासन

मृत्पिंडस्य प्रभावेण गृहं प्राप्तं मनोरमम् ॥ संजातं चैव विप्रर्षे धान्यकोशादिवर्जितम् ॥३३॥ गृहं यावन्निरीक्षेत न किंचित्तत्र पश्यती ॥ तावद्गृहाद्विनिष्क्रांता ममान्ते चागता द्विज ॥३४॥ क्रोधेन महताविष्टा त्विदं वचनमब्रवीत् ॥ मया व्रतैश्च कृच्छ्रैश्च उपवासैरनेकशः ३५ ॥ पूजयाऽऽराधितो देवः सर्वलोकस्य भावनः ॥ न धनं दृश्यते किंचिद्गृहे मम जनार्दन ॥ ३६ ॥ तत श्रोक्ता मया सा तु गृहं गच्छ यथागतम् ॥ आगमिष्यंति सुतरां कौतूहलसमन्विताः ॥ ३७ ॥ देवपत्न्यस्तु त्वां द्रष्टुं विस्मयेन समन्विताः ॥ द्वारं नोद्घाटनीयं हि षट्तिलापुण्यवाचनात् ॥ ३८ ॥ एवमुक्त्वा गता सा तु यदा वै मानुषी तदा ॥ अत्रांतरे समायाता देवपत्न्यश्च नारद ॥ ३९ ॥

करिके अनेक बार ॥३५॥ सब लोकनके भावन जे देव विष्णु हैं तिनको आराधन कियो है हे जनार्दन ! मेरे घरमें किंचित् हू धन नहीं दीखै है ॥ ३६ ॥ तब मैंने वासों कही कि, तू बहुत शीघ्र अपने घरको जा बडे कौतुहलसों देवतानकी स्त्री आवैंगे ॥ ३७ ॥ जब देवतानकी स्त्री विस्मययुक्त हो तेरे देखिवो को आवें तब तु द्वार मत खोलियो षट्तिला एकादशीको पुण्य माँगियो ॥ ३८ ॥ भगवान कारि ऐसे कही गई वह

मानुषी जब वहां अपने घरमें गई तब हे नारद ! वाहि अन्तरमें देवपत्नी आई ॥३९॥ उनके वहां ऐसे कही कि,हम तुम्हारे देखिबेको आई हैं तुम द्वार खोलो । हे सुन्दरी ! हम तुमको देखैंगी ॥ ४० ॥ मानुषी बोली—कि, जो तुम मोको देखा चाहो तो षट्तिलाका पुण्य मोहिं देउ तो मैं द्वार खोलों ॥४१॥ षट्तिला व्रतके नाशके हो जानेसों वहां एक भी न बोलत भई और एकने वहां कही कि, मानषी हमैं देखनीहै याते हम षट्

ताभिश्च कथितं तत्र त्वां द्रष्टुं हि समागताः ॥ द्वारमुद्घाटय त्वं च पश्यामस्त्वां शुभानने ॥४०॥ मानुष्युवाच ॥ यदि द्रष्टुं मया कार्यं सत्यं वाच्यं विशेषतः ॥ ददन्तु षट्तिलापुण्यं द्वारोद्घाटनकारणात् ॥४१॥ एकापि तत्र नावादीत्षट्तिलाव्रतनाशतः॥ अन्यया कथितं तत्र द्रष्टव्या मानुषी मया ॥ ४२ ॥ ततो द्वारं समुद्घाट्य दृष्टा ताभिश्च मानुषी ॥ न देवी न च गंधर्वी नासुरी न च पन्नगी ॥ दृष्टा पूर्वं मया नारी ईदृशी सा द्विजर्षभ ॥४३॥ रूपकांतिसमायुक्ता क्षणेन समपद्यत ॥ धन्यं धान्यं च वस्त्रादि सुवर्णं रौप्यमेव च ॥ ४४ ॥ सर्वं गृहं सुसंपन्नं षट्तिलायाः प्रसादतः ॥ अतितृष्णा न कर्तव्या वित्तशाठ्यं विवर्जयेत् ॥ ४५॥

तिलाके पुण्य देयँगे ॥४२॥ ता पीछे द्वार खोलिके उन्होंने मानुषी देखी देवी है नहीं गन्धर्वी नहीं है न आसुरी है और न पन्नगी है हे द्विजश्रेष्ठ ! पहले मैंने वा नारीको ऐसी देखी ॥४३॥ फिर वह क्षणमात्रहीमें रूप और कांति करके युक्त हो जात भई वाके घरमें धन धान्य वस्त्र सुवर्ण चांदी ये सब हो जात भये ॥४४॥ और षट्तिलाके प्रभावते वाको घर सब वस्तुनसों सम्पन्न हो जात भयो अतितृष्णा न करनी चाहिये धनकी शठताको वर्जित करै ॥ ४५ ॥

अपने वित्तके अनुसार तिल और वस्त्र आदि दान करे ताते जन्ममें आरोग्यताको प्राप्तहोय ॥४६॥ दरिद्रता न होय न कष्ट होय और न दुर्भाग्य होय हे द्विज श्रेष्ठ ! षट्तिलाको व्रत करनेसों ये कोई बातें नहीं होतीहैं॥४७॥हे राजन्! या प्रकार तिलनको दान करनेसे सब पातकनते छूटि जायहैं यामें कुछ विचार न करनो चाहिये ॥४८॥ जो अच्छी भांति विधि पूर्वक दान दियो जाय तो वह सब पापनको नाश करनहारो होय है

आत्मवित्तानुसारेण तिलान्वस्त्रादि दापयेत ॥ लभते चैवमारोग्यं ततो जन्मनि जन्मनि ॥ ४६ ॥ दारिद्र्यं न च कष्टं वै न च दौर्भाग्यमेव च ॥ न भवेद्वै द्विजश्रेष्ठ षट्तिलाया उपोषणात् ॥ ४७ ॥ अनेन विधिना राजंस्तिलदानान्न संशयः ॥ मुच्यते पातकैः सर्वैर्नात्र कार्या विचारणा ॥ ४८ ॥ दानं च विधिना सम्यक् सर्वपापप्रणाशनम् ॥ नानर्थभूतो नायासः शरीरे मुनिसत्तम ॥ इति श्रीभविष्योत्तरपुराणे माघकृष्णैकादशीषट्तिलामाहात्म्यं समाप्तम् ॥ ५ ॥

हे मुनिश्रेष्ठ ! न कोई अनर्थ होय न शरीरमें खेद होय ॥ ४९ ॥ इति श्रीपण्डितपरमसुखतनयपण्डितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीयां दीपिकासमाख्यायां माघकृष्णैकादशीषट्तिलामाहात्म्य समाप्तम् ॥ ५ ॥

अथ माघशुक्लैकादशीमाहात्म्य ॥ माघ स्यापरपक्षे या जयाख्यैकादशी स्मृता ॥ तन्माहात्म्यस्य विवृतिं केशवाख्यस्तनोम्यहम्॥१॥ युधिष्ठिर बोले-कि, हे आदिदेव ! हे जगत्पते ! हे कृष्ण ! अच्छो वर्णन कीन्हो, स्वदेज, अंडज, जरायुज, उद्भिज्ज, ये चार प्रकारके सृष्टिके जीव हैं ॥ १ ॥ उनके कर्त्ता विकर्ता पालन और क्षय करनहारे आपहीहैं माघके कृष्णपक्षमें आपने षट्तिला एकादशी कही॥२॥और जो शुक्लपक्षमें एकादशी होय है ताहि प्रसन्नतासों कहो वाको कहा नाम है और वाकी विधि कहा है और वामें कौनसे देवकी पूजा कोनी जायहै ॥३॥श्रीकृष्ण बोले-

अथ माघशुक्लैकादशीकथा ॥ युधिष्ठिर उवाच ॥ साधु कृष्ण त्वया प्रोक्ता आदिदेव जगत्पते॥स्वेदजा अंडजाश्चैव उद्भिज्जाश्च जरायुजाः॥१॥तेषां कर्त्ता विकर्त्ता च पालकः क्षयकारकः॥ माघस्य कृष्णपक्षे तु षट्तिला कथिता त्वया॥२॥ शुक्ले चैकादशी या च कथयस्व प्रसादतः ॥ किं नाम को विधिस्तस्याः को देवस्तत्र पूज्यते॥३॥श्रीभगवानुवाच॥ कथयिष्यामि राजेन्द्र शुक्ले माघस्य या भवेत् ॥ जयानाम्नीति विख्याता सर्वपापहरा परा ॥ ४ ॥ पवित्रा पापहंत्री च पिशाचत्वविनाशिनी ॥ नैव तस्या व्रते जीर्णे प्रेतत्वं जायते नृणाम् ॥५॥ नातः परतरा काचित्पापघ्नी मोक्षदायिनी ॥ एतस्मात्कारणाद्राजन्कर्तव्येयं प्रयत्नतः॥ ६ ॥

कि, हे राजेंद्र ! माघ महीनाके शुक्लपक्षमें सब पापनकी हरनहारी जया नामसों विख्यात एकादशी होय है वाहि मैं कहौंगो॥४॥वह पवित्र और पापनकी दूर करनहारी और पिशाचयोनिकी छुडावनहारी है वाको व्रत करनेसों मनुष्य प्रेत नहीं होय हैं ॥ ५ ॥ याते परे और कोई पापनकी दूर करनहारी और मोक्ष देनवारी नहीं है हे राजन् ! या कारणते याको व्रत यत्नसों करनो चाहिये ॥ ६ ॥

हे राजशार्दूल ! पुराणसंबंधिनी जो कथा है वाहि सुनिये याकी महिमा मैंने पद्मपुराणमें कही है ॥७॥ एकवार स्वर्गलोकमें इन्द्र राज्यको करत हो और वा मनोहर स्थानमें देवता सुखसों वास करत भये ॥८॥ अमृतपान करनेमें तत्पर हैं और अप्सरानको समूह उनका सेवन करत हैं और काम्यवृक्षसों शोभित वहां नन्दनवन हो॥९॥वहां देवता अप्सरानके साथ विहार करतेहैं हे राजन् ! एकबार इन्द्र अपनी इच्छासों विहार करि

श्रूयतां राजशार्दूल कथां पौराणिकीं शुभाम् । पद्मजे च पुराणेऽस्या महिमा कथितो मया ॥ ७ ॥ एकदा नागलोके वै इन्द्रो राज्यं चकार ह ॥ देवाश्च तत्र संख्येन निवसंति मनोरमे ॥ ८ ॥ पीयूषपाननिरता ह्यप्सरोगणसेविताः ॥नन्दनं तु वनं तत्र पारिजातोपशोभितम् ॥ ९ ॥ रमयन्ति रमंत्यत्र ह्यप्सरोभिर्दिवौकसः एकदा रममाणोऽसौ देवेन्द्रः स्वेच्छया नृप ॥ १० ॥ नर्तयामास हर्षात्स पञ्चाशत्कोटिनायिकाः ॥ गन्धर्वास्तत्र गायन्ति गन्धर्वः पुष्पदन्तकः ॥ ११ ॥ चित्रसेनश्च तत्रैव चित्रसेनसुतास्तथा ॥ मालिनीति च नाम्ना तु चित्रसेनस्य कामिनी ॥ १२ ॥ मालिन्यां तु समुत्पन्नः पुष्पवानिति नामतः ॥ पुष्पदन्तस्य पुत्रो वै माल्यवान्नाम नामतः ॥ १३ ॥

रहो हो॥१०॥वह एक बार बडे आनंदसों पचास करोड नायिकनको नचावत भयो और पुष्पदंतसमेत सब गंधर्व वहां गाय रहे हैं ॥११॥ वहां चित्रसेन हो वाके पुत्र हैं और मालिनी नाम चित्रसेनकी स्त्रीहू ही ॥ १२ ॥ और मालिनीते उत्पन्न पुष्वान् नाम चित्रसेनको पुत्र हो और माल्यवान् नाम पुष्पदंतको पुत्र होत भयो ॥ १३ ॥ पुष्पवान् नाम गंधर्वकी कन्या पुष्पवती जाको नाम है वह माल्यवान्में अत्यंत मोहित हो

जातभई और कामके तेज बाणनसों विंधो है अंग जाको ऐसी होजातभई ॥ १४ ॥ वाने हाव भाव दिखाके कटाक्षनसों माल्यवान् वश करि लीन्हों वह सुन्दरता और रूपसों सम्पन्न ही है राजन् ! वाको रूप सुनो॥१५॥वाकी बाहें ऐसी हैं मानो कि, कामने गलेमें डारनके लिये फांसी बनाई हैं और चन्द्रमाके समान वाको मुख है और वाके नेत्र काननलों विस्तृत हैं ॥१६॥ हे नृपोत्तम ! वाके कान कुण्डलनसों शोभित हैं और

गन्धर्वी पुष्पवत्याख्या माल्यवत्यतिमोहिता ॥ कामस्य च शरैस्तीक्ष्णैर्विद्धांगी सा बभूव ह ॥ १४ ॥ तया भावैः कटाक्षैश्च माल्यवांश्च वशीकृतः ॥ लावण्यरूपसंपन्ना तस्या रूपं नृप शृणु ॥ १५ ॥ बाहू तस्यास्तु कामेन कण्ठपाशौ कृताविव ॥ चन्द्रवद्वदनं तस्या नयने श्रवणायते ॥ १६ ॥ कर्णौ तु शोभितौ तस्याः कुण्डलाभ्यां नृपोत्तम ॥ कंबुग्रीवायुता चैव दिव्या-भरणभूषिता ॥ १७ ॥ पीनोन्नतौ कुचौ तस्याः मुष्टिमात्रं च मध्यमम् ॥ नितम्बौ विपुलौ तस्या विस्तीर्णं जघनस्थलम् ॥ १८ ॥ चरणौ शोभमानौ तौ रक्तोत्पलसमद्युती ॥ ईदृश्या पुष्पवत्या च माल्यवानतिमोहितः ॥ १९ ॥

दिव्य गहननसों भूषित शंखके समान वाको गलो है ॥ १७ ॥ पुष्ट और ऊंचे वाके कुच हैं और मुष्टिमें आजाय ऐसी वाकी कमर है और बडे भारी वाके नितंब हैं और जघनस्थल विस्तीर्ण हो ॥ १८ ॥ लाल कमलके समान है शोभा जिनकी ऐसे वाके चरण शोभायमान हैं ऐसी पुष्पवती करिके माल्यवान् अत्यंत मोहित कियो गयो ॥ १९ ॥

इन्द्रकी प्रसन्नताके लिये वे दोनों नाचवेको आवत भये और अप्सरानके समूहमें मिले वे दोनों गान करत भये ॥ २० ॥ उनको चित्त भ्रममें हो याते उनको गावनों शुद्ध न होत भयो कामके बाणनके वशमें होके वे दोनों परस्पर दृष्टि मिलाय रहे हैं ॥ २१ ॥ इन्द्र वहां उन दोनोंके मनको परस्पर उत्कंठित जानिके ताल काल और क्रियामानके लोपसों गीतको बिगडनो जानत भयो ॥ २२ ॥ इन्द्र अपनो तिरस्कार

शक्रस्य परितोषाय नृत्यार्थं तौ समागतौ ॥ गायमानौ च तौ तत्र ह्यप्सरोगणसंगतौ ॥ २० ॥ शुद्धं गानं न गायेतां चित्तभ्रम समन्वितौ ॥ बद्धदृष्टी तथाऽन्योऽन्यं कामबाणवशं गतौ ॥ २१ ॥ ज्ञात्वा लेखर्षभस्तत्र संगतं मानसं तयोः ॥ तालकालक्रिया मानलोपाद्गीतावभुञ्जनात् ॥ २२ ॥ चिन्तयित्वा तु मघवा ह्यवज्ञानं तथाऽऽत्मनः ॥ कुपितश्च तयोरित्थं शापं दास्यन्निदं जगौ ॥ २३ ॥ धिग्वां पापरतौ मूढावाज्ञाभंगकरौ मम ॥ युवां पिशाचौ भवतां दम्पतीरूपधारिणौ ॥ २४ ॥ मृत्यु लोकमनुप्राप्तौ भुञ्जानौ कर्मणःफलम् ॥ एवं मघवता शप्तावुभौ दुःखितमानसौ ॥ २५ ॥ हिमवन्तमनुप्राप्ताविन्द्रशापविमोहितौ ॥ उभौ पिशाचतां प्राप्तौ दारुणं दुःखमेव च ॥ २६ ॥

जानिके उन दोनोंके ऊपर क्रोधित हो शाप देनेको उद्यत हो यह कहत भयो ॥ २३ ॥ मेरी आज्ञाभंग करनहारे जे तुम दोनों पापी और मूर्ख हो तुमको धिक्कार है । स्त्रीपुरुषका रूप धरिके तुम दोनों पिशाच हो जाउ ॥ २४ ॥ और मृत्युलोकमें जायके अपने कर्मको फल भोगो या प्रकार इन्द्रकरि शाप दिये गये वे दोनों मनमें दुःखी होत भये ॥२५॥ इन्द्रके शापसों मोहित वे दोनों हिमालय पर्वतमें जात भये और दोनों पिशाच

होके दारुण दुःखको प्राप्त होत भये ॥ २६ ॥ दुःखी हैं मन जिनके ऐसे वे दोनों बड़े कष्टको प्राप्त होत भये और विमोहित होगये कि, जिनको गंध रस स्पर्श इत्यादिको ज्ञान न रहो ॥ २७ ॥ देहपात करनहारे पीडित वे दोनों वा कर्म केरि पीडित हो नींदके सुखको न प्राप्त होत भये ॥ २८ ॥ परस्पर वाद करते भये वे दोनों घने वनमें विचरत भये पालासों उत्पन्न जो शीत है तो करिके पीडित होत भये ॥ २९ ॥ शीतके

सन्तप्तमानसौ तत्र महाकृच्छ्रगतावुभौ ॥ गन्धं रसं च स्पर्शं च न जानन्तौ विमोहितौ ॥२७॥ पीडचमानौ तु दाहेन देहपातकरेण च ॥ तौ न निद्रासुखं प्राप्तौ कर्मणा तेन पीडितौ ॥ २८ ॥ परस्परं वादमानौ चेरतुर्गिरिगह्वरम् ॥ पीडचमानौ तु शीतेन तुषारप्रभवेण तौ ॥ २९ ॥ दन्तघर्षं प्रकुर्वाणौ रोमांचितवपुर्धरौ ॥ ऊचे पिशाचः शीतार्त्तः स्वपत्नीं तां पिशाचिकाम् ॥ ३० ॥ किमावाभ्यां कृतं पापमत्यन्तं दुःखदायकम् ॥ येन प्राप्तं पिशाचत्वं स्वेन दुष्कृतकर्मणा ॥ ३१ ॥ नरकं दारुणं गत्वा पिशाचत्वं च गर्हितम् ॥ तस्मात्सर्वप्रयत्नेन पापं नैव समाचरेत् ॥ ३२ ॥ इति चिन्तापरौ तत्र ह्यास्तां दुःखेन कर्शितौ ॥ दैवयोगात्तयोः प्राप्ता माघस्यैकादशी सिता ॥ ३३ ॥

मारे दांतनको बजाते भये जे वे दोनों हैं तिनके शरीरके रोम ठाढे हो गये तब शीतसों पीडित पिशाच अपनी स्त्री पिशाचिनीसों बोलत भयो॥ ॥ ३० ॥ अत्यन्त दुःख देनेवालो कौनसो पाप हम दोनोंने किये हैं जो अपने बुरे कर्मसों हमको पिशाचयोनि प्राप्त हुई॥ ३१॥निन्दित पिशाच योनिको घोर मानिके सब जतननसों पाप न करैं ॥३२॥ दुःखसों दुर्बल वे दोनों ऐसे चिन्तामें तत्पर होत भये दैवयोगसे उनको माघ महीनेके

शुक्लपक्षकी एकादशी प्राप्त भई ॥ ३३ ॥ जया नामसों विख्यात वह सबरी तिथिनमें उत्तम तिथि है उस दिन प्राप्त होनेपर वे दोनों बिना आहार रहे ॥ ३४ ॥ हे राजन् ! और वे जलपानसों वर्जित रहे उनने न तो जीव मारे और न पत्र फल खाये ॥ ३५ ॥ दुःखयुक्त हो वे दोनों पीपरके नीचे पडे रहे । हे राजन् ! वैसेही पडे भये उन दोनोंको सूर्य अस्त होगये ॥३६॥ दारुण और शीत करनहारी घोर रात्रि प्राप्त होत भई वहां कांपते

जया नाम्नीति विख्याता तिथीनामुत्तमा तिथिः ॥ तस्मिन्दिने तु संप्राप्ते तावाहारविवर्जितौ॥३४॥आसाते तत्र नृपते जलपान विवर्जितौ ॥ न कृतौ जीवघातश्च न पत्रफलभक्षणम् ॥ ३५ ॥ अश्वत्थस्य समीपे तु पतितौ दुःखसंश्रुतौ ॥ रविरस्तं गतो राजं स्तथैव स्थितयोस्तयोः ॥३६॥ प्राप्ता चैव निशा घोरा दारुणा शीतकारिणी ॥ वेपमानौ तु तौ तत्र हिमेन च जडीकृतौ॥३७॥ परस्परेण संलग्नौ गात्रयोर्भुजयोरपि ॥ न निद्रां न रतिं तत्र न तौ सौख्यमविन्दताम् ॥ ३८ ॥ एवं तौ राजशार्दूल शापेनेन्द्रस्य पीडितौ ॥ इत्थं तयोर्दुःखितयोर्निर्जगाम तदा निशा ॥ ३९ ॥ जयायास्तु व्रते चीर्णे रात्रौ जागरणे कृते ॥ तयोर्व्रतप्रभावेण यथा ह्यासीत्तथा शृणु ॥ ४० ॥ द्वादशीदिवसे प्राप्ते ताभ्यां चीर्णे जयाव्रते ॥ विष्णोः प्रभावान्नृपते पिशाचत्वं तयोर्गतम् ॥४१॥

भये वे दोनों पालाकरिके जड कारि दिये गये ॥ ३७ ॥ जाडेके मारे आपसमें देहसों देह भुजनसों भुजा मिलाकें परे भये उन दोनोंको न तो नींद आई न रति प्राप्त और न वे दोनों सुखको प्राप्त होत भये ॥ ३८ ॥ हे राजशार्दूल ! या प्रकार वे इन्द्रके शापसों पीडित होत भये या प्रकार इन दोनों दुःखियनकी रात्रि व्यतीत होती भई ॥ ३९ ॥ जयाके व्रतके प्रभावसों जसो भयो सो सुनो ॥ ४० ॥ जब वे जयाको व्रत करचुके तब

हे राजन्! विष्णुके प्रतापसों द्वादशीके दिन उनकी पिशाच योनि छूट गई ॥ ४१ ॥ पुष्पवतीको और माल्यवान्को पहलेही रूप हो जात भयो और पुरानी प्रीतियुक्त वे दोनों पहलेही अलंकारनकरिके युक्त हो जात भये ॥ ४२ ॥ विमानमें चढेगये और अप्सरानके समूहसों शोभित वे दोनों तुंबुरु आदिक गन्धर्वन करिके स्तुति किये गये ॥ ४३॥ और हाव भाव करिके युक्त वे दोनों मनोहर स्वर्गको जातभये और इन्द्रके आगे

पुष्पवती माल्यवांश्च पूर्वरूपौ बभूवतुः॥पुरातनस्नेहयुतौ पूर्वालंकारसंयुतौ॥४२॥विमानमधिरूढौतावप्सरोगणसेवितौ॥स्तूयमानौतु गंधर्वैस्तुम्बुरुप्रमुखैस्तथा॥४३॥हावभावसमायुक्तौ गतौ नाके मनोरमे॥देवेन्द्रस्याग्रतो गत्वा प्रणामं चक्रतुर्मुदा॥४४॥तथाविधौतुतौ दृष्ट्वा मघवा विस्मितोऽब्रवीत्॥इन्द्र उवाच॥ वद तं केन पुण्येन पिशाचत्वं विनिर्गतम्॥४५॥मम शापवशं प्राप्तौ केन देवेन मोचितौ माल्यवानुवाच ॥ वासुदेवप्रसादेन जयायाः सुव्रतेन च॥४६॥पिशाचत्वं गतं स्वामिन् सत्यं भक्तिप्रसादतः॥ इति श्रुत्वा वचस्तस्य प्रत्युवाच सुरेश्वरः॥४७॥ इन्द्र उवाच॥ पवित्रौ पावनौ जातौ वन्दनीयौ ममापि च॥हरिवासरकर्त्तारौ विष्णुभक्तिपरायणौ॥४८॥

जायके आनंदसों प्रणाम करत भये॥ ४४ ॥ या प्रकारके उन दोनोंको देखि इन्द्र विस्मित होके बोलत भयो, इन्द्र बोले—कि, तुम दोनों कहो कौनसे पुण्यसों तुम्हारी पिशाचयोनि दूर हुई ॥४५॥ मेरे शापके वशमें आये भये जे तुम दोनों हो तिनको कौनसे देवने छुडायो ! माल्यवान् बोले—कि, वासुदेवके प्रसादसों और जयाके व्रत करिके ॥ ४६ ॥ हे स्वामी ! भक्तिके प्रसादसों हमारो पिशाचत्व दूरिभयो यह सत्यहै वाको यह वचन सुनिके इन्द्र फिरि बोलत भये ॥४७॥ इन्द्र बोले—कि,हरिवासरके करनहारे विष्णुभक्तिमें परायण आप पवित्र और दूसरेकोपवित्रकरनहारेतुम

दोनों मेरेहू नमस्कार करने योग्य भये ॥ ४८ ॥ जे मनुष्य हरिभक्तिमें रत हैं और शिवभक्तिमें रत हैं वे मनुष्य हमकोहू पूज्य और नमस्कारकरने योग्य हैं यामें सन्देह नहीं है ॥ ४९॥ आनंदसों पुष्पवतीके साथ स्वर्गमें विहार करो हे राजन् ! या कारणसों हरिवासर करनो योग्य है ॥५०॥ हे राजेंद्र ! जयाको व्रत ब्रह्महत्याको हरि लेनवारो है हे राजन् ! वाने सब दान दिये और सब यज्ञ किये ॥ ५१ ॥ और वह सब तीर्थनमें भली

हरिभक्तिरता ये च शिवभक्तिरतास्तथा ॥ अस्माकमपि ते मर्त्याः पूज्या वंद्या न संशयः ॥ ४९ ॥ विहरस्व यथासौख्यं पुष्पवत्या सुरालये ॥ एतस्मात्कारणाद्राजन्कर्तव्यो हरिवासरः ॥ ५० ॥ जयाव्रतं तु राजेन्द्र ब्रह्महत्यापहारकम् ॥ सर्वदानानि दत्तानि यज्ञास्तेन कृता नृप ॥ ५१ ॥ सर्वतीर्थेषु स स्नातः कृतं येन जयाव्रतम् ॥ यःकरोति नरो भक्त्या श्रद्धायुक्तो जयाव्रतम् ॥ ५२ ॥ कल्पकोटिशतं यावद्वैकुण्ठे मोदते ध्रुवम् ॥ पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलं लभेत् ॥ ५३ ॥ इति श्रीभविष्योत्तर पुराणे माघशुक्लैकादशीजयामाहात्म्यं समाप्तम् ॥ ६ ॥

भांति न्हायो जाने जयाको व्रत कीन्हो । जो मनुष्य श्रद्धायुक्त हो भक्तिसों जयाको करै है ॥ ५२ ॥ वह निश्चय करिके सौ करोड कल्पपर्यंत वैकुण्ठमें आनंद करै है हे राजन् ! या माहात्म्यके पढने और सुननेते अग्निष्टोम यज्ञके फलको प्राप्त होय है ॥ ५३ ॥ इति श्रीमत्पण्डितपरमसुखतनयपंडितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशी माहात्म्यभाषाटीकायां दीपिकासमाख्यायां माघशुक्लैकादशीकथा समाप्ता ॥ ६ ॥

अथ फल्गुनकृष्णैकादशीकथा ॥ अथ फाल्गुनकृष्णे या विजयैकादशी स्मृता ॥ तन्माहात्म्यस्य भाषायां टीकां कुर्वे प्रदीपिकाम् ॥१॥ युधिष्ठिर बोले—कि, फाल्गुनके कृष्णपक्षमें जो एकादशी होय ताको कहा नाम है हे वासुदेव ! सो मोसों प्रसन्न होके कहो॥१॥श्रीकृष्ण बोले—कि,हेराजेंद्र फाल्गुनके कृष्णपक्षमें जो एकादशी होयहै वाको नाम विजया है व्रत करनेवाले मनुष्यनको सदा जयको देनेहारीहै वाकी कथा मैं कहूँगो ॥ २ ॥

अथ फाल्गुनकृष्णैकादशी कथा ॥ युधिष्ठिर उवाच ॥ फाल्गुनस्यासिते पक्षे किंनामैकादशी भवेत् ॥ वासुदेवप्रसादेन कथयस्व ममाग्रतः ॥ १ ॥ श्रीकृष्ण उवाच ॥ कथयिष्यामि राजेंद्र कृष्णे या फाल्गुने भवेत ॥ विजयेति च सा प्रोक्ता कर्तृणां जयदा सदा ॥ २ ॥ तस्याश्च व्रतमाहात्म्यं सर्वपापहरं परम् ॥ नारदः परिपप्रच्छ ब्रह्माणं कमलासनम् ॥ ३ ॥ फाल्गुनस्यासिते पक्षे विजया नाम या तिथिः ॥ तस्या व्रतं सुरश्रेष्ठ कथयस्व प्रसादतः ॥ ४ ॥ इति पृष्टो नारदेन प्रत्युवाच पितामहः ॥ ब्रह्मोवाच ॥ शृणु नारद वक्ष्यामि कथां पापहरां पराम् ॥ ५ ॥ पुरातनं व्रतं ह्येतत्पवित्रं पापनाशनम् ॥ यन्न कस्यचिदाख्यातं मयैतद्विजयाव्रतम् ॥ ६ ॥

वाके व्रतको माहात्म्य सब पापनको हरनवारो है, एक समय नारद मुनि कमलासन ब्रह्मासे पूँछत भये ॥ ३ ॥ कि फाल्गुनको कृष्णपक्षमें विजया नाम जो एकादशी तिथि होय है यह सुरश्रेष्ठ ! ताको व्रत प्रसन्न होके मोसों कहो ॥ ४ ॥ या प्रकार नारदमुनि करि पूछे गये पितामह बोलत भये । ब्रह्मा बोले—कि, हे नारद ! सुनो उत्कृष्ट पापकी हरनहारी वह मैं तुमसों कहोंगो ॥५॥ यह व्रत पुरानो पवित्र है और पापनको नाश करने

हारो है जो यह विजयाको व्रत मैंने काहूसों नहीं कह्यो ॥ ६ ॥ यह विजया मनुष्य को जय देय है यामें कुछ संदेह नहीं है चौदह वर्षनके लिये रामचन्द्र तपोवनको जात भये ॥ ७ ॥ और सीता लक्ष्मण समेत पंचवटी में वास करत भये वहां वसतेभयेउन महात्मा राम की ॥ ८ ॥ सीता नाम तपस्विनी स्त्री रावणने हरि लीन्ही वा दुःखसों वा समय राम मोहको प्राप्त होत भये ॥ ९ ॥और वहां भ्रमण करते हुए वे मरे भयेसे जटायुको

जयं ददाति विजया नृणां चैव न संशयः ॥ रामस्तपोवनं यातो वर्षाण्येव चतुर्दश ॥ ७ ॥ न्यवसत्पञ्चवट्यां तु ससीतश्च सलक्ष्मणः ॥ तत्रैव वसतस्तस्य राघवस्य महात्मनः ॥ ८ ॥ रावणेन हृता भार्या सीतानाम्नी तपस्विनी ॥ तेन दुःखेन रामोऽसौ मोहमभ्यागतस्तदा ॥ ९ ॥ भ्रमञ्जटायुषं तत्र ददर्श विगतायुषम् ॥ कबन्धो निहतः पश्चाद्भ्रमतोऽरण्यमध्यतः ॥ १० ॥ राज्ञे विज्ञाप्य तत्सर्वं सोऽपि मृत्युवशं गतः ॥ सुग्रीवेण समं सख्यं रामस्य समजायत ॥ ११ ॥ वानराणामनीकानि रामार्थं सगतानि वै ॥ ततो हनुमता दृष्टा लंकोद्याने तु जानकी ॥ १२ ॥ रामसंज्ञापनं तस्यै दत्तं कर्म महत्कृतम् ॥ समेत्य रामेण पुनः सर्वं तत्र निवेदितम् ॥ १३ ॥

देखते भये फिर पीछे वनमें भ्रमते भये उन्होंने कबंध राक्षसको मारो ॥ १ ॥ राजासों वह सब कहिके मृत्युको प्राप्त होत भयो और सुग्रीवके साथ रामचन्द्रकी मित्रता होत भई॥ ११ ॥और रामचंद्रके लिये वानरकी सेना इकट्ठी भइ तापीछे लंकाके बगीचे में हनुमान्‌जी जानकीको देखतभये ॥ १२ ॥ रामचंद्रके चिह्न (अँगूठी)सीताजीको दई और बडा भारी काम कीन्ह फिर रामचन्द्रसों मिलके वहांका सब वृत्तांत कहते भये ॥ १३ ॥

या पीछे रामचंद्र हनुमान्‌कावचन सुनिके सुग्रीवकी सम्मतिसोंयात्रा करत भये॥१४॥वानर जिनको प्यारेहैं ऐसे रामचंद्र वानरों समेत समुद्रके तीरमें जायके वाको दुःखसों उतरिवे योग्य देखि विस्मित होत भये॥१५॥फिरि उत्फुल्ल नेत्र होके लक्ष्मणसों वचन बोलत भये कि,हे सौमित्रे ! अर्थात् सुमित्रापुत्र लक्ष्मण ! कौनसे पुण्यकरिके यह समुद्र उतरो जाय॥१६॥अगाध जलसों पूर्ण है और भयानक मगरों करिके भरो है कोई उपाय नहीं देखा

अथ श्रुत्वा रामचन्द्रो वाक्यं चैव हनूमतः॥सुग्रीवानुमतेनैव प्रस्थानं समरोचयत्॥१४॥ स गत्वा वानरैः सार्धं तीरं नदनदीपतेः॥ दृष्ट्वाऽब्धिं दुस्तरं रामो विस्मितोऽभूत्कपिप्रियः ॥ १५ ॥ प्रोत्फुल्ललोचनो भूत्वा लक्ष्मणं वाक्यमब्रवीत् ॥ सौमित्रे केन पुण्येन तीर्यते वरुणालयः ॥ १६ ॥ अगाधसलिलैः पूर्णो नक्रैर्मीनैः समाकुलः ॥ उपायं नैवपश्यामि येनायं सुतरो भवेत् ॥१७॥ लक्ष्मण उवाच ॥ आदिदेवस्त्वमेवासि पुराणपुरुषोत्तमः ॥ बकदाल्भ्यो मुनिश्चात्र वर्त्तते द्वीपमध्यतः ॥ १८ ॥ अस्मात्स्थानाद्योजनार्धमाश्रमस्तस्य राघव॥अनेन दृष्टा बहवो ब्रह्माणो रघुनंदन॥१९॥ तं पृच्छ गत्वा राजेन्द्र पुराणर्षिपुङ्गवम्॥इति वाक्यं ततः श्रुत्वा लक्ष्मणस्यातिशोभनम् ॥२०॥ जगाम राघवो द्रष्टुं बकदाल्भ्यं महामुनिम् ॥ प्रणनाम मुनिं मूर्ध्ना रामो विष्णुमिवामराः ॥२१॥

जाता यह सुखसों उतरिवे योग्य होय ॥ १७ ॥ लक्ष्मण बोले–कि, महाराज ! आदिदेव और पुराणपुरुषोत्तम आपही हो यह द्वीपके मध्यमें बकदाल्भ्य नाम मुनि निवास करैं हैं ॥१८॥हे राघव!या स्थानसों दो कोशपर उनको आश्रम है हे रघुनन्दन ! इस मुनिकरके बहुतसे ब्रह्मा देखे गये हैं॥१९॥हे राजेंद्र!वहां जायके उन श्रेष्ठमुनिसे पूछिये ता पीछे लक्ष्मणको यह अतिसुन्दर वचन सुनिके ॥२०॥ रामचन्द्र बकदाल्भ्य मुनिके दर्शनको

जात भये और दूसरे विष्णु के समान बैठे भये मुनिको प्रणाम करते भये ॥ २१ ॥ ता पीछे मुनि रामको पुराणपुरुषोत्तम जानिके बोलत भये कि हे राम ! तुम्हारो आगमन कैसे भयो ॥२॥ रामचन्द्र बोले—कि हे विप्र ! आपके प्रसादसों मैं राक्षसन समेत लंकाके जीतिवेको सेना सहित समुद्रके तटमें आयो हौं ॥२३॥ आपकी अनुकूलतासों जा प्रकार मोकरिके समुद्र उतरो जाय हे मुने ! सो उपाय मोको बताओ हे सुव्रत! प्रसन्न होउ ॥२४॥

मुनिर्ज्ञात्वा ततो रामं पुराणपुरुषोत्तमम् ॥ उवाच स ऋषिस्तत्र कुतो रामस्तवागमः ॥ २२ ॥ राम उवाच ॥ त्वत्प्रसादादहो विप्र वरुणालयसन्निधिम् ॥ आगतोऽत्र ससैन्योऽस्मि लंकां जेतुं सराक्षसाम् ॥ २३ ॥ भवतश्चानुकूल्येन तीर्यतेऽब्धिर्यथा मया ॥ तमुपायं वद मुने प्रसादं कुरु सुव्रत ॥ २४ ॥ मुनिरुवाच ॥ कथयिष्याम्यहं राम व्रतानां व्रतमुत्तमम् ॥ कृतेन येन सहसा विजयस्ते भविष्यति ॥ २५ ॥ लङ्कां जित्वा राक्षसांश्च दीर्घां कीर्तिमवाप्स्यसि ॥ एकाग्रमानसो भूत्वा व्रतमेतत् समाचर ॥ २६ ॥ फाल्गुनस्यासिते पक्षे विजयैकादशी भवेत् ॥ तस्या व्रते कृते राम विजयस्ते भविष्यति ॥ २७ ॥ निस्संशयं समुद्रं च तरिष्यसि सवानरः ॥ विधिश्च श्रूयतां राम व्रतस्यास्य फलप्रदः ॥ २८ ॥

मुनि बोले—कि, हे रामचन्द्र ! मैं सब व्रतनमें उत्तम व्रत कहौंगो जाको करनेसों शीघ्रही तुम्हारो विजय होयगो ॥ २५ ॥ और राक्षस समेत लंकाको जीतिके तुम बडी कीर्तिको प्राप्त होउगे एकाग्र मन होके या व्रत को करो ॥२६॥ फाल्गुनके कृष्णपक्षमें विजया नाम एकादशी होय है हे राम ! वाको व्रत करनेसों तुम्हारो विजय होयगो ॥२७॥ औरनिस्संदेह वानरन समेत समुद्रको उतरोगे और फलनके देनेहारे या व्रतकी विधि सुनो ॥२८॥

दशमीको दिन आवे तब सोनेको वा चांदीको वा तांबेको अथवा मिट्टीको एक घट बनवावै ॥ २९ ॥ जलसों भरे भये पत्तों समेत
शोभायमान वा कलशको स्थापन करै ताके ऊपर सोनेकी बनीभई प्रभुनारायणकी मूर्ति स्थापित करै ॥३०॥ और एकादशीके दिन प्रातःकाल
स्नान करै फिर चन्दन माला आदि चढ़ाके वा कुम्भको निश्चल स्थापित करै॥३१॥अनार तथा नारियलसों विशेष कारि वाको पूजन करै और

दशमीदिवसे प्राप्ते कुम्भमेकं च कारयेत् ॥ हैमं वा राजतं वापि ताम्रं वाप्यथ मृन्मयम् ॥ २९ ॥ स्थापयेच्छोभितं कुम्भं जल
पूर्णं सपल्लवम् ॥ तस्योपरि न्यसेद्देवं हैमं नारायणं प्रभुम् ॥ ३० ॥ एकादशीदिने प्राप्ते प्रातः स्नानं समाचरेत् ॥ निश्चले स्थापिते
कुम्भे गन्धमाल्यानुलेपिते ॥ ३१ ॥ दाडिमैर्नारिकेलैश्च पूजयेच्च विशेषतः ॥ सप्तधान्यान्यधस्तस्य यवानुपरि विन्यसेत् ॥
॥ ३२ ॥ गन्धैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ॥ कुम्भाग्रे तद्दिने राम नीयते भक्तिभावतः ॥ ३३ ॥ रात्रौ जागरणं चैव
तस्याग्रे कारयेद्बुधः ॥ द्वादशे दिवसे प्राप्ते मार्तण्डस्योदये सति ॥३४॥नीत्वा कुम्भं जलोद्देशे नद्यां प्रस्रवणे तथा ॥ तडागे स्थाप
यित्वा वा पूजयित्वा यथाविधि ॥ ३५ ॥ दद्यात्सदैवतं कुम्भं ब्राह्मणे वेदपारगे ॥ कुम्भेन सह राजेन्द्र महादानानि दापयेत् ॥३६॥

वाके नीचे सतनजा बिछावै और ऊपर सरवामें जौ भरिके धरै ॥३२॥ हे राम ! गंध, धूप, दीप और नानाप्रकारके नैवेद्यनसों कुम्भके उपर जो
स्थापित नारायणकी मूर्ति है ताको भक्तिसों पूजन करै ॥ ३३ ॥ और वहां मूर्तिके आगे रात्रिमें जागरण करै और फिर द्वादशीको सूर्यका उदय
होने पै ॥ ३४ ॥ कुम्भको लेके नदीमें वा झरनेमें अथवा तालाबके जलमें स्थापित करके यथाविधि पूजा करै ॥ ३५ ॥ फिर वा कुम्भको देवताकी

प्रतिभासमेत वेदपाठी ब्राह्मणको दान करदे और हे राजेन्द्र ! कुम्भके साथ महादानोंको दे ॥ ३६ ॥ हे राम ! या विधिसों अपने यूथप सेनाके अधिकारिनसमेत यत्नसों व्रत करो तुम्हारो विजय होयगो ॥ ३७॥ या वचनको सुनिके वा समय मुनिके कहनेके अनुसार जया एकादशीको व्रत करतभये और व्रत करने पै वे रघुनन्दन विजयी होत भये ॥ ३८ ॥ हे राजन् ! जे मनुष्य या विधिसों व्रतको करेंगे तिनको या लोक तथा पर

अनेन विधिना राम यूथपैस्सह संगतः ॥ कुरु व्रतं प्रयत्नेन विजयस्ते भविष्यति ॥ ३७ ॥ इति श्रुत्वा वचो रामो यथोक्तमकरो द्व्रतम् ॥ कृते व्रते स विजयी बभूव रघुनन्दनः ॥ ३८ ॥ अनेन विधिना राजन् ये कुर्वन्ति नरा व्रतम् ॥ इह लोके जयस्तेषां परलोके सदा जयः ॥ ३९ ॥ एतस्मात्कारणात्पुत्र कर्तव्यं विजयाव्रतम् ॥ पठनाच्छ्रवणात्तस्य वाजपेयफलं लभेत् ॥ ४० ॥ इति श्रीस्कंदपुराणे फाल्गुनकृष्णैकादश्या विजयानाम्न्या माहात्म्यं समाप्तम् ॥ ७ ॥

लोकमें जय होयगो ॥ ३९ ॥ ब्रह्मा नारदमुनिसों कहैं हैं कि, हे पुत्र ! या कारणसों व्रत करनो चाहिये वाके पढने अथवा श्रवण करनेसों वाजपेय यज्ञको फल प्राप्त होय है ॥ ४० इति श्रीमत्पण्डितसुखतनय पण्डितकेशवप्रसादशर्मद्विवेदिविरचितायामेकादशीमाहात्म्यटीकायां दीपिकासमाख्यायां फाल्गुनकृष्णैकादशीकथा समाप्ता ॥ ७ ॥

अथ फाल्गुनशुक्लैकादशी कथा ॥ फाल्गुनस्य सिते पक्षे प्रसिद्धाऽऽमलकीति या ॥ तन्माहात्म्यस्य भाषायां व्याख्यां कुर्वे सुदीपिकाम् ॥ १ ॥ मांधाता बोले–कि, हे ब्रह्मयोने ! अर्थात् ब्रह्माके पुत्र हे महाभाग ! हमारे ऊपर आपकी दया है तो ऐसो व्रत कहो जाते हमारो कल्याण होय ॥ १ ॥ वसिष्ठमुनि बोले–कि, रहस्य और इतिहास समेत सब फलके देनेहारे सब व्रतनते उत्तम व्रतको मैं कहौं हौं ॥ २ ॥ हे राजन् !

अथ फाल्गुनशुक्लैकादशीकथा ॥ मान्धातोवाच ॥ वद ब्रह्मन्महाभाग येन श्रेयो भवेन्मम ॥ ईदृग्व्रतं ब्रह्मयोने तेऽनुकम्पाऽस्ति चेन्मयि ॥ १ ॥ वसिष्ठ उवाच ॥ सरहस्यं सेतिहासं व्रतानां व्रतमुत्तमम् ॥ कथयाम्यधुना तुभ्यं सर्वभूतफलप्रदम् ॥ २ ॥ आमलक्या व्रतं राजन् महापातकनाशनम् ॥ मोक्षदं सर्वलोकानां गोसहस्रफलप्रदम् ॥ ३ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ यथा मुक्तिमनुप्राप्तो व्याधो हिंसासमन्वितः ॥ ४ ॥ वैदिशं नाम नगरं हृष्टपुष्टजनाकुलम् ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च समलंकृतम् ॥ ५ ॥ रुचिरं नृपशार्दूल ब्रह्मघोषनिनादितम् ॥ न नास्तिको न दुर्वृत्तस्तस्मिन् पुरवरे सदा ॥ ६ ॥

आमलकी नाम एकादशीको व्रत महापातकको नाश करनहारो है, सब लोकनको मोक्ष देनहारो और सहस्र गोदानके फलको देनेहारो है ॥ ३ ॥यहां या पुराने इतिहासको उदाहरण करै हैं जैसे हिंसामें लग्यो भयो व्याध मोक्षको प्राप्त होत भयो ॥ ४ ॥ हृष्ट पुष्ट मनुष्यनसों भरो भयो और ब्राह्मण क्षत्रिय वैश्य शूद्र इनकरिके शोभित वैदिश नाम नगर है॥५॥हे नृपशार्दूल अर्थात् राजनमें श्रेष्ठ!वह नगर बहुतसुन्दर और

वेदध्वनि करिके शब्दायमान हो और वा पुरमें नास्तिक तथा कुचाली कोई मनुष्य नहीं हो ॥ ६ ॥ वा पुरमें चन्द्रवंशी शशबिन्दु नाम विख्यात राजा होत भयो ताके वंशमें सत्यप्रतिज्ञा वारो चैत्ररथ नाम राजा उत्पन्न भयो ॥७॥श्रीमान् वा राजामें दशहजार हाथिनको बलहो शस्त्र और शास्त्रविद्याका पारगामीहो । हे प्रभो ! वाके पृथ्वीमें राज्य करनेके समय ॥८॥ कृपण और कुचाली मनुष्य कोई नहीं दिखाई देतो और वाके

तत्र सोमान्वये राजा विख्यातश्शशबिन्दुकः ॥ राजा चैत्ररथो नाम धर्मात्मा सत्यसंगरः ॥ ७ ॥ नागायुतबलः श्रीमान् शस्त्रशास्त्रार्थपारगः ॥ तस्मिन् शासति धर्मज्ञे धर्मात्मनि धरां प्रभो ॥ ८ ॥ कृपणो नैव कुत्रापि दृश्यते नैव निर्धनः ॥ सुकालः क्षेममारोग्यं तस्मिन् राज्यं प्रशासति ॥ ९ ॥ विष्णुभक्तिरता लोकास्तस्मिन् पुरवरे सदा ॥ हरपूजारताश्चैव राजाचापि विशेषतः ॥ १० ॥ न कृष्णायां न शुक्लायां द्वादश्यां भुञ्जते जनाः ॥ सर्वधर्मान्परित्यज्य हरिभक्तिपरायणाः ॥ ११ ॥ एवं संवत्सरा जग्मुर्बहवो राजसत्तम ॥ जनस्य सौख्ययुक्तस्य हरिभक्तिरतस्य च ॥ १२ ॥ अथ कालेन संप्राप्ता द्वादशी पुण्यसंयुता ॥ फाल्गुनस्य सिते पक्षे नाम्ना ह्यामलकी स्मृता ॥ १३ ॥

राज्यमें सदा सुकाल क्षेम और आरोग्य रहते ॥ ९ ॥ वाके राज्यमें सब लोग विष्णुभक्तिमें तथा शिवकी पूजामें रत रहते और वह राजा विशेष करि पूजा करतो ॥ १० ॥ शुक्लपक्षकी द्वादशी युक्त एकादशीके दिन कोई भोजन नहीं करते और सब धर्मनको छोडिके हरिकी भक्तिमें तत्पर रहते ॥ ११ ॥ हे राजसत्तम । या प्रकार बहुवसे वर्ष व्यतीत हुए सब मनुष्य वहांके सुखयुक्त हरिभक्तिमें रत भये ॥१२॥ या पीछे कुछकालमें

फाल्गुनके शुक्लपक्षकी द्वादशीके पुण्ययुक्त आमलकी नाम एकादशी प्राप्त भई ॥ १३ ॥ हे राजन् ! वाको प्राप्त होके हे विभो ! बालक बूढे सब लोग नियमसों व्रतको करते भये ॥ १४ ॥ महाफलयुक्त व्रतको जानिके नदीके जलमें स्नान करिके वहां देवालयमें वह महाराजा सब लोगन समेत स्थित होत भयो ॥ १६ ॥ छत्र और उपानहयुक्त तथा पञ्चरत्ननकरि युक्त तथा दिव्य गन्धसों सुगंधित घटको स्थापित करतभयो ॥१६॥

तामवाप्य जनाः सर्वे बालकास्स्थविरा नृप ॥ नियमं चोपवासं च सर्वे चक्रुर्नरा विभो ॥ १४ ॥ महाफलं व्रतं ज्ञात्वा स्नानं कृत्वा नदीजले ॥ तत्र देवालये राजा लोकयुक्तो महाप्रभुः ॥ १५ ॥ पूर्णकुम्भमवस्थाप्य छत्रोपानहसंयुतम् ॥ पंचरत्नसमायुक्तं दिव्यगंधादिवासितम् ॥ १६ ॥ धात्रि धातृसमुद्भूते सर्वपातकनाशिनि ॥ आमलकि नमस्तुभ्यं गृहाणार्घोदकं मम ॥ १७ ॥ धात्रि ब्रह्मस्वरूपाऽसि त्वं तु रामेण पूजिता ॥ प्रदक्षिणविधानेन सर्वपापहरा भव ॥ १८ ॥ तत्र जागरणं चक्रुर्जनाः सर्वे स्वभक्तितः ॥ एतस्मिन्नेव काले तु व्याधस्तत्र समागतः ॥ १९ ॥ क्षुधाश्रमपरिव्याप्तो महाभारेण पीडितः ॥ कुटुम्बार्थं जीवघाती सर्वधर्मबहिस्कृतः ॥ २० ॥

हे ब्रह्मासों उत्पन्न धात्री कहिये आमलके वृक्ष ! हे सब पापोंकी नाश करनहारी आमलकी ! तुमको नमस्कार है मेरो अर्घको जल ग्रहण करो ॥ १७ ॥ हे धात्री ! तुम ब्रह्मस्वरूप हो और तुम रामचन्द्र करिके पूजीगई हो प्रदक्षिणाके करनेसो तुम मेरे सर्व पापनको दूरि करो ॥१८॥ वहां सर्व मनुष्य भक्तिसों जागरण करतभये वाही समय एक बहेलिया वहां आवत भयो ॥ १९ ॥ वह भूँख और श्रमसों व्याप्त होरहो तथा भारी बोझसो

पीडित हो और कुटुंबके लिये जीवको मारनहारो वह सब धर्मनते बाहर हो ॥ २० ॥ क्षुधाकरिके युक्त वह वहां आमलकीको जागरण और वहां धरे दीपनते भरो भयो वह स्थान देख वहां जाय बैठ्यो ॥ २१ ॥ यह क्या है ऐसे सोचिके अत्यंत विस्मयको प्राप्त होत भयो और वहां कुंभ देख्यो ताके ऊपर दामोदर देवको देखत भयो ॥ २२ ॥ और आमलेको वृक्ष देख्यो और वहां धरे दीपकनको देखत भयो और कहते भये मनु

जागरं तत्र सोऽपश्यदामलक्यां क्षुधान्वितः ॥ दीपमालाकुलं दृष्ट्वा तत्रैव निषसाद सः ॥ २१ ॥ किमेतदिति संचिन्त्य प्राप्तो विस्मयतां भृशम् ॥ ददर्श कुम्भं तत्रस्थं देवं दामोदरं तथा ॥ २२ ॥ ददर्शामलकीवृक्षं तत्रस्थांश्चैव दीपकान् ॥ वैष्णवं च तथाऽऽख्यानं शुश्राव पठतां नृणाम् ॥ २३ ॥ एकादश्याश्च माहात्म्यं शुश्राव क्षुधितोऽपि सन् ॥ जाग्रतस्तस्य सा रात्रिर्गता विस्मितचेतसः ॥ २४ ॥ ततः प्रभातसमये विविशुर्नगरं जनाः। व्याधोऽपि गृहमागत्य बुभुजे प्रीतमानसः ॥ २५ ॥ ततः कालेन महता व्याधः पंचत्वमागतः ॥ एकादश्याः प्रभावेण रात्रौ जागरणेन च ॥२६॥ राज्यं प्रपेदे सुमहच्चतुरङ्गबलान्वितम् ॥ जयन्ती नाम नगरी तत्र राजा विदूरथः ॥ २७ ॥

ष्यनते विष्णुकी कथा सुनत भयो ॥ २३ ॥ और भूखे होते हूं एकादशीको माहात्म्य सुनतभयो वा विस्मित मनवालेको रात्री जागतही बीती ॥ २४ ॥ ता पीछे प्रभातके समयमें सर्वलोक नगरको जात भये और व्याधहूं घरमें आयके प्रसन्न मनसों भोजन करत भयो ॥ २५ ॥ता पीछे बहुत कालमें मृत्युको प्राप्त होव भयो एकादशीके प्रभावसों और रात्रिके जागरणसों ॥ २६ ॥ वह व्याध चतुरंगसेना करिके युक्त राज्यको प्राप्त

होतभयो जयंती नाम नगरी ताको राजा विदूरथ नाम होत भयो ॥२७॥ ता राजाको चतुरंग सेना करिके युक्त बलवान् धनधान्ययुक्त वसुरथ नाम पुत्र होत भयो ॥ २८ ॥ वह निर्भय दशहजार ग्रामनको भोग करत भयो वह तेजकरि सूर्यके समान और कांतिकरि चन्द्रमाके समान हो ॥२९॥ और पराक्रमते विष्णुके समान तथा क्षमा करिके पृथ्वीके समान हो और धर्मात्मा सत्यवक्ता तथा विष्णुभक्तिमें परायण होत भयो॥३०॥

तस्मात्स तनयो जज्ञे नाम्ना वसुरथो बली ॥ चतुरङ्गबलोपेतो धनधान्यसमन्वितः ॥ २८ ॥ दशायुतानि ग्रामाणां बुभुजे भयवर्जितः ॥ तेजसाऽऽदित्यसङ्काशः कांत्या चन्द्रसमप्रभः ॥ २९ ॥ पराक्रमे विष्णुसमः क्षमया पृथिवीसमः ॥ धार्मिकः सत्यवादी च विष्णुभक्तिपरायणः ॥ ३० ॥ ब्रह्मज्ञः कर्मशीलश्च प्रजापालनतत्परः ॥ यजते विविधान्यज्ञान्स राजा परदर्पहा ॥ ३१ ॥ दानानि विविधान्येव प्रददाति च सर्वदा ॥ एकदा मृगयां यातो दैवान्मार्गपरिच्युतः ॥ ३२ ॥ न दिशो नैव विदिशो वेत्ति तत्र महीपतिः ॥ उपधाय च दोर्मूलमेकाकी गहने वने ॥ ३३ ॥

ब्रह्मज्ञानी और कर्म करनहारो वह प्रजापालनमें तत्पर होत भयो और शत्रुके गर्वको दूरि करनहारो वह राजा नानाप्रकारके राजसूय आदि यज्ञ करत भयो ॥ ३१ ॥ वह सदा नानाप्रकारके दान देतो एकबार शिकारको गयो भयो वह राजा दैवयोगसों राह भूल जात भयो ॥३२॥ वहां राजाको दिशा विदिशाको ज्ञान नहीं रह्यो तब अपनी बाँह सिरहाने देके परि रहत भयो ॥ ३३ ॥

अत्यन्त थको भयो वह राजा भूखोंही सोय रहत भयो या बीचमें पर्वतनको निवासी म्लेच्छनको समूह ॥ ३४ ॥ वहां आवत भयो जहां शत्रुके बलको नाशकरनहारो वह राजा परोहो राजा करिके वैर किये वे सदा दुःखी हैं ॥ ३५ ॥ ता पीछे वे सब भूरिदक्षिण राजाको घेरि ठाढे होत भये और पहिले वैरसो सिद्ध है बुद्धि जाकी ऐसे या राजाको मारो मारो ऐसे कहत भये ॥ ३६ ॥ पहिले याने हमारे पिता भाई और पुत्र

श्रांतश्च क्षुधितोऽत्यन्तं संविवेश महीपतिः ॥ अत्रान्तरे म्लेच्छगणःपर्वतान्तरवासभाक् ॥ ३४ ॥ आययौ तत्र यत्रास्ते राजा परबलार्दनः ॥ कृतवैरास्तु ते राज्ञा सर्वदैवोपतापिताः ॥ ३५ ॥ परिवार्य ततस्तस्थू राजानं भूरिदक्षिणम् ॥ हन्यतां हन्यतां चायं पूर्ववैरविरुद्धधीः ॥ ३६ ॥ अनेन निहताः पूर्वं पितरो भ्रातरः सुताः ॥ पौत्राश्च भागिनेयाश्च मातुलाश्च निपातिताः ॥ ३७ ॥ निष्कासिताश्च स्वस्थानाद्विक्षिप्ताश्च दिशो दश ॥ एतावदुक्त्वा ते सर्वे तत्रैनं हंतुमुद्यताः ॥ ३८ ॥ पाशैश्च पट्टिशैः खड्गैर्बाणैर्धनुषि संस्थितैः ॥ सर्वतोऽरिगणास्ते च राजानं हन्तुमुद्यताः ॥ ३९ ॥ सर्वाणि शस्त्राणि समाद्रवन्ति न वै शरीरे प्रविशंति तस्य ॥ ते चापि सर्वे हतशस्त्रसंघा म्लेच्छा बभूवुर्गतदेहजीवाः ॥ ४० ॥

मारे हैं और पौत्र भानजे तथा मामाहू मारे हैं ॥ ३७ ॥ और अपने स्थानते निकारे गये हम दशों दिशानमें फैल गये इतना कहिके वे वहां वा राजाके मारिबेको उद्यत होत भये ॥ ३८ ॥ पाश, पट्टिश, खड्ग और धनुषमें चढाये भये बाणनसों वे शत्रुनके समूह राजाके मारिबेको उद्यत होत भये ॥ ३९ ॥ सब शस्त्र दौरते परन्तु वा राजाके शरीरमें नहीं प्रवेश करते तब नष्ट हो गये हैं शस्त्रनके समूह जिनके ऐसे म्लेच्छनकेदेहगतजीव अर्थात्

मरेसे हो जाते भये ॥ ४० ॥ वहां वे शत्रु एक पगभरिहू आगे चलनेको न समर्थ होत भये और नष्ट हैं चित्त जिनके ऐसे उन सब म्लेच्छनके शस्त्रहू भोथरे हो जात भये ॥ ४१ ॥ जे राजाके मारनेको आये हैं वे सब दीन होजात भये याहि समयमें वा राजाके शरीरते ॥ ४२ ॥ सम्पूर्ण अंगनसों शोभायमान एक स्त्री निकसत भई वही दिव्यगन्ध करिके शोभित और दिव्यही आभरणसों भूषित ही ॥ ४३ ॥

गन्धर्वत्वमवाप्नोति स्वर्गलोकं च गच्छति ॥ तांबूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ॥ ६८ ॥ अस्य प्रदानाद्ब्रह्माद्याः श्रियं ददतु पुष्कलाम् ॥ पूगे ब्रह्मा हरिः पत्रे चूर्णे साक्षान्महेश्वरः ॥ ६९ ॥ एतेषां संप्रदानेन सन्तु मे भाग्यसम्पदः ॥ पूरितं पूगचूर्णेन नागवल्लीदलान्वितम् ॥ १७० ॥ सचूर्णं खादिरं चैव पत्रीफलसमन्वितम् ॥ एलालवंगसंमिश्रं गन्धर्वाप्सरसां प्रियम् ॥ ७१ ॥ कनकाढ्यं निरातंकं त्वं प्रासादत्कुरुष्व माम् ॥ चातुर्मास्यव्रतोपेतः सुवासिन्यै द्विजाय च ॥ ७२ ॥ नारी वा पुरुषो वाऽपि हरिद्रां सम्प्रयच्छति ॥ लक्ष्मीमुद्दिश्य गौरीं वा तत्पात्रे दक्षिणान्वितम् ॥ ७३ ॥ प्रदद्याद्भक्तिसंयुक्तं देवी मे प्रीयतामिति ॥ भर्त्रा सह सुखं भुंक्ते नारी नार्या तथा पुमान् ॥ ७४ ॥

नागवेलिके पत्तों करिके युक्त ॥१७०॥ चूना खैर जावित्री और जायफल करिके युक्त इलायची और लौंगों करिके मिला हुआ तांबूल गंधर्व और अप्सरानको प्रिय है ॥ ७१ ॥ तू प्रसन्नतासे मोको सुवर्णयुक्त तथा आतंक रहित कर और चातुर्मास्य व्रत करिके युक्त सुवासिनीके और ब्राह्मणके अर्थ ॥७२॥ नारी वा पुरुष हरिद्राको लक्ष्मी वा गौरीके निमित्त वा पात्रमें दक्षिणा करिके युक्त हरिद्राको दान करै है ॥ ७३ ॥ देवी मोपै

प्रसन्नहोय ऐसे दान कहिके जो भक्तिसों करै है वह नारी पतिके साथ पुरुष स्त्रीके साथ सुख भोग करै है ॥ ७४ ॥ और वह सौभाग्य अक्षय धान्य धन पुत्रवृद्धि और रूप तथा लावण्यको प्राप्त होके स्वर्गलोकमें आनन्द करै है ॥७५॥ जो उमा और महेशका उद्देश कारिके चातुर्मास्यमें दिन दिन ब्राह्मणके मिथुन अर्थात् स्त्री पुत्र पुरुषको पजिके वा विप्रके अर्थ यथाशक्ति ॥७६॥ उमेश प्रसन्न होय ऐसे कहिके दक्षिणा समेत

सौभाग्यमक्षयं धान्यं धनपुत्रसमुन्नतिम् ॥ सम्प्राप्य रूपलावण्ये देवीलोके महीयते ॥७५॥ उमामहेशमुद्दिश्य चातुर्मास्ये दिने दिने ॥ सम्पूज्य विप्रमिथुनं तस्मै विप्राय शक्तितः ॥ ७६ ॥ दद्यात्सदक्षिणं हेमसुमेशः प्रीयतामिति ॥ उमेशप्रतिमां हैमीं दद्यादुद्यापने बुधः ॥ ७७ ॥ पंचोपचारैः सम्पूज्य धेनुं सवृषभां नरः ॥ भोजयेदपि मिष्टान्नं तस्य पुण्यफलं शृणु ॥ ७८ ॥ सौभाग्यं पूर्णमायुष्यं सन्ततिश्चानपायिनी ॥ सम्पत्तिश्चाक्षया कीर्तिर्जायते व्रतवैभवात् ॥ ७९ ॥ इह भुक्त्वाऽखिलान् कामानन्ते शिवपुरं व्रजेत ॥ तत्र स्थित्वा चिरं कालमुपभुज्य सुखं महत् ॥ १८० ॥

सुवर्णको दान करै और बुध नर उद्यापनमें सुवर्णकी बनी भई उमेशकी प्रतिमाको दान करै ॥ ७७ ॥ मनुष्य वृष समेत गौको पंचो पचारनसों पूजन करिके उनको मिष्टान्न भोजन करावै ताको फल सुनो ॥ ७८ ॥ सौभाग्य पूरि आयु जाको कबहूं नाश न होय ऐसी संतति संपत्ति और अक्षय कीर्ति ये सब व्रतके प्रभावसों होय हैं ॥ ७९ ॥ और या लोकमें संपूर्ण कामनाओंको भोगिके अंतमें

शिवपुरको जायहै और वहां चिरकाललों स्थित हो बहुतसों सुख भोग करके ॥ १८० ॥ पुण्यके शेषसों यहां आयके राजा होय और जो चातुर्मास्यमें आलस्य छोडिके फलनको दान करै है ॥८१॥और व्रतकी समाप्तिमें ब्राह्मणके अर्थ चांदीको दानकरै है वह सब मनोरथनको और अनपायिनी संतति पायके ॥ ८२ ॥ फलदानके माहात्म्यसों नंदनवनमें आनन्द करै है पुष्पदानके व्रतमेंहू सुवर्णके पुष्प आदिको दान करै ॥८३॥

पुण्यशेषादिहागत्य जायते धरणीपतिः ॥ फलदानं तु यः कुर्याच्चातुर्मास्यमतन्द्रितः ॥ ८१ ॥ समाप्तौ कलधौतानि तानि दद्याद्द्विजातये ॥ सर्वान्मनोरथान्प्राप्य सन्ततिश्चानपायिनीम् ॥ ८२ ॥ फलदानस्य माहात्म्यान्मोदते नन्दने वने पुष्पदान व्रतेनापि स्वर्णपुष्पादि दापयेत् ॥ ८३ ॥ स सौभाग्यं परं प्राप्य गन्धर्वपदमाप्नुयात् ॥ वासुदेवे प्रसुप्ते तु चातुर्मास्य मतंद्रितः ॥ ८४ ॥ नित्यं वामनमुद्दिश्य दध्यन्नं स्वादु षड्रसम् ॥ भोजयेदथवा दद्यादेकादश्यां न भोजयेत् ॥ ८५ ॥ दानमेवं प्रकुर्वीत ग्रहणादौ तथैव च ॥ अशक्तो नित्यदाने तु कुर्यात्पञ्चसु पर्वसु ॥ ८६ ॥ भूताष्टम्याममायां च पूर्णिमायां तथापि च ॥ प्रत्यर्कवारमथवा प्रतिभार्गववासरम् ॥ ८७ ॥

वह परम सौभाग्यको प्राप्त हो गंधर्वपदको प्राप्त होय है वासुदेवके सोवनेपै चातुर्मास्यमें आलसको छोडिके ॥ ८४ ॥ वामनजीके नामपै दही भात और स्वादयुक्त छहूँ रस भोजन करावै अथवा दान करै परंतु एकादशीको भोजन न करावै ॥ ८५ ॥ या प्रकारसों दान करै और ग्रहण आदि पर्वनहूमें ऐसोही करै जो नित्य दान देवेकी सामर्थ्य न हो तो पांच पर्वनमें दान करै॥८६॥चतुर्दशीमें अष्टमीमें अमावस्यामें और पूर्णिमामें अथवा

प्रत्येक रविवारको वा प्रत्येक शुक्रवारको॥८७॥और दोनों पाखनमें द्वादशीके दिन दान करै याप्रकारकरिके समाप्त होनेपै शक्तिके अनुसार भूमिको दान करे॥८८॥और जो भूमिदान देनेकी सामर्थ्य न होय तो अलंकारनसों शोभित गौको दान करै यामेंहू असमर्थ होय तो वस्त्र सुवर्ण और पादुकानको दान करे॥८९॥तैसेही वस्त्रनसमेत छाते और जूतेको दान सब दाननमें उत्तम है ब्राह्मणको तो भोजन और क्षत्रियको यथासुख भूमि ॥९०॥

पक्षद्वयेऽपि द्वादश्यामवश्यं दानमेव च ॥ एवं कृत्वा समाप्तौ तु यथाशक्ति महीं ददेत् ॥ ८८ ॥ अशक्तौ भूमिदाने तु धेनुं दद्यादलंकृताम् ॥ तत्राप्यशक्तौ वासश्च सरुक्मं पादुके तथा ॥ ८९ ॥ छत्रोपानद्वस्त्रयुतं दानं सर्वं प्रशस्यते ॥ द्विजानां भोजनं चैव क्षत्रियस्य यथासुखम् ॥ १९० ॥ भूम्यादि मुनिशार्दूल वैश्यस्य वसुधां विना ॥ ब्राह्मणस्यापि शक्तस्य शूद्रस्यापि तथा मतम् ॥ कुबेरेण पुरा चीर्णं शंकरस्योपदेशतः ॥ ९१ ॥ जह्नुना गौतमेनापि शक्रेणापि कृतं पुरा ॥ अक्षय्यमन्नमाप्नोति पुत्रपौत्रादिसंपदम् ॥ ९२ ॥ दृढाङ्गः पूर्णमायुस्यं लभते वैरिनाशनम् ॥ स स्थिरां विष्णुभक्तिं च प्रयाति हरिमंदिरम् ॥ ९३ ॥

हे मुनिश्रेष्ठ ! वैश्यको भूमि दान छोडिकै सब दान कहे हैं समर्थ ब्राह्मणहू तथा शूद्रहूको कह्यो है पहले शंकरजीके उपदेशते कुबेरने यह व्रत कियो ॥९१॥ और पहले जह्नु राजाने गौतमऋषिने और इंद्रने यह व्रत कियो या व्रतको करनहारो मनुष्य अन्न और पुत्र पौत्र आदि संपत्तिको प्राप्त होय है ॥ ९२॥ वाको अंग दृढ होय जाय है और पूरी आयु तथा शत्रु नाशको प्राप्त होय हैं और अति स्थिर विष्णुभक्तिको प्राप्त होय है ।

तथा हरिके मंदिर जाय है ॥९३॥ आरोग्य और अतुल सुखरूप तथा संपत्तिको प्राप्त होय है और या व्रतके करनेसे स्त्री कबहूं बांझ न होय यह व्रत अनन्त फलको देनहारो है ॥९४॥ अलंकारसहित कल्याणकी देनहारी पयस्विनी गौको दान करै और शक्तिके अनुसार दक्षिणा देनहारी मनुष्य सर्वज्ञानी होय है ॥९५॥परायो और प्रेष्य नहीं होय है और ब्रह्मलोकको जाय है और वह मनुष्य पितरनसमेत अक्षय सुखको प्राप्त होय

आरोग्यं सौख्यमतुलं रूपं सम्पत्तिमेव च ॥ न वन्ध्या जायते चेदमनन्यफलदायकम् ॥ ९४ ॥ नित्यं पयस्विनीं दद्यात्सालंकारां शुभावहाम् ॥ दत्त्वा तु दक्षिणां शक्त्या स सर्वज्ञानवान् भवेत् ॥ ९५ ॥ न परप्रेष्यतां याति ब्रह्मलोकं च गच्छति ॥ अक्षय्यं सुखमाप्नोति पितृभिः सहितो नरः ॥ ९६ ॥ वार्षिकांश्चतुरो मासान् प्राजापत्यं चरेन्नरः ॥ समाप्तौ गोयुगं दद्यात्कृत्वा ब्राह्मणभोजनम् ॥ ९७ ॥ सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ एकान्तरोपवासे तु दीपानष्टौ प्रदापयेत ॥ ९८ ॥ वस्त्रकाञ्चनयुक्तांश्च शय्यया सह भामिनी ॥ अनडुद्वयसंयुक्तं लांगलं कर्षणक्षमम् ॥ ९९ ॥ सर्वोपस्करसंयुक्तं ददामि प्रीयतां हरिः ॥ शाकमूलफलैर्वापि चातुर्मास्यं नयेन्नरः ॥ २०० ॥

है ॥९६॥ वर्षाके चारि महीनेमें मनुष्य प्राजापत्य व्रत करै और समाप्तिमें दो गौको दान करै और ब्राह्मणको भोजन करावै॥९७. तो सब पापनसों शुद्ध होके सनातन ब्रह्मको प्राप्त होय हैं और जो एक दिन बीचमेंदेके व्रत करैऔर आठ दीपनको दान करै ॥९८॥ वस्त्र तथा सुवर्ण करिके युक्त शय्यासमेत बैलनकी जोडी करिके युक्त जोतनेके योग्य हल॥९९॥सब सामग्री करिके युक्तमैं दान करौं हौं या दानसों हरि प्रसन्न होय अथवा शाक

मूल वा फलन करिके चातुर्मास व्यतीत करैं॥२००॥और समाप्तिमें गौको दान करै तो विष्णुके मंदिरको जाय और दूधको आहार करै है वह सनातन ब्रह्मलोकको प्राप्त होय है ॥१॥ और व्रतनके अन्तमें एक ब्याई भई गौको दान करे और जो दोनों ऋतुमें केलाके पात्रमें भोजन करै है॥२॥ और वस्त्रके जोडाको और कांसेके पात्रको दान यथाशक्ति करैं हैं वह सुखी रहे हैं कांसेमें ब्रह्मा हैं शिव लक्ष्मी है और कांसोही अग्नि है ॥

समाप्तौ गोप्रदानेन स गच्छेद्विष्णुमन्दिरम् ॥ पयोव्रती तथाऽऽप्नोति ब्रह्मलोकं सनातनम् ॥ १ ॥ व्रतान्ते च तथा दद्याद्गामेकां च पयस्विनीम् ॥ रंभाफलपलाशेषु यो भुंक्ते च ऋतुद्वये ॥ २ ॥ वस्त्रयुग्मं च कांस्यं च शक्त्या दद्यात्सुखी भवेत् ॥ कांस्ये ब्रह्मा शिवो लक्ष्मीः कांस्यमेव विभावसुः ॥ ३ ॥ कांस्यं विष्णुमयं यस्मादतः शान्ति प्रयच्छ मे ॥ नित्यं पलाशभोजी च तैलाभ्यंगविवर्जितः ॥ ४ ॥ स निहंत्यतिपापानि तूलराशिमिवानलः ॥ ब्रह्मघ्नश्च सुरापश्च बालघातकरश्च यः ॥ ५ ॥ असत्यवादिनो ये च स्त्रीघाती व्रतघातकः ॥ अगम्यागामिनश्चैव विधवागामिनस्तथा॥६॥चाण्डालीगामिनश्चैव विप्रस्त्रीगामिनस्तथा ते सर्वे पापनिर्मुक्ता व्रतेनानेन केशव ॥ ७ ॥

॥३॥कांसो जाते विष्णुमय है ताते मोको शांति देय नित्यही पत्रनमें भोजन करै और तेल न लगावे ॥४॥ वह अपने पापनको ऐसे भस्म करि देय जैसे रुईके ढेरको अग्नि जराय देय है ब्रह्महत्यारो, मद्यप और बालकनको हत्यारो॥५॥ और जो असत्यवादी हैं और जे स्त्री तथा व्रतके घातीहैं और जे अगम्यागामी हैं, और जे विधवागामी हैं॥६॥चांडालीमें गमन करनहारे हैं हे केशव ! ये सब या व्रत करिके पापनते छूटि जायँ हैं ॥७॥

और व्रतकी समाप्तिमें चौसठि पलको भारी कांसेके पात्रको और अलंकारयुक्त पयस्विनी बछडेवालीगौको दान करै॥८॥अलंकृत और विद्वान सुन्दर वस्त्रधारी और सुन्दर है वेषजाको ऐसे ब्राह्मणके अर्थ वह दान देय और जो भूमि लीपिके देव नारायणको स्मरण करतो भयोभोजन करै है॥९॥वाको खेतीके योग्य बहुतसे जलके समीपकी भूमिको यथाशक्ति दान करैतो वह देनहारो आरोग्य और पुत्रन करिकेसंपन्न धर्मात्मा राजा होय॥१०॥

समाप्तौ कांस्यपात्रं तु चतुःषष्टिपलैर्युतम् ॥ सवत्सां गां च वै दद्यात्सालंकारां पयस्विनीम् ॥ ८ ॥ अलंकृताय विदुषे सुवस्त्राय सुवेषिणे ॥ भूमौ विलिप्य यो भुंक्ते देवं नारायणं स्मरन् ॥ ९ ॥ दद्याद्भूमिं यथाशक्ति कृष्यां बहुजलांतिके ॥ आरोग्यपुत्रसंपन्नो राजा भवति धार्मिकः ॥ २१० ॥ शत्रोर्भयं न लभते विष्णुलोकं स गच्छति ॥ अयाचिते त्वनड्वाहं सहिरण्यं सचन्दनम् ॥ ११ ॥ षड्रसं भोजनं दद्यात्स याति परमां गतिम् ॥ यस्तु सुप्ते हृषीकेशे नक्तं च कुरुते व्रतम् ॥ १२ ॥ ब्राह्मणान् भोजयेत्पश्चाच्छिवलोके महीयते ॥ एकभक्तं नरः कृत्वा मिताशी च दृढव्रतः ॥ १३ ॥ योऽर्चयेच्चतुरो मासान् वासुदेवं स नाकभाक् ॥ समाप्तौ भोजयेद्विप्रांच्छक्त्या दद्याच्च दक्षिणाम् ॥ १४ ॥

वह शत्रुके भयको नहीं प्राप्त होय हैं और विष्णुलोकको गमन करै हैं और जो आयाचितमें सुवर्ण और चन्दन समेत॥११॥षड्रस भोजन देयहै वह परम गतिको प्राप्त होय है और जो हृषीकेश भगवान्के सोवनेके समय नक्त व्रतको करै है॥१२॥ और जो पीछे व्रतकी समाप्तिमें ब्राह्मणनको भोजन करावै है वह शिवलोकमें आनंद भोगै है मनुष्य एक भक्त व्रत करिके थोरोसो भोजन करै और व्रतमें दृढ रहै ॥ १३ ॥ जो चार महीने

वासुदेवका पूजन करै है वह स्वर्गको भागी होय है और समाप्तिमें ब्राह्मणनको भोजन करावै और शक्तिके अनुसार दक्षिणा दे॥१४॥और हृषी केशके सोनेपै जो मनुष्य भूमिमें सोवत है और सामग्री समेत शय्याको दान करै है वह शिवलोकमें आनन्दसों भोगैहै॥१५॥ और जो मनुष्य दो ऋतुन भरि पांयनमें तेलको नहीं लगावै है वह मनुष्य ब्राह्मणनके पांवधोवै और उनको भोजन करावै॥१६॥और यथाशक्ति दक्षिणा दे तो वह विष्णु

यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ॥ शय्यां सोपस्करां दद्याच्छिवलोके महीयते ॥ १५ ॥ पादाभ्यङ्गं नरो यस्तु वर्जयेच्च ऋतुद्वये ॥ पादाभ्यङ्गं नरः कुर्याद्ब्राह्मणानां च भोजनम्॥१६॥दक्षिणां च यथाशक्त्या स गच्छेद्विष्णुमंदिरम् ॥ आषाढाच्चतुरो मासान्वर्जयेन्नखकृंतनम् ॥ १७ ॥ आरोग्यपुत्रसम्पन्नो राजा भवति धार्मिकः ॥ पायसं लवणं चैव मधु सर्पिः फलानि च ॥ १८ ॥ चातुर्मास्ये वर्जयति गौरीशंकरतुष्टये ॥ कार्त्तिक्यां च पुनस्तानि ब्राह्मणाय निवेदयेत् ॥१९॥ स रुद्रलोकमाप्नोति रुद्र व्रतनिषेवणात् ॥ यवान्नं भक्षयेद्यस्तु अथवा शालयः शुभाः ॥ २० ॥

लोकको जाय आषाढ आदि चारि महीनेमें नख न कटावै ॥ १७ ॥ तो वह आरोग्य और पुत्रन करिके युक्त धर्मात्मा राजा होय और खीर, नोन सहद घी और फलनको जो॥१८॥चातुर्मासमें गौरीशंकरकी प्रसन्नताके लिये छोडै वह फिरि उन्ही वस्तुनको कार्तिकीके दिन ब्राह्मणनके अर्थ निवेदन करै ॥१९॥ वह रुद्रके व्रतके सेवनेसों रुद्रलोकको प्राप्त होय है और जो चार महीने जवको अथवा सुन्दर चावलनको भोजन करै है ॥२०॥

वह पुरुष पुत्र पौत्रादिकन समेत शिवलोकमें आनन्द करै है तैल लगानेके त्यागि सदा व्रती विष्णुभक्त ॥ २१ ॥ वर्षाऋतुमें विष्णुको पूजन करिके विष्णुकी गतिको प्राप्त होय है और समाप्तिमें सुवर्ण करिके युक्त कांसेके पात्रको ॥२२॥ तेलसों भरिके ब्राह्मणके अर्थ दान करै और वर्षाके चारि महीने शाक आदिको वर्जित करै ॥ २३ ॥ वह विष्णुके लोकमें प्राप्त होय हैं और पितरोंकी तृप्ति होय है व्रतके अन्तमें

पुत्रपौत्रादिभिः सार्द्धं शिवलोके महीयते ॥ तैलाभ्यङ्गपरित्यागी विष्णुभक्तः सदा व्रती ॥ २१ ॥ वर्षासु विष्णुमभ्यर्च्य वैष्णवीं लभते गतिम् ॥ समाप्तौ कांस्यपात्रं च सुवर्णेन समन्वितम् ॥ २२ ॥ तैलेन पूरितं कृत्वा ब्राह्मणाय निवेदयेत् ॥ वार्षिकांश्चतुरो मासाञ्छाकादि परिवर्जयेत ॥ २३ ॥ विष्णुलोकमवाप्नोति पितृतृप्तिः प्रजायते ॥ व्रतान्ते हरिमुद्दिश्य पात्रं राजतमेव हि ॥ २४ वस्त्रेण वेष्टयेद्गंधपत्रपुष्पैः समर्चयेत् ॥ मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् ॥ २५ ॥ त्वक्पुष्पं कवचं चेति शाकमष्टविधं स्मृतम् ॥ समभ्यर्च्य यथाशक्त्या ब्राह्मणान्वेदपारगान् ॥ २६ ॥ दद्याद्दक्षिणया सार्धं व्रतसंपूर्णहेतवे ॥ शिवसायुज्यमाप्नोति प्रसादाच्छूलपाणिनः ॥२७ ॥

हरिके निमित्त चांदीके पात्रको दान करै ॥ २४ ॥ या पात्रको वस्त्रसों लपेट और गंध पत्र पुष्पन करिके पूजन करै मूल पत्र करीरको अग्र फल ॥ २५ ॥ त्वचा पुष्प और कवच यह आठ प्रकारके शाक कह्यो है ताको यथा शक्ति पूजन करिके वेदके पारगामी ब्राह्मणको ॥ २६ ॥ व्रतकी पूर्णताके लिये दक्षिणासमेत दान करे तो वह शूलपाणि जो शिव हैं तिनके प्रसादसों शिवकी सायुज्यताको प्राप्त होय है ॥ २७ ॥

पुआनकों छोडके व्रतको भोजन करैं और कार्तिकमें सुवर्ण गेहूं और वस्त्रनको दान करिके अश्वमेधके फलको प्राप्तहोय है ॥२८॥गेहूं सब जीवनके और पुष्टिके बढावनहारे हैं और हव्य कव्यमें मुख्य है ताते मोको लक्ष्मीदेय ॥२९॥ आषाढ आदि चार महीनेमें मनुष्य बैंगननको और करेला कोन खाय तूम्बी और परवर न खाय ॥२३०॥ और जो कोई यद्वा तद्वा फल प्यारो होयताहि न खाय तापीछे चातुर्मास्यके पूरे होनेपर इनसबको चांदीके

अपूपवर्जनं कृत्वा भोजनं व्रतमाचरेत् ॥ कार्तिके स्वर्णं गोधूमान्वस्त्रं दत्त्वाऽश्वमेधकृत् ॥ २८ ॥ गोधूमाः सर्वजन्तूनां बल पुष्टिविवर्धनाः ॥ मुख्याश्च हव्यकव्येषु तस्मान्मे ददतु श्रियम् ॥ २९ ॥ आषाढादि चतुर्मासान्वृन्ताकं वर्जयेन्नरः ॥ कार वल्लीफलं वाप्यलाबुं पडवलं तथा ॥ २३० ॥ यद्वा तद्वा फलं वापि यच्च प्रियतमं भवेत् ॥ चातुर्मास्ये ततो वृत्ते रौप्याण्ये तानि कारयेत् ॥ ३१ ॥ मध्ये विद्रुमयुक्तानि ह्यर्चयित्वा तु शक्तितः ॥ दद्याद्दक्षिणया सार्द्धं ब्राह्मणायातिभक्तितः ॥ ३२ ॥ अभीष्टं देवमुद्दिश्य देवो मे प्रीयतामिति ॥ स दीर्घमायुरारोग्यं पुत्रपौत्रान्सुरूपकान् ॥ ३३ ॥ अक्षय्यां सन्ततिं कीर्तिं लब्ध्वा स्वर्गे महीयते ॥ फलत्यागी भवेद्यस्तु विष्णुलोके स पूज्यते ॥ ३४ ॥

बनवावै ॥ ३१ ॥ और बीचमें मूँगे लगावै फिर यथाशक्ति पूजन करिके दक्षिणासहित ब्राह्मणके अर्थ अतिभक्तिसों दान करै ॥ ३२ ॥ अभीष्ट देवताको नाम लेके कि, अमुक देव मेरे ऊपर प्रसन्न होय वह मनुष्य दीर्घ आयु और आरोग्यको प्राप्त होय और सुन्दर रुपवान् पुत्र पौत्रनको प्राप्त होय है ॥ ३३ ॥ और अक्षय संततिको और कीर्तिको प्राप्त होके स्वर्गमें आनन्द करै है औरजो चातुर्मास्यमें फलनका त्याग करे है वह विष्णु

लोकमें पूजित होय है ॥३४॥ और व्रतकी समाप्तिमें उन फलनको चांदीके बनवाके ब्राह्मणनको दान करै सावनमें शाक न खाय और भादोंमें दही न खाय ॥ ३५ ॥ क्वारके महीनेमें दूधको और कार्तिकमें दालिको त्याग करै ये चारि बातें चारों आश्रमको नित्य हैं ॥३६॥ कि, प्रथम मास कहिये श्रावणमें मनुष्यनको शाकव्रत करचो चाहिये और दूसरे अर्थात् भादोंके महीनेमें उत्तम दधिको व्रत करने योग्य है ॥३७॥ और

समाप्तौ कलधौतानि तानि दद्याद्द्विजातये ॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ॥ ३५ ॥ दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ॥ चत्वार्येतानि नित्यानि चतुराश्रमवर्तिनाम् ॥ ३६ ॥ प्रथमे मासि कर्त्तव्यं नित्यं शाकव्रतं नरैः ॥ द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमम् ॥ ३७ ॥ पयोव्रतं तृतीये तु चतुर्थे द्विदलं तथा ॥ कूष्माण्डं राजमाषांश्च मूलकं गृञ्जनं तथा ॥ ३८ ॥ करमर्दं चेक्षुदण्डं चातुर्मास्ये त्यजेन्नरः ॥ मसूरं बहुबीजं च वृन्ताकं चैव वर्जयेत् ॥ ३९ ॥ नित्यान्येतानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः ॥ विशेषाद्बदरीं धात्रीमलाबुं चिञ्चिणीं त्यजेत् ॥ २४० ॥

तीसरे कहिये क्वारमें दूधको और चौथे कहिये कार्तिकमें दालिको व्रत करै अर्थात् इन चारों महीनेमें चारों वस्तु न खाय और कुम्हडा,माष, मूली गाजर इनकोहू न खाय ॥ ३८॥ और चातुर्मास्यमें मनुष्य करौंदा और ईख न खाय और मसूर तथा बहुत बीज जामें होयँ ऐसो फल और बैंगनको न खाय ॥ ३९ ॥ हे विप्रेंद्र ! पण्डितोंने ये नित्यव्रत कहे हैं और विशेष करिके बेर आँवले लौकी और अमिलीको त्याग करै ॥२४०॥

पुराने आमले तथा पुरानी अमिली वर्षाके चार महीनेताई भगवान् जनार्दनके सोनेके समय लेने योग्य हैं ॥ ४१ ॥ और बुद्धिमान् मनुष्य मंचान तथा खाटके सोवने को त्याग करै और बिना ऋतु समय स्त्रीगमन न करै और ऋतु समय जो गमन करै तो दोष नहीं है ॥ ४२ ॥ मधुवेलि और सहिजनेको नर चातुर्मासमें त्याग करै और बैंगन कलिंदा बेल गूलर तथा भिस्सटा अर्थात् शाकविशेषको त्याग करै ॥४३॥ ये जाके उदरमें जीर्ण

जीर्णं धात्रीफलं ग्राह्यं जीर्णा ग्राह्या च चिञ्चणी ॥ वार्षिकांश्चतुरो मासान्प्रसुप्ते च जनार्दने ॥ ४१ ॥ मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ॥ अनृतौ वर्जयेद्भार्यामृतौ गच्छन्न दुष्यति ॥ ४२ ॥ मधुवेलीं च शिग्रुं च चातुर्मास्ये त्यजेन्नरः ॥ वृन्ताकं च कलिंगं च बिल्वोदुम्बरभिस्सटाः ॥ ४३ ॥ उदरे यस्य जीर्यन्ते तस्य दूरतरो हरिः ॥ उपवासस्तथा नक्तमेकभक्तमयाचितम् ॥ ४४ ॥ अशक्तस्तु यथा कुर्यात्सायं प्रातरखंडितम् ॥ स्नानपूजादिसंयुक्तः स नरो हरिलोकभाक् ॥४५॥ गीतवाद्यकरो विष्णोर्गान्धर्वं लोकमाप्नुयात् ॥ मधुभुक्च भवेद्राजा पुरुषो गुडवर्जनात् ॥ ४६ ॥

होय हैं ताते अति दूर रहैं हैं उपवास तथा नक्तव्रत और एक भक्त तथा अयाचित ॥ ४४ ॥ जो इनके करनेको असमर्थ होय तो प्रातःकाल और संध्याको स्नान पूजन आदिको करै तो विष्णुलोकको प्राप्त होय ॥ ४५ ॥और जो विष्णुके आगे गावै बजावै है वह गंधर्वके लोकको प्राप्त होय हैं और मनुष्य गुडके छोडनेसों मीठेको खानहारो राजा होय है ॥ ४६ ॥

और पुत्र पौत्रनकी बढावनहारी संततीको प्राप्त होय है हे राजन् ! तैलके छोडनेसों सुन्दर है अंग जाको ऐसो हो जाय है॥४७॥ कसुमको तैल छोडनेसों शत्रु नाशको प्राप्त होय हैं और महुआके तेलके त्यागसों सौभाग्यके फलको प्राप्त होय है ॥ ४८ ॥ कटु, तिक्त, मधुर, कषाय लवण इन रसनके त्यागसों विरूपता और दुर्गंधको कबहूं नहीं प्राप्त होय ॥ ४९ ॥ और पुष्प आदि भोगनके त्यागसों स्वर्गलोकमें विद्याधर होय

लभेच्चसंततिं दीर्घां पुत्रपौत्रादिवर्धिनीम् ॥ तैलस्य वर्जनाद्राजन्सुन्दरांगः प्रजायते ॥ ४७ ॥ कौसुम्भतैलसन्त्यागाच्छत्रुनाशमवाप्नुयात् ॥ मधूकतैलत्यागाच्च सुसौभाग्यफलं लभेत् ॥ ४८ ॥ कटु तिक्तं च मधुरं कषायलवणात्रसान् ॥ वर्जयेत् स च वैरूप्यं दौर्गंध्यं नाप्नुयात्सदा ॥ ४९ ॥ पुष्पादिभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदवीमियात् ॥ ५० ॥ ताम्बूलवर्जनाद्रोगी सद्यो मुक्तामयो भवेत् ॥ पादाभ्यंगपरित्यागाच्छिरोभ्यंगस्य पार्थिव ॥ ५१ ॥ दीप्तिमान् दीप्तकरणो यक्षद्रव्यपतिर्भवेत् ॥ दधिदुग्धपरित्यागी गोलोकं लभते नरः ॥ ५२ ॥ इह लोकमवाप्नोति स्थालीपाकविवर्जनात् ॥एकान्तरोपवासेन ब्रह्मलोके महीयते ॥ ५३ ॥

और जो योगाभ्यासी होय वह ब्रह्मपदवीको प्राप्त होय ॥५०॥ और तांबूलको छोड़नेसों रोगी शीघ्रही रोगरहित हो जाय । हे राजन् ! पांयनमें और शिरमें तेल लगानेके छोडनेसों ॥५१॥ दीप्तिमान् और दीप्त इंद्रियहारो यक्ष द्रव्यपति होय है और दही दूधका त्याग करनहारो मनुष्य गोलोकको प्राप्त होय हैं ॥५२॥ स्थालीपाकके त्यागसों या लोकमें सुख पावै है और एक दिन बीचमें देके व्रत करनहारो मनुष्य ब्रह्मलोकमें आनंद

करै है ॥ ५३ ॥ वर्षाके चार महीनेके जो नख और बालनको धारण करै हैं वह नर कल्पस्थाही होय यामें संदेह नहीं है ॥ ५४ ॥ और जो "नमो नारायणाय" या मंत्रको चार महीने जपै है ताको अनन्तफल मिलै है और विष्णुके चरणकमलोंके स्पर्शसों मनुष्य कृतार्थ हो जाय है॥५५॥ और जो हरिके मंदिरमें एक लाख प्रदक्षिणा करै वह हंसयुक्त विमानमें स्थित होके विष्णुपुरमें जाय है ॥ ५६ ॥ तीनि रात्रि पर्यंत भोजनके

चतुरो वार्षिकान्मासान् नखरोमाणि धारयेत् ॥ कल्पस्थायी भवेद्राजन्स नरो नात्र संशयः ॥ ९४ ॥ नमो नारायणायेति जपित्वाऽनन्तकं फलम् ॥ विष्णुपादांबुजस्पर्शात्कृतकृत्यो भवेन्नरः ॥ ९५ ॥ लक्षप्रदक्षिणा यस्तु करोति हरिमंदिरे ॥ हंसयुक्तविमानेन स याति वैष्णवीं पुरीम् ॥ ९६ ॥ त्रिरात्रभोजनत्यागान्मोदते दिवि देववत ॥ परान्नवर्जनाद्राजन्देवो वै मानुषो भवेत ॥ ९७ ॥ प्राजापत्यं चरेद्यो वै चातुर्मास्यव्रतान्नरः ॥ मुच्यते पातकैः सर्वैस्त्रिविधैर्नात्र संशयः ॥ ९८ ॥ तप्तकृच्छ्रातिकृच्छ्राभ्यां यः क्षिपेच्छयनं हरेः ॥ स याति परमं स्थानं पुनरावृत्तिवर्जितम् ॥ ९९ ॥ चान्द्रायणेन यो राजन् क्षिपेन्मासचतुष्टयम् ॥ दिव्यदेहो भवेत्सोऽथ शिवलोकं च गच्छति ॥ २६० ॥

त्यागसों स्वर्गमें देवतानके समान आनंद करै है और हे राजन् ! पराये अन्नके त्यागसों मनुष्य देवता हो जाय है ॥५७॥ जो चार महीने हे राजन् ! प्राजापत्य व्रतको चातुर्मास्य करै वह कायिक वाचिक मानसिक तीनों प्रकारके पापनते छूटिजाय हैं यामें संदेह नहीं है ॥५८॥ और जो तप्तकृच्छ्र और अतिकृच्छ्र करिके हरिके शयनको व्यतित करै हैवह पुनरावृति करिकेवर्जित परम स्थानको प्राप्त होय है ॥५९॥ हे राजन् !

जो चांद्रायण व्रत करिके चारि महीने व्यतीत करै हैं वह दिव्य देह होके शिवलोकको जाय है ॥ २६० ॥ जो मनुष्य चातुर्मास्यमें अन्न आदिको भोजन छोड देय है वह हरिकी सायुज्यताको प्राप्त होय है फिरी या लोकमें जन्म नहीं लेय है ॥६१॥ जो चातुर्मास्यमें भिक्षा मांगिके भोजन करै वह वेदको पारगामी होय है हे राजन् ! जो मनुष्य पयोव्रत करिके चारि महीनाको व्यतीत करै है ॥६२॥ ताके वंशको कभी नाश नहीं होय है

चातुर्मास्ये नरो यो वै त्यजेदन्नादिभक्षणम् ॥ स गच्छेद्धरिसायुज्यं न भूयस्तु प्रजायते ॥ ६१ ॥ भिक्षाभोजी नरो यो हि स भवेद्वेदपारगः ॥ पयोव्रतेन यो राजन् क्षिपेन्मासचतुष्टयम् ॥ ६२ ॥ तस्य वंशसमुच्छेदः कदाचिन्नोपपद्यते ॥ पञ्चगव्याशनः पार्थ चान्द्रायणफलं लभेत ॥ ६३ ॥ दिनत्रयं जलत्यागान्न रोगैरभिभूयते ॥ एवमादिव्रतैः पार्थ तुष्टिमायाति केशवः ॥ ६४ ॥ दुग्धाब्धिवीचिशयने भगवाननंतो यस्मिन्दिने स्वपिति चाथ विबुध्यते च ॥ तस्मिन्ननन्यमनसामुपवासभाजां पुंसां ददाति च गतिं गरुडासनोऽसौ ॥ २६५ ॥ इति श्रीभविष्योत्तरपुराणे विष्णोः शयन्येकादशीचातुर्मास्यमाहात्म्यं सम्पूर्णम् ॥ १६ ॥

और जो पंचगव्यको भोजन करै हैं हे युधिष्ठिर ! वह चांद्रायण व्रतके फलको प्राप्त होय हैं ॥६३॥ और तीन दिन ताईं जलके त्यागसों रोगन करिके नहीं दबायो जाय हैं हे युधिष्ठिर ! इत्यादि व्रतन करिके केशव भगवान् संतुष्ट होय हैं ॥६४॥ दूधके समुद्रकी लहरीमें जादिन भगवान् सोवै हैं और जा दिन जागै हैं वा दिन अनन्य मन होके व्रत करनहारे मनुष्यनको गरुडासन भगवान् गतिको देय हैं ॥ २६५ ॥ इति श्रीमत्पण्डितपरमसुखतनयपण्डितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायामाषाढशुक्लैकादशीदेवशयनीकथा समाप्ता ॥ १६ ॥

अथ श्रावणकृष्णैकादशीकामिकाकथा ॥ नभस्यकृष्णपक्षे या कामिकैकादशी भवेत् ॥ तन्माहात्म्यस्य भाषायां विवृतिं सन्तनोम्यहम् ॥ १ ॥
युधिष्ठिर बोले–कि, आषाढके शुक्लपक्षमें जो देवशयन व्रत होय है सो मैंने पहिले पुराणमें बहुत विस्तारसहित सुनो है ॥ १ ॥ श्रावणमासके कृष्णपक्षमें कौनसे नामकी एकादशी होय है हे वासुदेव ! हे गोविन्द ! यह कहिये आपके लिये नमस्कार हैं ॥२॥ श्रीकृष्ण बोले–कि, हे राजन् !

अथ श्रावणकृष्णैकादशीकथा ॥ युधिष्ठिर उवाच ॥ आषाढशुक्लपक्षे तु यद्देवशयनव्रतम् ॥ तन्मया श्रुतपूर्वं हि पुराणे बहुविस्तरम् ॥ १ ॥ श्रावणे कृष्णपक्षे तु किंनामैकादशी भवेत् ॥ एतत्कथय गोविन्द वासुदेव नमोऽस्तु ते ॥ २ ॥ श्रीकृष्ण उवाच ॥शृणु राजन्प्रवक्ष्यामि व्रतं पापप्रणाशनम् ॥ नारदाय पुरा राजन्पृच्छते च पितामहः ॥ ३ ॥ परं यदुक्तवांस्तात तदहं ते वदामि च ॥ नारद उवाच ॥ भगवञ्छ्रोतुमिच्छामि त्वत्तोऽहं कमलासन ॥ ४ ॥ श्रावणस्यासिते पक्षे किंनामैकादशी भवेत् ॥ को देवः को विधिस्तस्याः किं पुण्यं कथय प्रभो ॥ ५ ॥

सुनो पापनको नाश करनहारे व्रत मैं कहौं हौं जो व्रत पहले जो पुछनहारो नारद मुनि हैं तिनके अर्थ पितामहने ॥३॥ जो उत्कृष्ट कथन कियो है हे तात ! सो मैं तुमसों कहौं हौं । नारद बोले–कि, हे भगवन् ! हे कमलासन ! तुमसो मैं सुनो चाहौं हौं ॥४॥ कि श्रावणके कृष्णपक्षकी एकादशीको कहा नाम है और वाको देवता कौन हैं और वाकी विधि कहा हैं और पुण्य कहा है हे प्रभो ! सो हमसों कहो ॥ ५ ॥

ब्रह्मा बोले–कि, हे नारद ! लोकनके हितकी कामनासों मैं तुमसों कहौं हौं तुम सुनों कि, श्रावणके कृष्णपक्षकी एकादशीकोकामिका नाम है॥६॥ ताके श्रवणमात्रहीसों वाजपेय यज्ञको फल मिलै है और वा एकादशीके दिन जो शंख चक्र और गदा धारण करनहारे देवको पूजन करै ॥७॥ श्रीधर है नाम जिनको ऐसे जे हरि विष्णु माधव मधुसूदन हैं तिनको जो पूजन और ध्यान करै है ताके पुण्यका फल सुनो॥८॥जो फल विष्णुके

ब्रह्मोवाच ॥ शृणु नारद ते वच्मि लोकानां हितकाम्यया ॥ श्रावणैकादशी कृष्णा कामिकेति च नामतः ॥ ६ ॥ तस्याः श्रवणमात्रेण वाजपेयफलं लभेत् ॥ तस्यां तु पूजयेद्देवं शंखचक्रगदाधरम् ॥ ७ ॥ श्रीधराख्यं हरिं विष्णुं माधवं मधुसूदनम् ॥ यजते ध्यायते यो वै तस्य पुण्यफलं शृणु ॥८॥ न गङ्गायां न काश्यां वै नैमिषे न च पुष्करे ॥ तत्फलं समवाप्नोति यत्फलं विष्णुपूजनात् ॥ ९ ॥ केदारे च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥ न तत्फलमवाप्नोति यत्फलं कृष्णपूजनात् ॥१०॥ ससागरवनोपेतां यो ददाति वसुन्धराम् ॥ गोदावर्यां गुरौ सिंहे व्यतीपाते च गण्डके ॥११॥ न तत्फलमवाप्नोति यत्फलं कृष्णपूजनात् ॥ कामिकाव्रतकारी च ह्युभौ समफलौ स्मृतौ ॥ १२ ॥

पूजनसों प्राप्त होय है वह न गंगामें न काशीमें न नैमिषारण्यमें न पुष्ककरमें प्राप्त होय है ॥९॥ केदारक्षेत्रमें और कुरुक्षेत्रमें सूर्यग्रहणके समय वहफल नहीं मिलै है जो फल कृष्णके पूजनसों प्राप्त होय है ॥१०॥ समुद्र और वन करिके युक्त भूमिको जो दान करै है और सिंहके बृहस्पतिमें गोदावरीमें और व्यतीपातमें गण्डकी नदीके स्नानसों वह फल नहीं मिलै है ॥ ११ ॥ जो कृष्णके पूजनसों प्राप्त होय है वह फल और कामिका एकादशी

व्रत करनहारेको फल समानहैं ॥ १२ ॥ ब्याई भई गौ जो सामग्री समेत दान करै है। वह जो फलको प्राप्त होय है वाही फलको एकादशीके व्रतकोकरनहारो नर प्राप्त होय है ॥१३॥ जो उत्तमनर श्रावणमें श्रीधर देव भगवान्‌को पूजन करै है वा करिके देवतागंधर्व उरगऔर पन्नग ये सब पूजे गये ॥ १४ ॥ ताते सब यत्नसों कामिका एकादशीके दिन पापनसों डरे भये मनुष्य करिके यथाशक्ति हरिको पूजन करना योग्य है ॥१५॥

प्रसूयमानां यो धेनुं दद्यात् सोपस्करां नरः ॥ तत्फलं समवाप्नोति कामिकाव्रतकारकः ॥ १३ ॥ श्रावणे श्रीधरं देवं पूजयेद्यो नरोत्तमः ॥ तेनैव पूजिता देवा गन्धर्वोरगपन्नगाः ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन कामिकादिवसे हरिः ॥ पूजनीयो यथाशक्ति मनुष्यैः पापभीरुभिः ॥ १५ ॥ संसारार्णवमग्ना ये पापपङ्कसमाकुलाः ॥ तेषामुद्धरणार्थाय कामिकाव्रतमुत्तमम् ॥ १६ ॥ नातः परतरा काचित्पवित्रा पापहारिणी ॥ एवं नारद जानीहि स्वयमाह पुराः हरिः ॥ १७ ॥ अध्यात्मविद्यानिरतैर्यत्फलं प्राप्यते नरैः ॥ ततो बहुतरं विद्धि कामिकाव्रतसेवनात् ॥ १८ ॥ रात्रौ जागरणं कुर्यात्कामिकाव्रतकृन्नरः ॥ न पश्यति यमं रौद्रं नैव पश्यति दुर्गतिम् ॥ १९ ॥

जो संसाररूपी समुद्रमें डूबे भये और पापरूपी कीचसों व्याकुल मनुष्य हैं तिनके उद्धारके लिये कामिकाको व्रत उत्तम है ॥१६॥ याते परे पवित्र और कोई पापकी नाश करन हारी नहीं । हे नारद! ऐसो जानो यह भगवान्‌ने पहले आप कही है ॥१७॥ अध्यात्मविद्यामें लगे म ष्यनको जो फल मिलै है ताते बहुत अधिक कमिका एकादशीके व्रत करनहारेको जानो ॥१८॥ कामिकाको व्रत करनहारो जो मनुष्य रात्रिमें जागरण

करै है वह भयानक यमको और उसकी दुर्गतिको नहीं देखे है ॥१९॥ और कामिकाके व्रतके सेवनसों बुरी योनिको नहीं देखे है कामिकाहीके व्रत करिके योगी कैवल्यमुक्तिको प्राप्त भये हैं ॥२०॥ तुलसीते उत्पन्न पत्रन करिके जो मनुष्य हरिको पूजन करै है निश्चय करिके वह पापनसों ऐसे लिप्त नही होय है जैसे जल करिके कमलको पत्र लिप्त नहीं होय है ॥२१॥ एक भार सुवर्णताते चौगुनी चांदीको दान करिकेजे फलको प्राप्त

न पश्यति कुयोनिं च कामिकाव्रतसेवनात् ॥ कामिकाया व्रतेनैव कैवल्यं योगिनो गताः ॥ सर्वैः सर्वप्रयत्नेन कर्तव्या नियतात्मभिः ॥ २० ॥ तुलसीप्रभवैः पत्रैर्यो नरः पूजयेद्धरिम् ॥ न वै स लिप्यते पापैः पद्मपत्रमिवांभसा ॥ २१ ॥ सुवर्ण भारमेकं तु रजतं च चतुर्गुणम् ॥ दत्त्वा यत्फलमाप्नोति तत्फलं तुलसीदले ॥ २२ ॥ रत्नमौक्तिकवैडूर्यप्रवालादिभिरर्चितः ॥ न तुष्यति तथा विष्णुस्तुलसीपूजनाद्यथा ॥ २३ ॥ तुलसीमञ्जरीभिस्तु पूजितो येन केशवः ॥ आजन्मकृतपापस्य तेन सम्मार्जिता लिपिः ॥ २४ ॥ या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुः पावनी रोगाणामभिवन्दिता निरशनी सिक्ताऽन्तकत्रासिनी ॥ प्रत्यासन्नविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥ २५ ॥

है ता फलको तुलसीदलमें प्राप्त होय है ॥२२॥ रत्न मोती वैडूर्य मणि और मूंगा आदिसों पूजन किये गये भगवान् ऐसे प्रसन्न नहीं होय हैं जैसे कि तुलसीदलके पूजनसों प्रसन्न होय हैं ॥२३॥ जा मनुष्यने तुलसीके मञ्जरीनसों केशव भगवान्को पूजन कियो वाने जन्मते करे भये पापनको लेख मेटि दियो ॥२४॥ जो दर्शनसों संपूर्ण पापनके समूहको शांतिकरि देती है और स्पर्श करनेसों शरीरको पवित्र करदेतीहै और नमस्कार करनेसे रोगनको

दूरिकरदेती है और सींचनेसों यमको त्रास दूरकर देती है और लगानेसों भगवान्‌की निकटताको करती है और उनके चरणनमें चढानेसोंजो मुक्तिको देती है वा तुलसीके अर्थ नमस्कार है॥२५॥जोमनुष्य हरिके दिनमें रात्रिदिन दीपक करै है वाके पुण्यकी संख्याको चित्रगुप्त हू नहीं जानै है॥२६॥ एकादशीके दिन कृष्णके आगेजाको दीपदान जलैहै स्वर्गमेंस्थित ताके पितर अमृतसों तृप्त होय है॥२७॥ घृतसों वा तिलके तेलसों दीपकप्रज्वलित करिके मनुष्य सैंकडों करोड़ों दीपको करिके युक्त हो सूर्यके लोकमें जाय है॥२८॥मैंने तुम्हारे आगे इसकी महिमा कही यातें सब पापनकी हरनेवाली

दीपं ददाति यो मर्त्यो दिवारात्रौ हरेर्दिने तस्य पुण्यस्य संख्यानं चित्रगुप्तोऽपि वेत्ति न ॥ २६ ॥ कृष्णाग्रे दीपिको यस्तु ज्वले देकादशीदिने ॥ पितरस्तस्य तृप्यंति अमृतेन दिवि स्थिताः ॥२७॥घृतेन दीपं प्रज्वाल्य तिलतैलेन वा पुनः॥प्रयाति सूर्यलोकेऽसौ दीपकोटिशतैर्वृतः ॥२८॥ अयं तवाग्रे कथितः कामिकामहिमा मया ॥ अतो नरैः प्रकर्तव्या सर्वपातकहारिणी ॥ २९ ॥ ब्रह्महत्याऽपहरणी भ्रूणहत्याविनाशिनी॥त्रिदिवस्थानदात्री च महापुण्यफलप्रदा ॥३०॥ श्रुतं माहात्म्यमेतस्या नरः श्रद्धासमन्वितः॥विष्णुलोकमवाप्नोति सर्वपापैः प्रमुच्यते ॥ ३१ ॥ इति श्रीब्रह्मवैवर्तपुराणे श्रावणकृष्णैकादशीकामिकामाहात्म्यं समाप्तम् ॥ १७ ॥

यह एकादशी मनुष्यनको करनो योग्य है॥२९॥यह ब्रह्महत्याकी हरनेवाली और भ्रूणहत्याकी नाश करनेवाली है और महापुण्यफलकी देनेहारी यह स्वर्गमें स्थान देती है॥३०॥मनुष्य श्रद्धासमेत याकोमाहात्म्य सुनिके विष्णुलोकको प्राप्त होय है और सब पापनसों छूटि जाय है॥३१॥इति श्रीमत्पंडितपरमसुखतनयपण्डितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभा०टी०दीपिकासमाख्यायां श्रावणकृष्णैकादशीकामिकाकथा समाप्ता॥१७

अथ श्रावणशुक्लैकादशी पुत्रदा कथा ॥ श्रावणस्यासिते पक्षे पुत्रदैकादशी स्मृता ॥ तन्माहात्म्यस्य भाषायां दीपिकां संतनोम्यहम् ॥१॥ युधिष्ठिर बोले—कि, श्रावणके शुक्लपक्षमें जो एकादशी होय है वाको कहा नाम है हे मधुसूदन ! सो प्रसन्नतासों मेरे आगे कहिये ॥१॥ श्रीकृष्ण बोले कि, हे राजन् ! पापनकी हरनेवाली या कथाको मैं कहौं हौं तुम सावधान होके सुनो जाके श्रवणमात्रहीसों वाजपेययज्ञको फल प्राप्त होय है ॥ २ ॥

अथ श्रावणशुक्लैकादशीकथा ॥ युधिष्ठिर उवाच ॥ श्रावणस्य सिते पक्षे किंनामैकादशी भवेत् ॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन ॥ १ ॥ श्रीकृष्ण उवाच ॥ शृणुष्वावहितो राजन् कथां पापहरां पराम् ॥ यस्याः श्रवणमात्रेण वाजपेयफलं लभेत् ॥२॥ द्वापरस्य युगस्यादौ पुरा माहिष्मतीपुरे ॥ राजा महीजिदाख्यातो राज्यं पालयति स्वयम् ॥ ३ ॥ पुत्रहीनस्य तस्यैव न तद्राज्यं सुखप्रदम् ॥ अपुत्रस्य सुखं नास्ति इह लोके परत्र च ॥४॥ यततोऽस्य सुतप्राप्तौ कालो बहुतरो गतः ॥ न प्राप्तश्च सुतो राज्ञा सर्वसौख्यप्रदो नृणाम् ॥ ५ ॥ दृष्ट्वाऽऽत्मानं प्रवयसं राजा चिन्तापरोऽभवत ॥ सदोगतः प्रजामध्य इदं वचनमब्रवीत् ॥ ६ ॥

द्वापरयुगके आदिमें पहिले माहिष्मती पुरमें महीजित् नामसों प्रसिद्धराजा आप राज्यकरै हो॥३॥ पुत्रहीन उस राजाको वह राज्यसुखकारीनहीं हो काहेसों कि, पुत्ररहित मनुष्यकूं या लोकमें तथा परलोकमें सुख नहीं है ॥४॥ पुत्रकी प्राप्तिमें यत्न करते भये या राजाको बहुतरों काल बीति गये परन्तु मनुष्यनको सम्पूर्ण सुख देनहारो पुत्र वा राजाने नहीं पायो ॥५॥ और अपनी अधिक अवस्था देखिकै राजा चिन्तामें तत्पर होत

भयो और सभामें बैठि प्रजानके मध्यमें यह वचन बोलत भयो॥६॥कि,हे लोगो ! या जन्ममें तो मैंने पापनको न कियो है और न मैंने अन्यायसों उपार्जित धन भंडारमें डारो है ॥ ७ ॥ और न मैंने कबहूं ब्राह्मणको तथा देवतानको धन ग्रहण कियो है बहुतसे पापकी देनहारी काहूकी धरोहरिहू नहीं दबाई ॥८॥और पुत्रकी भांति प्रजानको पालन कियो है तथा धर्मसों पृथिवी जीतिहै और भाई वापुत्रके समानहू दुष्ट मनुष्यनको

इह जन्मनि भो लोका न मया पातकं कृतम् ॥ अन्यायोपार्जितं वित्तं क्षिप्तं कोशे मया न हि ॥ ७ ॥ ब्रह्मस्वं देवद्रविणं न गृहीतं मया क्वचित् ॥ न्यासापहारो न कृतः परस्य बहुपापदः ॥ ८ ॥ सुतवत्पालिता लोका धर्मेण विजिता मही ॥ दुष्टेषु पातितो दण्डो बन्धुपुत्रोपमेष्वपि ॥ शिष्टाः सुपूजिता लोका द्वेष्याश्चापि महाजनाः ॥ ९ ॥ इत्येवं व्रजतो मार्गे धर्मयुक्ते द्विजोत्तमाः ॥ कस्मान्मम गृहे पुत्रो न जातस्तद्विचार्यताम् ॥ १० ॥ इति वाक्यं द्विजाः श्रुत्वा सप्रजाः सपुरोहिताः ॥ मंत्रयित्वा नृपहितं जग्मुस्ते गहनं वनम् ॥ ११ ॥ इतस्ततश्च पश्यन्तश्चाश्रमानृषिसेवितान् ॥ नृपतेर्हितमिच्छन्तो ददृशु र्मुनिसत्तमम् ॥ १२ ॥

दण्ड दियो है और द्वेष करने योग्य हूं शिष्ट मनुष्यको मैंने सत्कार किया है ॥९॥ हे श्रेष्ठब्राह्मणो ! या प्रकार धर्मयुक्त मार्गमें चलतो जो मैं हौं ताके घरमें पुत्र काहेते नहीं भयो है सो विचार करिके ॥१०॥ प्रजा और पुरोहितन सहित सब ब्राह्मण राजाको यह वचन सुनिकै राजाके हितकी सलाह करिके वे ब्राह्मण घने वनको जात भये ॥ ११ ॥ राजाके हितकी इच्छासों जहां ऋषिन करि सेवित आश्रमनको देखते २ अतिश्रेष्ठ

मुनिको देखत भये ॥ १२ ॥ घोर तपको करिरहे हैं चिदानन्दरूप और निरामय हैं और जितात्मा हैं जितक्रोध हैं और सनावन हैं ॥ १३ ॥ धर्मतत्त्वके ज्ञाता और सब शास्त्रनमें प्रवीण और बडी हैं आयु जिनकी अनेक ब्रह्मके तुल्य ऐसे महात्मा लोमशऋषिको देखत भये ॥१४॥ कल्पके बीतनेपै जिनको एक रोम उखड़ हैं याते उनको लोमश नाम है वे महामुनि त्रिकालके ज्ञाता हैं ॥ १५ ॥ उनको देखि सब प्रसन्न होके उनके

तप्यमानं तपो घोरं चिदानन्दं निरामयम् ॥ निराहारं जितात्मानं जितक्रोधं सनातनम् ॥ १३ ॥ लोमशं धर्मतत्त्वज्ञं सर्वशास्त्रविशारदम् ॥ दीर्घायुषं महात्मानमनेकब्रह्मसम्मितम् ॥ १४ ॥ कल्पे गते यस्य एकमेकं लोम विशीर्यते ॥ अतो लोमशनामानं त्रिकालज्ञं महामुनिम् ॥ १५ ॥ तं दृष्ट्वा हर्षिताः सर्वे ह्याजग्मुस्तस्य सन्निधिम् ॥ यथान्यायं यथार्हं ते नमश्चक्रुर्यथोदितम् ॥ १६ ॥ विनयाऽवनताः सर्वे ऊचुश्चैव परस्परम् ॥ अस्मद्भाग्यवशादेव प्राप्तोऽयं मुनिसत्तमः ॥ १७ ॥ तांस्तथा प्रणतान्दृष्ट्वा ह्युवाच मुनिसत्तमः ॥ लोमश उवाच ॥ किमर्थमिह संप्राप्ताः कथयध्वं सकारणम् ॥ १८ ॥ मद्दर्शनाह्लादगिरः स्तुवन्त इव मां किमु ॥ असंशयं करिष्यामि भवतां यद्धितं भवेत् ॥ १९ ॥

समीप जात भये यथान्याय और यथायोग्य वे सब उनको नमस्कार करत भये॥१६॥और विनयसों नम्र होके वे सब आपसमें बोलत भये कि,हमारे ही सबके भाग्यके वशसों ये मुनिसत्तम मिले हैं ॥ १७ ॥ उन सबको या प्रकार प्रणत देखिके वे मुनिश्रेष्ठ बोलत भये । लोमश बोले—कि,तुमसब यहां काहेको आये हो सो कारण समेत कहो ॥१८॥ मेरे दर्शनसों आनंदयुक्त वाणीनसे मेरी स्तुतिहीसी करिरहे हो याते जामें तुम्हारा हित होय

सो मैं अवश्य करौंगो॥ १९॥ हम सरीखे मनुष्यनको जन्म परोपकारहीके लिये हैं यामें संदेह नहीं है.जन बोले–कि, सुनिये हम अपने आवनेको कारण कहैंगे॥२०॥संदेहके दूर करनेके लिये हम आपके समीप आये हैं ब्रह्माते परतर तुमते श्रेष्ठ और कोई नहीं है॥२१॥याहि कारणते कार्यके वशसों हम सब आपके समीप आये हैं कि, यह महीजित नाम राजा या समय पुत्र करिके रहित है ॥२२॥ हे ब्रह्मन्!हम वाकी प्रजा हैं वा करिके

परोपकृतये जन्म मादृशानां न संशयः ॥ जना ऊचुः ॥ श्रूयतामभिधास्यामो वयमागमकारणम् ॥ २० ॥ संशयच्छेदनार्थाय तव सन्निधिमागताः ॥ पद्मयोनेः परतरस्त्वत्तः श्रेष्ठो न विद्यते ॥ २१ ॥ अतः कार्यवशात्प्राप्ताः समीपं भवतो वयम् ॥ महीजिन्नाम राजाऽसौ पुत्रहीनोऽस्ति सांप्रतम् ॥ २२ ॥ वयं तस्य प्रजा ब्रह्मन्पुत्रवत्तेन पालिताः ॥ तं पुत्ररहितं दृष्ट्वा तस्य दुखेन दुखिनः ॥ २३ ॥ तपः कर्तुमिहायाता मतिं कृत्वा तु नैष्ठिकीम् ॥ तस्य भाग्यवशाद्दृष्टस्त्वमस्माभिर्द्विजोत्तम ॥ २४ ॥ महतां दर्शनेनैव कार्यसिद्धिर्भवेन्नृणाम् ॥ उपदेशं वद मुने राज्ञः पुत्रो यथा भवेत् ॥ २५ ॥ इति तेषां वचः श्रुत्वा मुहूर्तं ध्यानमास्थितः ॥ प्रत्युवाच मुनिर्ज्ञात्वा तस्य जन्म पुरातनम् ॥ २६ ॥

पुत्रके समान पालन किये हैं वाही पुत्ररहित देखि वाके दुःखी हैं ॥ २३ ॥ नैष्ठिकी मति करिके यहां तप करनेको आये हैं हे द्विजोत्तम ! वा राजाके भाग्यसों आपके दर्शन हमको भये हैं ॥ २४ ॥बडोंके दर्शनहीसे मनुष्यकी कार्यसिद्धि होती है हे मुने ! ऐसो उपदेश कीजिये जाते वाके पुत्र होय ॥ २५ ॥ उनको यह वचन सुनिके मुनि क्षणभर ध्यानमें स्थित होते भये और वा राजाके पहलो जन्म जानिके बोलत भयो॥२६॥

लोमश बोले–कि यह राजा पूर्वजन्ममें धन करिके हीन क्रूर कर्म करनहारो वैश्य हो और एक ग्रामते दूसरे ग्राममें जाके व्यापारमें लगो रहतो हो ॥२७॥ एक समय ज्येष्ठ महीनेके शुक्लपक्षमें द्वादशीके दिन मध्याह्नमें सूर्यके प्राप्त होनेके समय ग्रामकी सीमामें जलाशय हो ॥ २८ ॥ जल समेत कूपिकाको देखि जलके पीवनकी इच्छा करत भयो वा समय हालकी व्याई भई गौ बछरा समेत वहीं आवत भई ॥२९॥ प्यारसों घबराई

लोमश उवाच ॥ पूर्वजन्मनि वैश्योऽयं धनहीनो नृशंसकृत् ॥ वाणिज्यकर्मनिरतो ग्रामद्ग्रामान्तरं भृशम् ॥ २७ ॥ ज्येष्ठमासे सिते पक्षे द्वादशीदिवसे तथा ॥ मध्याह्ने द्युमणौ प्राप्ते ग्रामसीम्नि जलाशयम् ॥ २८ ॥ कूपिकां सजलां दृष्ट्वा जलपाने मनो दधौ ॥ सद्यः सूता सवत्सा च धेनुस्तत्र समागता ॥ २९ ॥ तृषातुरा निदाघार्ता तस्यासम्बु पपौ तु सा ॥ पिबन्तीं वारयित्वा तामसौ तोयं स्वयं पपौ ॥ ३० ॥ कर्मणस्तस्य पापेन स पुत्ररहितो नृपः ॥ पूर्वजन्मकृतात्पुण्यात्प्राप्तं राज्यमकंटकम् ॥ ३१ ॥ जनाः ऊचुः ॥ पुण्यात्पापं क्षयं याति पुराणे श्रूयते मुने ॥ पुण्योपदेशं कथय येन पापक्षयो भवेत् ॥ ३२ ॥ यथा भवत्प्रसादेन पुत्रोऽस्य भविता तथा ॥ लोमश उवाच ॥ श्रावणे शुक्लपक्षे तु पुत्रदा नाम विश्रुता ॥ ३३ ॥

भई घामसों दुःखी वह गौ वामें जल पीवती भई तब वह वैश्य पीवती भई वा गौको हटायके जलको आप पीवत भयो ॥३०॥ वाकर्मके पापसों वह पुत्ररहित राजा भयो पूर्वजन्ममें करे भयो पुण्यसों वाने अकंटक राज्य पायो ॥३१॥ जन बोले–कि, हे मुने ! पुण्यसों पापको क्षय होय है यह पुराणनमें सुनो जाय है ताते आप पुण्यको उपदेश करिये जाते पापको क्षय होय ॥३२॥ जैसे आजके प्रसादसों याके पुत्र हो सो कहिये लोमश

बोले—कि. श्रावणके शुक्लपक्षमें पुत्रदा नामसों प्रसिद्ध ॥ ३३ ॥ एकादशी तिथि होय है हे जनो ! तुम सब यथाविधि न्यायसों जागरण समेत वाको व्रत करो ॥ ३४ ॥ और वाको विमल फल राजाको देउ ऐसे करनेसे निश्चय करिके राजाके पुत्र होयगो ॥ ३५ ॥ यह लोमशऋषिको वचन सुनिके आनंदसों प्रफुल्लित हैं नेत्र जिनके ऐसे वे सब अपने घरको जात भये ॥ ३६ ॥ और श्रावणको प्राप्त हो लोमश ऋषिके वचनको

एकादशी तिथिश्चास्ति कुरुध्वं तद्व्रतं जनाः ॥ यथाविधि यथान्यायं यथोक्तं जागरान्वितम् ॥ ३४ ॥ तस्याः पुण्यं सुविमलं ददतां नृपतेर्जनाः ॥ एवं कृते सुनियतं राज्ञः पुत्रो भविष्यति ॥ ३५ ॥ श्रुत्वैतल्लोमशवचस्तं प्रणम्य द्विजोत्तमम् ॥ प्रजग्मुः स्वगृहान्सर्वे हर्षोत्फुल्लविलोचनाः ॥३६ ॥ श्रवणं तु समासाद्य स्मृत्वा लोमशभाषितम्॥राज्ञा सह व्रतं चक्रुः सर्वे श्रद्धासमन्विताः ॥ ३७ ॥ द्वादशीदिवसे पुण्य ददुर्नृपतये जनाः ॥ दत्ते पुण्ये यथा राज्ञी गर्भमाधत शोभनम् ॥ ३८ ॥ प्राप्ते प्रसवकाले सा सुषुवे पुत्रमूर्जितम् ॥ एवमेषा नृपश्रेष्ठ पुत्रदा नाम विश्रुता ॥ ३९ ॥ कर्तव्या सुखमिच्छद्भिरिह लोके परत्र च ॥ ४० ॥

स्मरण करिके सब श्रद्धासमेत राजा सहित व्रतको करत भये॥३७॥ और वे जन द्वादशीके दिन वह पुण्य राजाको दे देत भये पुण्यके देनेपै वह रानी सुन्दर गर्भको धारण करत भई ॥ ३८ ॥ और प्रसवकालके आवनेपै तेजस्वी पुत्रको उत्पन्न करत भई हे राजनमें श्रेष्ठ ! या प्रकार वह पुत्रदा नामसों विख्यात भई ॥ ३९ ॥ या लोकमें और परलोककी सुखकी इच्छा करनहारे मनुष्यनको यह व्रत करनो उचित है ॥ ४० ॥

याको माहात्म्य सुनिके मनुष्य सब पापनते छूटि जाय है और या लोकमें पुत्रके सुखको प्राप्त हो परलोकमें स्वर्गकी गतिको प्राप्त होय हैं॥ ४१॥ इति श्रीमत्पण्डितपरमसुखतनयपण्डितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायां श्रावणशुक्लैकादशीपुत्रदाकथा सम्पूर्णा॥ १८॥ अथ भाद्रपदकृष्णैकादश्यजाकथा॥ "भाद्रस्य कृष्णपक्षे या अजाख्यैकादशी स्मृता।।तन्माहात्म्यस्य भाषायां टीकां कुर्वे प्रदीपिकाम्॥ १॥"

श्रुत्वा माहात्म्यमेतस्याः सर्वपापैः प्रमुच्यते ॥ इह पुत्रसुखं प्राप्य परत्र स्वर्गतिर्भवेत् ॥ ४१ ॥ इति श्रीभविष्योत्तरपुराणे श्रावणशुक्लैकादशीपुत्रदामाहात्म्यं समाप्तम् ॥ १८ ॥ छ ॥ अथ भाद्रपदकृष्णैकादशीकथा ॥ युधिष्ठिर उवाच ॥ भाद्रस्य कृष्णपक्षे तु किंनामैकादशी भवेत् ॥ एतदिच्छाम्यहं श्रोतुं कथयस्व जनार्दन ॥१॥ श्रीकृष्ण उवाच ॥ शृणुष्वैकमना राजन्कथयिष्यामि विस्तरात् ॥ अजानाम्नीति विख्याता सर्वपापप्रणाशिनी ॥ २ ॥ पूजयित्वा हृषीकेशं व्रतं तस्याः करोति यः ॥ पापानि तस्य नश्यन्ति व्रतस्य श्रवणादपि ॥ ३ ॥ नातः परतरा राजँल्लोकद्वयहितावहा ॥ सत्यमुक्तं मया ह्येतन्नासत्यं भाषितं मम ॥ ४ ॥

युधिष्ठिर बोले–कि, भादोंके कृष्णपक्षकी एकादशीको कहा नाम हैं हे जनार्दन ! यह सुनिबेकी मेरी इच्छा है सो आप कहिये ॥ १ ॥ श्रीकृष्ण बोले–कि, हे राजन् ! एकाग्रमन होके सुनिये मैं विस्तारपूर्वक कहौंगो । अजा नामसों विख्यात वह सब पापनको नाश करै है ॥२॥जो मनुष्य हृषीकेश भगवान्को पूजन करिके वाको व्रत करै है ताके पाप व्रतके श्रावणहीते नाशको प्राप्त होय है ॥३॥ हे राजन् ! दोनों लोकनमें हितकी

करनहारी याते परे और कोई नहीं है मैंने यह सत्य कही मेरो वचन झूठा नहीं है ॥४॥ पहले हरिश्चन्द्र नाम एक राजा होत भयो वह चक्रवर्ती हो और सत्यप्रतिज्ञावालो हो और सब भूमिको स्वामी हो ॥ ५ ॥ काहू कर्मके योगसों वह राज्यते भ्रष्ट हो जात भयो और स्त्री तथा पुत्रको वेंचिके आपनोहू विक्रय करत भयो ॥ ६ ॥ वह पुण्यात्मा राजा चांडालको दास हो जात भयो, हे राजेंद्र ! सत्यको ग्रहण करिके मृतकनके वस्त्र

हरिश्चन्द्र इति ख्यातो बभूव नृपतिः पुरः ॥ चक्रवर्ती सत्यसन्धः समस्ताया भुवः पतिः ॥५॥ कस्यापि कर्मणो योगाद्राज्यभ्रष्टो बभूव सः ॥ विक्रीय वनितां पुत्रान्स चकारात्मविक्रयम् ॥६॥ पुल्कसस्य च दासत्वं गतो राजा स पुण्यकृत् ॥ सत्यमालंब्य राजेन्द्र मृतचैलापहारकः ॥ ७ ॥ सोऽभवन्नृपतिश्रेष्ठो न सत्याच्चलितस्तथा ॥ एवं गतस्य नृपतेर्बहवो वत्सरा गताः ॥ ८ ॥ ततश्चिंतापरो राजा बभूवात्यन्तदुःखितः ॥ किं करोमि क्व गच्छामि निष्कृतिर्मे कथं भवेत् ॥ ९ ॥ इति चिन्तयतस्तस्य मग्नस्य वृजिनार्णवे ॥ आजगाम मुनिः कश्चिज्ज्ञात्वा राजानमातुरम् ॥ १० ॥ परोपकरणार्थाय निर्मितो ब्रह्मणा द्विजः ॥ स तं दृष्ट्वा द्विजवरं ननाम नृपसत्तमः ॥ ११ ॥

नको हरण करै हो ॥ ७ ॥ और वह श्रेष्ठ राजा अपने सत्यते चलायमान नहीं होत भयो, या विधिसों राजाको बहुतसे वर्ष व्यतीत होत भये॥८॥ ता पीछे चिंतामें परो वह राजा अत्यंत दुःखित होत भयो कहा करौं और कहाँ जाऊँ मेरो कैसे उद्धार होय ॥ ९ ॥ पापरूप समुद्रमें डूबो भयो वह राजा या प्रकार चिंतवन कर रहो हो ता समय राजाको आतुर जानि कोई मुनि आवत भयो ॥ १० ॥ पराये उपकार करनेके निमित्त ब्रह्मा

करिके ब्राह्मण बनायो है वह श्रेष्ठ राजा वा ब्राह्मणको देखिके नमस्कार करत भयो ॥ ११ ॥ वह राजा हाथ जोरिके गौतमके आगे ठाडो होत भयो और दुःखसंयुक्त अपने वृत्तांतको कहत भयो ॥१२॥ राजाके वचन सुनिकै गौतम विस्मय करिके युक्त होत भयो फिर मुनिने राजाके अर्थ या व्रतको उपदेश कियो ॥१३॥ हे राजन् ! भादोंके महीनेके कृष्णपक्षमें सुन्दर अतिपुण्यकी देनहारी अजा नाम एकादशी आई है ॥१४॥

कृताञ्जलिपुटो भूत्वा गौतमस्याग्रतः स्थितः ॥ कथयामास वृत्तांतमात्मनो दुःखसंयुतम् ॥१२॥ श्रुत्वा नृपतिवाक्यानि गौतमो विस्मयान्वितः ॥ उपदेशं नृपतये व्रतस्यास्य मुनिर्ददौ ॥ १३ ॥ मासि भाद्रपदे राजन् कृष्णपक्षे तु शोभना ॥ एकादशी समायाता अजानाम्न्यतिपुण्यदा ॥ १४ ॥ तस्याः कुरु व्रतं राजन् पापनाशो भविष्यति ॥ तव भाग्यवशादेषा सप्तमेऽह्निसमागता ॥ १५ ॥ उपवासपरो भूत्वा रात्रौ जागरणं कुरु ॥ एवं तस्या व्रते चीर्णे सर्वपापक्षयो भवेत् ॥ १६ ॥ तव पुण्यप्रभावेण चागतोऽहं नृपोत्तम ॥ इत्येवं कथयित्वा तु मुनिरन्तरधीयत ॥ १७ ॥ मुनिवाक्यं नृपः श्रुत्वा चकार व्रतमुत्तमम् ॥ कृते तस्मिन् व्रते राज्ञः पापस्यान्तोऽभवत्क्षणात् ॥ १८ ॥

हे राजन् ! ताको तुम व्रत करो पापको नाश होय जायगो तुम्हारे भाग्यके वशसों सातवे दिन आई है ॥ १५ ॥ उपवासमें तत्पर होके रात्रिमें जागरण करो या प्रकार वाके करनेसों सम्पूर्ण पापनको क्षय हो जायगो ॥ १६ ॥ हे नृपोत्तम ! मैं तुम्हारे पुण्यके प्रभावसों आयो हौं या प्रकार कहिके मुनि अन्तर्धान हो जात भये ॥१७॥ मुनिको वाक्य सुनिके राजाने उत्तम व्रत कियो वा करनेपै राजाके पापको अंत क्षणमात्रहीमें हो

जात भयो ॥ १८ ॥ हे राजशार्दूल ! या व्रतको प्रभाव सुनिये जो दुःख बहुत वर्षकरिके भोगने योग्य है ताको क्षय हो गयो ॥ १९ ॥ या व्रतके प्रभावसा राजा दुःखके पार होगयो और स्त्रीके साथ योगको साथ पुत्रक जीवको प्राप्त होत भयो ॥ २० ॥ देवतानके नगारे बजे और आकाशते फूलनकी होत भई और एकादशीक प्रभावते वाने अकंटक राज्य पायो ॥ २१ ॥ राजा हरिश्चन्द्र पुरवासिन समेत और

श्रूयतां राजशार्दूल प्रभावोऽस्य व्रतस्य च ॥ यद्दुःख बहुभिर्वर्षैर्भोक्तव्यं तत्क्षयो भवेत् ॥ १९ ॥ निस्तीर्णदुःखो राजासीद् व्रतस्या प्रभावतः ॥ पत्न्या सह समायोगं पुत्रजीवनमाप सः ॥१२॥ देवदुन्दुभयो नेदुः पुष्पवर्षमभूद्दिवः ॥ एकादश्याः प्रभावेण प्राप्तं राज्यमकण्टकम् ॥ २१ ॥ स्वर्गं लेभे हरिश्चन्द्रः सपुरः सपरिच्छदः ॥ ईदृग्विधं व्रतं राजन्ये कुर्वंति द्विजोत्तमाः ॥ २२ ॥ सर्व पापविनिर्मुक्तास्त्रिदिवं यान्ति ते ध्रुवम् ॥ पठनाच्छ्रवणाद्राजन्नश्वमेधफलं लभेत् ॥ २३ ॥ इति श्रीब्रह्मवैवर्त्तपुराणे भाद्रपदकृष्णे अजानामैकादशीमाहात्म्यं समाप्तम् ॥ १९ ॥

अपने सब परिवारसमेत स्वर्गको प्राप्त होत भयो हे राजन् ! या प्रकारके व्रतको जे द्विजोत्तम करैं हैं ॥ २२ ॥ वे सब पापनसों मुक्त होके निश्चय स्वर्गको जाय हैं । हे राजन् ! पढने और सुननेसों वाजपेय यज्ञको फल मिला है ॥ २३ ॥ इति श्रीमत्पण्डितपरमसुखतनयपण्डित केशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायां भाद्रपदकृष्णैकादश्यजाकथा समाप्ता ॥ १९ ॥

अथ भाद्रपदशुक्लैकादशीजयन्तीकथा ॥ भाद्रस्य शुक्लपक्षे या जयन्त्येकादशी भवेत् ॥ तन्माहात्म्यमहं सम्यग्विवृणोमि स्वभाषया ॥१॥युधिष्ठिर बोले—कि भादों शुक्लपक्षकी एकादशीको कहा नाम है और वाकी विधि कैसी है और पुण्य कहा है सो मोसों कहो ॥१॥श्रीकृष्ण बोले—कि हे राजन् ! बडो है पुण्य जाको और स्वर्ग तथा मोक्षको देनहारी और सब पापनकी हरनहारी उत्कृष्ट जो वामन एकादशी ताहि कहौं हौं ॥ २ ॥

अथ भाद्रपदशुक्लैकादशीकथा ॥ युधिष्ठिर उवाच ॥ नभस्यसितपक्षे तु किंनामैकादशी भवेत ॥ को देवः को विधिस्तस्याः किं पुण्यं च वदस्व नः ॥ १ ॥ श्रीकृष्ण उवाच ॥ कथयामि महापुण्यां स्वर्गमोक्षप्रदायिनीम् ॥ वामनैकादशी राजन्सर्वपापहरां पराम् ॥ २ ॥ इमामेव जयत्याख्यां प्राहुरेकादशीं नृप ॥तस्या श्रवणमात्रेण सर्वपापक्षयो भवेत् ॥ ३ ॥ वाजपेयफलं प्रोक्तं नातः परतरं नृणाम् ॥ पपिनां पापशमनं जयन्तीव्रतमुत्तमम् ॥ ४ ॥ नातः परतरा राजन्न वै मोक्षप्रदायिनी ॥ एतस्मात् कारणाद्राजन्न कर्तव्या गतिमिच्छता ॥ ५ ॥ वैष्णवैर्मम भक्तैस्तु मनुजैर्मत्परायणैः ॥ नभस्ये वामनो यैस्तु पूजितस्तैर्जगत्त्रयम् ॥ ६ ॥

हे नृप ! याहीको जयन्ती एकादशी कहैं हैं ताके श्रवणमात्रहीते सब पापनको क्षय हो जाय हैं ॥ ३ ॥ मनुष्यनको याके पुण्यते अधिक वाजपेय यज्ञको फल नहीं कह्यो है यह उत्तम जयन्तीको व्रत पापी मनुष्यनके पापनको शांत करनहारो है ॥४॥ और याते परे और कोई मोक्षकी देनेहारी नहीं है हे राजन् ! या कारणते गतिके चाहनहारे मनुष्यनको याको व्रत करनो योग्य है॥५॥मेरे भक्तसों मैं परायण निजको ऐसे वैष्णव मनुष्यन

करिके भादोंमें वामनको पूजनकियो गयो तिन करिके तीनों लोक पूज गये ॥ ६ ॥वा पूजा करिके वे मनुष्य हरिके निकट जाय हैं यामें सन्देह नहीं है कमलके समान नेत्र हैं जिनके ऐसे वामन जिन करिके कमलके फूलनसों पूजे गये ॥७॥ भादोंके शुक्लपक्षमें जाने जयन्ती एकादशीको व्रत कियो ताने सब जगत्को पूजन कियो और तीनों सनातन देवता अर्थात् ब्रह्मा विष्णु महेशको हू पूजो ॥८॥ हे राजन् ! या कारणते हरि

पूजितं नात्र संदेहस्ते यान्ति हरिसन्निधिम् ॥ वामनः पूजितो येन कमलैः कमलेक्षणः ॥ ७ ॥ नभस्यसितपक्षे तु जयन्त्येका दशीदिनम् ॥ तेनार्चितं जगत्सर्वं त्रयो देवाः सनातनाः ॥ ८ ॥ एतस्मात्कारणाद्राजन्कर्तव्यो हरिवासरः ॥ अस्मिन् कृते न कर्तव्यं किंचिदस्ति जगत्त्रये ॥ ९ ॥ अस्यां प्रसुप्तो भगवानेत्यङ्गपरिवर्त्तनम् ॥ तस्मादेनां जनाः सर्वे वदंति परिवर्तिनीम् ॥ १० ॥ युधिष्ठिर उवाच ॥ संशयोऽस्ति महान्मह्यं श्रूयतां च जनार्दन ॥ कथं सुप्तोऽसि देवेश कथं यास्यङ्गवर्तनम् ॥ ११ ॥ किमर्थं देवदेवेश बलिर्बद्धस्त्वयाऽसुरः ॥ सन्तुष्टा पृथिवी देवाः किमकुर्वञ्जनार्दन ॥ १२ ॥

वासर करना चाहिये याके करनेपै तीनों लोकनमें और कुछ नहीं कर्तव्य है ॥ ९ ॥ सोये भये भगवान् या एकादशीके दिन करवट लेवे हैं याते याको नाम सब लोग परिवर्तिनी कहैं हैं॥ १०॥युधिष्ठिर बोले—कि,हे जनार्दन!मोको बडो संदेह है ताहि आप सुनिये हे देवेश!आप कैसे सोये हैं और कैसे अंगपरिवर्तन करते हो अर्थात् करवट लेते हो ॥ ११ ॥ हे देवदेवेश ! आपने बली नाम असुरको काहेके लिये बांधो ? हे जनार्दन ! संतुष्ट

होके ब्राह्मणने कहा कियो ॥१२॥ चतुर्मास्य व्रत करने हारे मनुष्यनके लिये कौनसी विधि है और कहा व्रत है हे प्रभो ! हे जगन्नाथ ! तुम्हारे सोनेपै मनुष्य कहा करैं हैं ॥१३॥ यह विस्तारसों कहो और मेरे संदेहको दूरि करो. कृष्ण बोले—कि, हे राजशार्दूल ! पापनको नाश करनहारी उत्कृष्ट कथाको सुनो ॥१४॥ हे नृप ! पहले त्रेतायुगमें बलि नाम दानव होतभयो, मोमें परायण और मेरो भक्त वह बलि नित्यही मेरो पूजन करत

को विधिः किं व्रतं चैव चातुर्मास्यमुपासताम् ॥ त्वयि सुप्ते जगन्नाथ किं कुर्वंति जनाः प्रभो ॥ १३ ॥ एतद्विस्तरतो ब्रूहि संशयं हर मे प्रभो ॥ श्रीकृष्ण उवाच ॥ श्रूयतां राजशार्दूल कथां पापहरां पराम् ॥ १४ ॥ बलिर्वै दानवः पूर्वमासीत्त्रेतायुगे नृप ॥ अपूजयच्च मां नित्यं मद्भक्तो मत्परायणः ॥ १५ ॥ जपैस्तु विविधैः सूक्तैर्यजते मां स नित्यशः ॥ द्विजानां पूजको नित्यं यज्ञकर्मकृताशयः ॥ १६ ॥ परं त्विन्द्रकृतद्वेषी देवलोकमजीजयत् ॥ मद्दत्तमिन्द्रलोकं वै जितं तेन महात्मना ॥१७॥ विलोक्य च ततः सर्वे देवाः संहत्य मंत्रयन् ॥ सर्वैर्मिलित्वा गंतव्यं देवं विज्ञापितुं प्रभुम् ॥ १८ ॥ ततश्च देवऋषिभिः साकमिन्द्रो गतः प्रभुम् ॥ शिरसा ह्यवनिं गत्वा स्तुत इन्द्रेण सूक्तिभिः ॥१९॥

भयो ॥१५॥ नानाप्रकारके जप और सूक्तन करिके वह नित्य मेरो पूजन करै है और नित्य ब्राह्मणनको पूजन तथा यज्ञकर्म करै हो ॥ १६ ॥ परन्तु वह इंद्रसों द्वेष करिके देवलोकोंको जीतलेत भयो वा महात्मा करिके मेरा दियो भयो देवलोक जीतिगयो ॥१७॥ या बातको देखि सब देवता इकट्ठे होके मंत्र करत भये कि सब मिलिके देव जे प्रभु हैं तिनसों विज्ञापन करनेको चलनो चाहिये ॥ १८ ॥ ता पीछे देवर्षिनके साथमें इंद्र प्रभुके

समीप जातो भयो और मस्तक भूमिमें लगाके इन्द्रकरि सूक्तनसा मैं स्तुति कियो गयो ॥१९॥ देवताओं समेत बृहस्पति करिके मैं बहुधा पूजन कियो गयो ता पीछे वामनरूप ह्वैके मैंने पांचवों अवतार लियो ॥२०॥ तब सब ब्रह्माण्डमें व्याप्त ऐसो उग्ररूप धारण करनहारो जो मैं बालक वह ता करिकै सत्यमें स्थित वह बलि जीतो गयो ॥२१॥ युधिष्ठिर बोले—कि, देवेश ! वामनरूप जो तुम हो तिन करिके यह असुर कैसे जीतो गयो

गुरुणा दैवतैः सार्द्धं बहुधा पूजितो ह्यहम् ॥ ततो वामनरूपेण ह्यवतीर्णश्च पञ्चमे ॥ २० ॥ अत्युग्ररूपेण तदा सर्वब्रह्मांडरूपिणा बालकेन जितः सो वै सत्यमालम्ब्य तस्थिवान् ॥ २१ ॥ युधिष्ठिर उवाच ॥ त्वया वामनरूपेण सोऽसुरश्च जितः कथम् ॥ एतत्कथय देवेश मह्यं भक्ताय विस्तरात् ॥ २२ ॥ श्रीकृष्ण उवाच ॥ मया बालेन स बलिः प्रार्थितो बटुरूपिणा ॥ पदत्रयमितां भूमिं देहि मे भुवनत्रयम् ॥२३॥ दत्तं भवति ते राजन्नात्र कार्या विचारणा ॥ इत्युक्तश्च मया राजा दत्तवांस्त्रिपदां भुवम् ॥२४॥ संकल्पमात्राद्ववृधे देहस्त्रैविक्रमः परम् ॥ भूर्लोके तु कृतौ पादौ भुवर्लोके तु जानुनी ॥ २५ ॥

वह भक्त जो मैं हौं तोसों विस्तारपूर्वक कहो ॥२२॥ श्रीकृष्ण बोले—कि, ब्रह्मचारी रूप जो बालक मैं ता करिके बलि प्रार्थना किये गये कि, तीनि पैग प्रमाण भूमि देउ वह मोको त्रिभुवन है ॥२३॥ हे राजन् ! यह दनो है यामें विचार न करनो चाहिये मुझ करिके ऐसो कहो गयो वह राजा बलि तीनि पैग भूमि देत भयो॥२४॥ संकल्प मात्रहीसों वह त्रिविक्रमको देह बहुतही बढत भयो भूर्लोकमें तो पांय किये और भुर्लोवकमें

जंघा कियो ॥२५॥ और स्वर्गलोकमें कटिको स्थापित कारिके तैसे ही महर्लोकमें पेटको राखि और जनलोकमें हृदय और तपोलोकमें कंठको ॥२६॥ और सत्यलोकमें मुखको स्थापित करि वाके ऊपर शिर स्थापित कियो तथा चंद्र सूर्य आदि ग्रह और योगन करि युक्त नक्षत्रगण ॥२७॥ और इंद्र समेत देवता तथा शेष और नाग वेदते उत्पन्न भये नाना प्रकारके सूक्तन कारिके मेरी स्तुति करत भये ॥२८॥ तब मैंने बलिको हाथ पकरिके ऐसा

स्वर्लोके तु कटिं न्यस्य महर्लोके तथोदरम् जनलोके तु हृदयं तपोलोके च कण्ठकम् ॥ २६ ॥ सत्यलोके मुखं स्थाप्य उत्तमांगं तथोर्ध्वतः ॥ चन्द्रसूर्यग्रहाश्चैव भगणो योगसंयुतः ॥ २७ ॥ सेन्द्राश्चव तथा देवानागाः शेषादयः परे ॥ स्तुवंतो वेद संभूतैः सूक्तैश्च विविधैस्तु माम् ॥२८॥ करे गृहीत्वा तु बलिमब्रुवं वचनं तदा ॥ एकेनपूरिता पृथ्वी द्वितीयेन त्रिविष्टपम् ॥२९॥ तृतीयस्य तु पादस्य स्थानं देहि ममानघ ॥ एवमुक्ते मया सोऽपि मस्तकं दत्तवान्बलिः ॥ ३० ॥ ततो वै मस्तके ह्येकं पदं दत्तं मया तदा ॥ क्षितो रसातले राजन्दानवो मम पूजकः ॥ ३१ ॥ विनयावनतं दृष्ट्वा प्रसन्नोऽस्मि जनार्दनः ॥ बले वसामि सततं सन्निधौ तव मानद ॥ ३२ ॥ इत्यवोचं महाभागं बलिं वैरोचनं तदा ॥ नभस्यशुक्लपक्षे तु परिवर्तिनि वासरे ॥ ३३ ॥

कह्यो कि, एक पगमें तो मैंने पृथ्वी पूर्ण करि और दूसरेपग करिके स्वर्ग पूरो कियो ॥२९॥ हे निष्पाप ! तीसरे पादको स्थान दीजिये मेरे ऐसे कहनेपै बलिने अपनो मस्तक दियो ॥ ३० ॥ वा पीछे मैंने वाके मस्तकपै तीसरे पाव दियो और मेरो पूजनहारो दानव पातालको पठाये गयो ॥३१॥ वा बलिको विनयसों नम्र देखि जनार्दन मैं प्रसन्न भयो हे बलि ! हे मानद ! निरंतर मैं तेरे समीप वास करौं हौं ॥३२॥ औ वा समय

मैं विरोचनके पुत्र बलिसों ऐसे कहत भयो कि, भादोंके शुक्लपक्षमें परिवर्तिनी एकादशीको व्रत कर ॥३३॥ वहां पातालमें एक मेरी मूर्ति बलिको आश्रय लेके स्थित है और दूसरी समुद्रोंमें उत्तम क्षीरसागरमें शेषनागकी पीठिपर ॥३४॥ जबतांई कार्तिक आवे तब तांई हृषीकेश शयन करैं हैं उनके शयनसमयमें जो पुण्य होय हैं सो सब पुण्यनमें उत्तम होय है ॥३५॥ हे राजन्! या कारणते महापुण्य पवित्र और पापकी हरनहारी यह

ममैका तत्र मूर्त्तिश्च बलिमाश्रित्य तिष्ठति ॥ द्वितीया शेषपृष्ठे वै क्षीराब्धौ सागरोत्तमे ॥ ३४ ॥ सुप्यते च हृषीकेशो यावच्चा याति कार्त्तिकी ॥ तावद्भवति तत्पुण्यं सर्वपुण्योत्तमोत्तमम् ॥ ३५ ॥ एतस्मात्कारणाद्राजन्कर्तव्या च प्रयत्नतः ॥ एकादशी महापुण्या पवित्रा पापहारिणी ॥ ३६ ॥ अस्यां प्रसुप्तो भगवानेत्यंपरिवर्त्तनम् ॥ एतस्यां पूजयेद्देवं त्रैलोक्यस्य पितामहम् ॥ ३७ ॥ दधिदानं प्रकर्तव्यं रौप्यतंडुलसंयुतम् ॥ रात्रौ जागरणं कृत्वा मुक्तो भवति मानवः ॥ ३८ ॥ एवं यः कुरुते राजन्नेकादश्यां व्रतं शुभम् ॥ सर्वपापहरं चैव भुक्तिमुक्तिप्रदायकम् ॥ ३९ ॥

एकादशी करनी चाहिये ॥३६॥ या एकादशीके दिन सोये भये भगवान् करवट लेय हैं यामें तीनों लोकम पितामह जे देव हैं तिनको पूजन करनो चाहिये ॥ ३७ ॥ दहीको दान करनो चाहिये और चावलोंके साथमें चांदीको दान करै और रात्रिमें जागरण करिके मनुष्य मुक्त हो जाय है ॥३८॥ हे राजन्! या प्रकार जो शुभ एकादशीको व्रत करै हैं यह व्रत सब पापनको हरनहारो और भुक्ति मुक्तिको देनहारो है ॥ ३९ ॥

वह देवलोकमें प्राप्त होके चन्द्रमाके समान शोभित होय है और जो मनुष्य पापनकी हरनहारी या कथाको सुनै है वह मनुष्य एक हजार अश्वमेध यज्ञके फलको प्राप्त होय है ॥४०॥ इति श्रीमत्पंडितपरमसुखतनय पंडितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायां भाद्रपदशुक्लैकादशीपरिवर्तिनीकथा समाप्ता ॥ २० ॥

स देवलोकं संप्राप्य भ्राजते चन्द्रमा यथा ॥ शृणुयाच्चैव यो मर्त्यः कथां पापहरां पराम् ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ ४० ॥ इति श्रीस्कन्दपुराणे भाद्रपदशुक्लपरिवर्तिनीनामैकादशीमाहात्म्यं समाप्तम् ॥ २० ॥ ॥ छ ॥ छ ॥ अथाश्विनकृष्णैकादशीकथा ॥ युधिष्ठिर उवाच ॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन ॥ आश्विने कृष्णपक्षे तु किंनामैकादशी भवेत् ॥ १ ॥ श्रीकृष्ण उवाच ॥ आश्विनस्यासिते पक्षे इंदिरा नाम नामतः ॥ तस्या व्रतप्रभावेण महापापं प्रणश्यति ॥ २ ॥ अधोयोनिगतानां च पितॄणां गतिदायिनीम् ॥ शृणुष्वावहितो राजन् कथां पापहरां पराम् ॥ ३ ॥

अथाश्विनकृष्णपक्षे इंदिरैकादशीकथा ॥ आश्विनस्यासिते पक्षे इंदिरैकादशी स्मृता ॥ तन्माहात्म्यस्य भाषायां विवतिं रचयाम्यह ॥१॥ युधिष्ठिर बोले–कि, हे मधुसूदन ! आश्विनके कृष्णपक्षम कौनसे नामकी एकादशी होय है सो आप मेरे आगे प्रसन्नतासों कहिये ॥ १ ॥ श्रीकृष्ण बोले–कि, आश्विनके कृणपक्षमें इंदिरा नाम एकादशी होय है वाके व्रतके प्रभावते महापातक नाश होय जायँ हैं ॥ २ ॥ नरकमें प्राप्त जे पितर

है तिनको मोक्ष देनहारी और पापनकी नाश करनहारी जो कथा है ताहि सावधान मन होके सुनिये ॥३॥ जाके श्रवणमात्रहीसों वाजपेययज्ञको फल प्राप्त होय है, पहिले सत्ययुगमे रिपुसूदन अर्थात् शत्रुनको दंड देनहारो राजा होत भयो ॥४॥ वह इंद्रसेन नामसों प्रसिद्ध माहिष्मती पुरीको राजा होत भयो यश करिके युक्त वह राजा धर्म करिके प्रजानको पालन करत भयो ॥ ५ ॥ पुत्र पौत्रन करिके युक्त और धनधान्य समायुक्त

यस्याः श्रवणमात्रेण बाजपेयफलं लभेत् ॥ पुरा कृतयुगे राजा बभूव रिपुसूदनः ॥ ४ ॥ इन्द्रसेन इति ख्यातः पुरीं माहिष्मतीं प्रति ॥ स राज्यं पालयामास धर्मेण यशसाऽन्वितः ॥ ५ ॥ पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः ॥ माहिष्मत्यधिपो राजा विष्णुभक्तिपरायणः ॥६॥ जपन् गोविन्दनामानि मुक्तिदानि नराधिपः ॥ कालं नयति विधिवदध्यात्मस्य विचिन्तकः ॥ ७ ॥ एकस्मिन्दिवसे राज्ञि सुखासीने सदोगते ॥ अवतीर्यागमद्धीमानम्बरान्नारदो मुनिः ॥ ८ ॥ तमागतमभिप्रेक्ष्य प्रत्युत्थाय कृताञ्जलिः ॥ पूजयित्वार्घविधिना चासने संन्यवेशयत् ॥ ९ ॥

माहिष्मतीको स्वामी वह राजा विष्णुभक्तिमें परायण हो ॥६॥ मुक्तिके देनहारे गोविंदके नामको जप करतो वह राजा विधिवत् अध्यात्म विद्याको चिंतवन करतो जप तपमें कालको व्यतीत करतो भयो ॥७॥ एक दिन वह राजा सुखसों सभामें बैठो तब बुद्धिमान् नारद मुनि आकाशते उतरिके वाके समीप आवत भये ॥ ८ ॥ उनको आये भये देखि राजा सुखसों हाथ जोरि अर्घकी विधिसों पूजन करत भयो और

आसन पर बैठावत भयो ॥ ९ ॥ सुखसों बैठे भये नारदमुनि वा राजासो बोलत भये कि हे राजेन्द्र ! तुम्हारे राज्यके सातों अंगनमें कुशल ॥ १० ॥ तुम्हारी मति धर्ममें है और तुम विष्णुकी भक्तिमें रत हो यह देवर्षिके वचन सुनि राजा उनसों बोलत भयो ॥ ११ ॥राजा बोले—कि हे मुनिश्रेष्ठ ! आपके प्रसादसे मेरे सर्वत्र कुशल है आज सब यज्ञकी क्रिया आपके दर्शनते सफल भई ॥१२॥ हे विप्रेंद्र ! प्रसन्न होवो और अपने

सुखोपविष्टः स मुनिः प्रत्युवाच नृपोत्तमम् ॥ कुशलं तव राजेन्द्र सप्तस्वङ्गेषु वर्तते ॥ १० ॥ धर्मे मतिर्वर्तते ते विष्णुभक्तिरतिस्तथा ॥ इति वाक्यं तु देवर्षेः श्रुत्वा राजा तमब्रवीत् ॥ ११ ॥ राजोवाच ॥ त्वत्प्रसादान्मुनिश्रेष्ठ सर्वत्र कुशलं मम ॥ अद्य क्रतुक्रियाः सर्वाः सफलास्तव दर्शनात् ॥ १२ ॥ प्रसादं कुरु विप्रर्षे ब्रूह्यागमनकारणम् ॥ इति राज्ञो वचः श्रुत्वा देवर्षिर्वाक्यमब्रवीत् ॥ १३ ॥ नारदउवाच ॥ श्रूयतां राजशार्दूल मद्वचो विस्मयप्रदम् ॥ ब्रह्मलोकादहं प्राप्तो यमलोकं नृपोत्तम ॥ १४ ॥ शमनेनार्चितो भक्त्या उपविष्टो वरासने ॥ धर्मशीलः सत्यवांस्तु भास्करं समुपासते ॥ १५ ॥ बहुपुण्यप्रकर्ता च व्रतवैकल्पदोषतः ॥ सभायां श्राद्धदेवस्य मया दृष्टः पिता तव ॥ १६ ॥

आवनेको कारण कहो राजाको यह वचनसुनिकेदेवर्षि वचन बोलत भये ॥ १३ ॥ नारद बोले—कि हे राजशार्दूल ! विस्मयको देनहारो मेरो वचन सुनिये हे नृपोत्तम ! मैं यमलोकते ब्रह्मलोकमें आयो ॥ १४ ॥ यमराजकरि भक्तिसो पूजन कियो भयो मैं श्रेष्ठ आसनपै बैठि वहां धर्मशील और सत्यवान् यमको उपासना करैं हैं॥१५॥बहुतसे पुण्यको करनहारो तुम्हारो पिता व्रतके बिगारि जानेके दोषते यमकी सभामें मैंने देख्यो॥१६॥

वाने जो संदेशा कह्यो है हे जनेश्वर ! ताहि सुनिये कि, माहिष्मतीपुरीको स्वामी इंद्रसेन नाम राजा है ॥ १७ ॥ हे ब्रह्मन् ! पूर्व जन्ममें भयो जो कोई विघ्न है तासों यमराजके समीप स्थित मोको आगे कहो ॥ १८ ॥ कि, हे पुत्र ! इंदिरा नाम एकादशीको जो व्रत है ताके दानसों स्वर्गमें मोको पठावो हे राजन् ! तुम्हारे पिताकरि ऐसो कहो गयो मैं तुम्हारे समीप आयो हौं ॥१९॥ हे राजन् ! पिताकी स्वर्गगतिके

कथितस्तेन सन्देशस्तं निबोध जनेश्वर ॥ इन्द्रसेन इति ख्यातो राजा माहिष्मतीप्रभुः ॥ १७ ॥ तस्याग्रे कथय ब्रह्मन् स्थितं मां यमसन्निधौ ॥ केनापि चांतरायेण पूर्वजन्मोद्भवेन वै ॥ १८ ॥ स्वर्गं प्रेषय मां पुत्र इंदिराव्रतदानतः ॥ इत्युक्तोऽहं समायातः समीपं तव पार्थिव ॥ १९ ॥ पितुः स्वर्गतये राजन्निन्दिराव्रतमाचर ॥ तेन व्रतप्रभावेण स्वर्गं यास्यति ते पिता ॥ २० ॥ राजोवाच ॥ कथयस्व प्रसादेन भगवन्निन्दिराव्रतम् ॥ विधिना केन कर्तव्यं कस्मिन्पक्षे तिथौ तथा ॥ २१ ॥ नारद उवाच ॥ शृणु राजन् हितं वच्मि व्रतस्यास्य विधिं शुभम् ॥ आश्विनस्यासितेपक्षे दशमी दिवसे शुभे ॥ २२ ॥ प्रातः स्नानं प्रकुर्वीत श्रद्धायुक्तेन चेतसा ॥ ततो मध्याह्नसमये स्नानंकृत्वा बहिर्जले ॥ २३ ॥

लिये तुम इंदिराको व्रत करो वा व्रतके प्रभावसों तुम्हारे पिता स्वर्गको जायगो ॥ २० ॥ राजा बोले—कि हे भगवन् ! आप प्रसन्न होके मोसे इंदिराको व्रत कहिये कि वह व्रत कौनसी विधिसों करनो चाहिये और कौनसे दिन तथा कौनसे पक्षमें सो कहिये॥२१॥नारद बोले—कि हे राजन् ! सुनिये या व्रतकी शुभ विधिको मैं कहैं हों आश्विनके कृष्णपक्षमें सुन्दर दशमीके दिन ॥ २२ ॥ श्रद्धायुक्त चित्त होके प्रातःकाल

नान करै ता पीछे मध्याह्नमें स्नान करि जलके बाहर आवै ॥ २३ ॥ फिर श्रद्धायुक्त होके पितरोंकी प्रीतिके लिये श्राद्ध करे ता पीछे एकबार भोजन करिके भूमिमें सोवै ॥ २४ ॥ फिर निर्मल प्रभात होनेपै जब एकादशीको दिन प्राप्त हो तब दंतधावन करिके मुखको धोवै॥२५॥ फिर भक्ति भावते व्रतके नियमनको ग्रहण करै कि,आज निराहार रहिके सब भोगनको वर्जित करौंगो॥२६॥कल्हके दिनभोजन करौंगो,हे पुंडरीकाक्ष

पितॄणां प्रीतये श्राद्धं कुर्याच्छ्रद्धासमन्वितः ॥ एकभक्तं ततः कृत्वा रात्रौ भूमौ शयीत च ॥ २४ ॥ प्रभाते विमले जाते प्राप्ते चैकादशीदिने ॥ मुखप्रक्षालनं कुर्याद्दन्तधावनपूर्वकम् ॥२५॥ उपवासस्य नियमं गृह्णीयाद्भक्तिभावतः ॥ अद्य स्थित्वा निराहारः सर्वभोगविवर्जितः ॥ २६ ॥ श्वो भोक्ष्ये पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ इत्येवं नियमं कृत्वा मध्याह्नसमये तथा ॥ २७ ॥ शालग्रामशिलाग्रे तु श्राद्धं कृत्वा यथाविधि ॥ भोजयित्वा द्विजाञ्छुद्धान्दक्षिणाभिः सुपूजितान् ॥ २८ ॥ पितृशेषं समाघ्राय गवे दद्याद्विचक्षणः॥ पूजयित्वा हृषीकेशं धूपगन्धादिभिस्तथा॥२९॥रात्रौ जागरणं कुर्यात्केशवस्य समीपतः ॥ ततःप्रभातसमये सम्प्राप्ते द्वादशीदिने ॥३०॥ अर्चयित्वा हरिं भक्त्या भोजयित्वा द्विजानथ ॥ बन्धुदौहित्रपुत्राद्यैः स्वयं भुंजीत वाग्यतः ॥३१॥

हे अच्युत ! तुम मेरे रक्षक हो या प्रकार नियम करिके मध्याह्नके समय॥२७॥ शालग्राम शिलाके आगे विधिपूर्वक श्राद्ध करिके शुद्ध ब्राह्मणको भोजन कराय दक्षिणासों पूजै॥२८॥पितरनसों जो शेष रहै ताहि सूँघिकर विचक्षण पुरुष गौके अर्थ देवे और धूपगंध आदिसों हृषीकेश भगवान्को पूजन करि ॥ २९ ॥ रात्रिमें केशव भगवानके समीप जागरण करै ता पीछे प्रभात समय द्वादशीके दिन ॥ ३० ॥ भक्तिसों हरिको पूजन करि

और ब्राह्मणकोभोजन कराय दौहित्र बंधु और पुत्र आदिसमेत मौन होके आप भोजन करै॥३१॥हे राजन्!या विधिसों आलस्यरहित होकेव्रतको करो हे राजन्! तो तुम्हारे पितर विष्णुलोकको जायँगे॥३२॥हे राजन्!या प्रकार वा नृपतिसों कहिके नारद मुनि अन्तर्धान होजात भये और वह राजा कही भई विधिके अनुसार उत्तम व्रतको करत भयो ॥३३॥रनवास तथा पुत्रन और भृत्यन समेत राजाके व्रत करनेपर हे कुंतीपुत्र ! आकाशते फूलनकी वर्षा होत भइ॥३४॥और वा राजाको पिता गरुडपर चढिके विष्णुलोकमें जात भयो और इन्द्रसेन राजर्षिहू अकंटक राज्यकरिके

अनेन विधिना राजन्कुरु व्रतमतन्द्रितः ॥ विष्णुलोकं प्रयास्यंति पितरस्तव भूपते ॥ ३२ ॥ इत्युक्त्वा नृपतिं राजन्मुनिरन्तरधीयत ॥ यथोक्तविधिना राजा चकार व्रतमुत्तमम्॥३३॥अन्तःपुरेण सहितः पुत्रभृत्यसमन्वितः ॥ कृते व्रते तु कौन्तेय पुष्पवृष्टिरभूद्दिवः ॥ ३४ ॥ तत्पिता गरुडारूढो जगाम हरिमंदिरम् ॥ इन्द्रसेनोऽपि राजर्षिः कृत्वा राज्यमकण्टकम् ॥३५॥ राज्यं निवेश्य तनयं जगाम त्रिदिवं स्वयम् ॥ इंदिराव्रतमाहात्म्यं तवाग्रे कथितं मया ॥३६॥ पठनाच्छ्रवणाच्चास्य सर्वपापैः प्रमुच्यते॥ भुक्त्वेह निखिलान् भोगान् विष्णुलोके वसेच्चिरम्॥३७॥इति श्रीब्रह्मवैवर्ते० आश्विनकृष्णैकादशीन्दिरामाहात्म्यं समाप्तम् ॥२१॥

॥३५॥पुत्रको राज्यमें स्थापित करि आप स्वर्गको जात भयो यह इन्दिरा व्रतको माहात्म्य मैंने तुम्हारे आगे कह्यो॥३६॥याके पढने और श्रवण करनेसों मनुष्य सब पापनते छूटि जाय है और विष्णुलोकमें वास करै ॥३७॥ इति श्रीमत्पंडितपरमसुखतनयपंडितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायामिंदिरैकादशीकथा समाप्ता ॥ २१ ॥

अथ आश्विनशुक्लैकादशीकथा ॥ आश्विनस्य सिते पक्षे यास्ति पाशांकुशाभिधा ॥ तन्माहात्म्यस्य भाषायां टीकां वच्मि प्रदीपिकाम् ॥ १॥ युधिष्ठिर बोले–कि, हे भगवन् ! हे मधुसूदन ! क्वारके शुक्लपक्षमें कौनसे नामकी एकादशी होय है सो आप मोसों प्रसन्न होके कहो ॥ १ ॥ श्रीकृष्ण बोले–कि, हे राजेन्द्र ! क्वारके शुक्लपक्षमें जो एकादशी होय है ताको पापनको नाश करनहारो माहात्म्य मैं कहौं हौं सो तुम सुनो ॥२॥ पाशांकुशा वाको नाम है वह सब पापनकी नाश करनहारी है वामें मनुष्य पद्मनाभ नाम भगवान्को पूजन करै ॥३॥ संपूर्ण वांछित फलनकी प्राप्तिके लिये

अथ आश्विनशुक्लैकादशीकथा ॥ युधिष्ठिर उवाच ॥ कथयस्व प्रसादेन भगवन्मधुसूदन ॥ इषस्य शुक्लपक्षे तु किंनामैकादशी भवेत् ॥१॥ श्रीकृष्ण उवाच ॥ शृणु राजेन्द्र वक्ष्यामि माहात्म्यं पापनाशनम् ॥ शुक्लपक्षे चाश्वयुजे भवेदेकादशी तु या ॥ २ ॥ पाशांकुशेति विख्याता सर्वपापहरा परा ॥ पद्मनाभाभिधानं तु पूजयेत्तत्र मानवः ॥ ३ ॥ सर्वाभीष्टफलप्राप्त्यै स्वर्गमोक्षप्रदं नृणाम् ॥ तपस्तप्त्वा नरस्तीव्रं चिरं मुनिर्यतेंद्रियः ॥ ४ ॥ यत्फलं समवाप्नोति तं नत्वा गरुडध्वजम् ॥ कृत्वापि बहुशः पापं नरो मोहसमन्वितः ॥ ५ ॥ न याति नरकं घोरं नत्वा पापहरं हरिम् ॥ पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ॥ ६ ॥

मनुष्यनको स्वर्ग और मोक्षको देनहारो यह व्रत करै, मनुष्य बहुत कालपर्यंत जितेंद्रिय हो अतितीव्र तपको करिके ॥४॥ जा फलको प्राप्त होय है ताहि फलको गरुडध्वज भगवान्के नमस्कार करनेसों प्राप्त होय है. मनुष्य अज्ञानसों युक्त बहुतसे पापनकों करिकेहू ॥५॥ पापनके हरनहारे हरिको नमस्कार करिके घोर नरकमें नहीं जाय है पृथ्वीमें जे तीर्थ हैं और पवित्र स्थान हैं ॥ ६ ॥

उन सबको विष्णुके नामकीर्तनते प्राप्त होय है । शार्ङ्गधनुषके धारण करनहारे जनार्दन देवजे विष्णु हैं तिनकी शरणमें जे जायँ हैं ॥ ७ ॥ उन मनुष्यनको निश्चय करिके कबहू यमलोक नहीं होय है मनुष्य प्रसंगहू ते एक एकादशीको व्रत करिके ॥ ८ ॥ अतिदारुण पाप करने हूँ पर यमकी यातनाको नहीं प्राप्त होय है जो मनुष्य वैष्णव होके शिवकी निन्दाको करै है॥९॥और जो वैष्णवलोककी निंदा करै है वह निश्चय नरकमें जाय है

तानि सर्वाण्यवाप्नोति विष्णोर्नामानुकीर्तनात् ॥ देवं शार्ङ्गधरं विष्णुं ये प्रपन्ना जनार्दनम् ॥ ७ ॥ नतेषांयमलोकश्च नृणां वै जायते क्वचित् ॥ उषोष्यैकादशीमेकां प्रसंगेनापि मानवाः ॥ ८ ॥ न यांति यातनां याम्यां पापं कृत्वातिदारुणम् ॥ वैष्णवः पुरुषो भूत्वा शिवनिन्दां करोति यः ॥९॥ यो निंदेद्वैष्णवं लोकं स याति नरकं ध्रुवम् ॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥१०॥ एकादश्युपवासस्य कलां नार्हति षोडशीम् ॥ एकादशीसमं पुण्यं किञ्चिल्लोके न विद्यते ॥ ११ ॥ नेदृशं पावनं किञ्चित्त्रिषु लोकेषु विद्यते॥ यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥ १२ ॥ यावन्नोपोष्यते जंतुः पद्मनाभदिनं शुभम् ॥ तावत्पापानि देहेऽस्मि स्तिष्ठन्ति मनुजाधिप ॥ १३ ॥ नैकादशीसमं किञ्चित्त्रिषु लोकेषु विद्यते ॥ व्याजेनापि कृता राजन्न दर्शयति भास्करिम् ॥१४॥

हजारों अश्वमेध और सैंकड़ों राजसूय यज्ञनको फल॥१०॥एकादशीके व्रतको जो फल है ताकी सोलहवीं कलाको भी नहीं प्राप्त होय है। एकादशीके समान पुण्य लोकमें कोई नहीं है॥११॥ ऐसो पवित्र तीनों लोकमें कुछ नहीं है जैसा यह पद्मनाभ दिन पापनको नाश करनहारो है ॥१२॥ जबताईं मनुष्य या शुभ पद्मनाभके दिनको व्रत नहीं करै हे मनुजाधिप । तबही ताईं मनुष्यके या देहमें पाप वास करै हैं ॥ १३ ॥ एकादशीके समान

तीनों लोकनमें कुछ नहीं है हे राजन् ! काहू बहानेहूसों जो याको व्रत कियो जाय तो यमके दर्शन नहीं होयँ ॥ १४ ॥ यह स्वर्ग और मोक्षकी देनहारी है और शरीरको आरोग्य करनहारी है यह सुन्दर स्त्रीकी देनहारी है और धन धान्यकी बढावनहारी है ॥ १५ ॥ हे राजन् ! न गंगा न गया न काशी न पुष्कर और न कुरुक्षेत्र हरिके दिनते पवित्र हैं अर्थात् वह हरिवासर सबसे श्रेष्ठ है ॥ १६ ॥ हरिवासरको व्रत करि रात्रिमें जागरण करिके हे राजन् ! विना परिश्रमके विष्णुपद प्राप्त होय है ॥ १७ ॥ या एकादशीको व्रत करनहारो मनुष्य दश पीढी

स्वर्गमोक्षप्रदा ह्येषा शरीरारोग्यदायिनी॥सुकलत्रप्रदा ह्येषा धनधान्यप्रदायिनी॥१५॥न गंगा न गया राजन्न काशी न च पुष्करम्॥ न चापि कौरवं क्षेत्रं पुण्यं भूप हरेर्दिनात्॥१६॥रात्रौजागरणं कृत्वा समुपोष्य हरेर्दिनम्॥अनायासेन भूपाल प्राप्यते वैष्णवंपदम् १७ दश वै मातृपक्षे च दश राजेन्द्र पैतृके ॥ प्रियाया दश पक्षे तु पुरुषानुद्धरेन्नरः ॥१८॥ चतुर्भुजा दिव्यरूपा नागारिकृतकेतनाः॥ स्रग्विणः पीतवस्त्राश्च प्रयान्ति हरिमंदिरम् ॥ १९ ॥ बालत्वे यौवनत्वे च वृद्धत्वेऽपि नृपोत्तम ॥ उपोष्य द्वादशीं नूनं नैति पापोऽपि दुर्गतिम् ॥ २० ॥ पाशांकुशामुपोष्यैव आश्विने चासितेतरे ॥ सर्वपापविनिर्मुक्तो हरिलोकं स गच्छति ॥ २१ ॥

माताके पक्षकी और दशही पिताके पक्षकी और दश स्त्रीके पक्षकी तारि देय है ॥ १८ ॥ वे सब चतुर्भुज दिव्यरूप और गरुड जिनकी ध्वजामें है मालाको धारण किये भये और पीताम्बरको धारण किये हरिके लोकको जायँ हैं ॥ १९ ॥ बालकपनमें जवानीमें यों बुढापे हे राजन् ! एकादशीको व्रत करिके पापीहू दुर्गतिको नहीं प्राप्त होय है ॥ २० ॥ क्वारके शुक्लपक्षमें पाशांकुशाको व्रत करिके पापनते मुक्त हो वह मनुष्य

हरिके लोकको जाय है ॥२१॥ सुवर्ण, तिल, भूमि, गौ, अन्न, जल, जूता और छत्र आदिको दान करिके मनुष्य यमको नहीं देखै है ॥ २२ ॥ जाको दिन पुण्यहीन व्यतीत होय वह लोहारकी धौंकनिके समान श्वासको लेता है परंतु जीवता नहीं है हे नरोत्तम ! चाहे दरिद्री ही होय परन्तु शक्तिके अनुसार स्नान दान आदि क्रियानको करतो भयो दिननको सफल बितावै ॥ २३ ॥ तालाव, बाग, महल, यज्ञ तथा और पुण्यनका करनहारो धीर मनुष्य वा यमकी यातनाको नहीं देखै ॥ २४ ॥ पुण्य करनहारे मनुष्य लोकमें बडी आयुके धनाढ्य कुलीन और रोगरहित

दत्त्वा हेमतिलान्भूमिं गामन्नमुदकं तथा ॥ उपानद्वस्त्रच्छत्रादि न पश्यति यमं नरः ॥ २२ ॥ अवन्ध्यं दिवसं कुर्याद्दरिद्रोऽपि नृपोत्तम ॥ समाचरन्यथाशक्ति स्नानदानादिकाः क्रियाः ॥ २३ ॥ तडागारामसौधानां सत्राणां पुण्यकर्मणाम् ॥ कर्तारो नैव पश्यन्ति धीरास्तां यमयातनाम् ॥ २४ ॥ दीर्घायुषो धनाढ्याश्च कुलीना रोगवर्जिताः ॥ दृश्यन्ते मानवा लोके पुण्यकर्तार ईदृशाः ॥ २५ ॥ किमत्र बहुनोक्तेन यान्त्यधर्मेण दुर्गतिम् ॥ आरोहंति दिवं धर्मैर्नात्र कार्या विचारणा ॥ २६ ॥ इति ते कथितं राजन्यत्पृष्टोऽहं त्वयानघ ॥ २७ ॥ इति श्रीब्रह्मवैवर्तपुराणे आश्विनशुक्लैकादशीपाशांकुशामाहात्म्यं समाप्तम् ॥ २२ ॥

दिखाई देय हैं ॥ २५ ॥ यहां बहुत कहनेसों कहा है अधर्मते दुर्गतिको प्राप्त होय हैं और धर्मते स्वर्गको जायँ हैं और यामें कुछ विचार नहीं है ॥ २६ ॥ हे अनघ ! हे राजन् ! जो तुमने पूछो सो मैंने तुमसों कह्यो॥२७॥ इति श्रीमत्पण्डितपरमसुखतनयपंडितकेशवप्रसादशर्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायामाश्विनशुक्लपाशांकुशानाम्न्येकादशीकथा समाप्ता ॥ २२ ॥

अथ कार्तिककृष्णैकादशीरमाकथा ॥ ऊर्जस्य कृष्णपक्षे तु रमाख्यैकादशी स्मृता ॥ तन्माहात्म्यस्य भाषायां टीकां रम्यां करोम्यहम् ॥ १ ॥ युधिष्ठिर बोले—कि, हे जनार्दन ! कार्तिकके कृष्णपक्षमें जो एकादशी होय है ताको कहा नाम है सो आप मेरेपर स्नेहसों प्रसन्न होके कहो ॥ १ ॥ श्रीकृष्ण बोले—कि, हे राजशार्दूल ! सुनिये मैं तुम्हारे आगे कहों हों कि, कार्तिकके कृष्णपक्षमें रमानाम सुन्दर शोभायमान एकादशी होय

अथ कार्तिककृष्णैकादशी कथा ॥ युधिष्ठिर उवाच ॥ कथयस्व प्रसादेन मम स्नेहाज्जनार्दन ॥ कार्तिकस्यासिते पक्षे किंनामैकादशी भवेत् ॥ १ ॥ श्रीकृष्ण उवाच ॥ श्रूयतां राजशार्दूल कथयामि तवाग्रतः ॥ कार्तिके कृष्णपक्षे तु रमानाम्नी सुशोभना ॥ २ ॥ एकादशी समाख्याता महापापहरा परा ॥ अस्याः प्रसंगतो राजन्माहात्म्यं प्रवदामि ते ॥ ३ ॥ मुचुकुन्द इति ख्यातो बभूव नृपतिः पुरा ॥ देवेन्द्रेण समं यस्य मित्रत्वमभवन्नृप ॥४॥ यमेन वरुणेनैव कुबेरेण समं तथा॥ विभीषणेन चैतस्य सखित्वमभवत्सह ॥५॥ विष्णुभक्तः सत्यसन्धो बभूव नृपतिः सदा ॥ तस्यैवं शासतो राजन् राज्यं निहतकण्टकम् ॥ ६ ॥

है ॥ २ ॥ यह एकादशी महापातककी हरनेवाली उत्कृष्ट कही गई है । हे राजन् ! प्रसंगसों अब याके माहात्म्य तुमसों कहौं हौं ॥३॥ पहले मुचुकुन्द या नामसो प्रसिद्ध राजा होता भयो । हे नृप ! इन्द्रके साथ जाकी मित्रता रही ॥ ४ ॥ तैसेही यह वरुण और कुबेरहूके साथ और विभीषणहूके साथ वाकी मित्रता रही ॥ ५ ॥ वह राजा सदा विष्णुभक्त और सत्यप्रतिज्ञावालो हो । हे राजन् ! या प्रकार निष्कंटक राज्य

करतो जो वह राजा है ॥ ६ ॥ ताके घर नदीनमें श्रेष्ठ चन्द्रभागा नाम पुत्री उत्पन्न होतभई वह शोभन नाम चन्द्रसेनके पुत्रको दी गयी ॥७॥ हे नृप ! वह शोभन कबहूं श्वशुरके घर आयो वा समय सुन्दर पुण्यको देनहारो एकादशीको व्रत आयो ॥ ८ ॥ व्रत दिनके आनेपै चन्द्रभागा चिन्तवन करत भई कि हे देवेश ! कहा होयगो मेरो पतिहू दुर्बल है ॥९॥ वह क्षुधाको नहीं सहै और मेरे पिताको शासन उग्र है दशमीको दिन

बभूव दुहिता गेहे चन्द्रभागा सरिद्वरा ॥ शोभनाय च सा दत्ता चन्द्रसेनसुताय वै ॥ ७ ॥ स कदाचित्समायातः श्वशुरस्य गृहे नृप ॥ एकादशीव्रतमिदं समायातं सुपुण्यदम् ॥ ८ ॥ समागते व्रतदिने चन्द्रभागा त्वचिंतयत् ॥ किं भविष्यति देवेश मम भर्तातिदुर्बलः ॥ ९ ॥ क्षुधां न सहते सोऽपि पिता चैवोग्रशासनः ॥ पटहस्ताड्यते यस्य संप्राप्ते दशमीदिने ॥ १० ॥ न भोक्तव्यं न भोक्तव्यं न भोक्तव्यं हरेर्दिने ॥ श्रुत्वा पटहनिर्घोषं शोभनस्त्वब्रवीत्प्रियाम् ॥ ११ ॥ किं कर्तव्यं मया कान्ते देहि शिक्षां सुशोभने ॥ कृतेन येन मे सम्यग्जीवितं न विनश्यति ॥१२॥ चन्द्रभागोवाच ॥ मत्पितुर्वेश्मनि विभो भोक्तव्यं नैव केनचित् ॥ गजैरश्वैस्तथा चान्यैरन्यैः पशुभिरेव च ॥ १३ ॥

जब आवै है तब वाको ढोल बजे है ॥१०॥ कि, हरिके दिन भोजन न करनो चाहिये, न करनो चाहिये, न करनो चाहिये या प्रकारको वा ढोलको शब्द सुनि शोभन अपनी प्रियासों बोलत भयो ॥११॥ कि, हे कान्ते ! मोको अब कहा कर्त्तव्य है हे सुशोभने ! तू मोको शिक्षा दे जाके करनेसों मेरे जीवितको नाश न होय ॥१२॥ चन्द्रभागा बोली—कि, हे प्रभो ! मेरे पिताके घरमें आज कोई नहीं भोजन करैगो. हाथी, घोडे और ऊंट तथा अन्य

पशु भी नहीं भोजन करैंगे॥१३॥घासको अन्नको तैसेही जलको हरिके दिनमें कोई नहीं खायगो हे पति ! मनुष्य तो हरिवासरके दिन कैसे खायँगे ॥१४॥हे पति ! जो तुम भोजन करोगे तो घरते जाइये, मनमें ऐसे विचारिके अपने मनको दृढ कीजिये॥१५॥ शोभन बोले—तैने सत्य कही मैं व्रत करौंगो दैवने जो जैसे रची है वैसीही होयगी ॥१६॥ ऐसे भाग्यमें मति करके वह उत्तम व्रतको करत भयो भूख प्याससों पीडित है शरीर जाको

तृणमन्नं तथा वारि न भोक्तव्यं हरेर्दिने ॥ मानवैश्च कुतः कान्त भुज्यते हरिवासरे ॥ १४ ॥ यदि त्वं भोक्ष्यसे कान्त ततो गेहात्प्रयास्यताम् ॥ एवं विचार्य मनसा सुदृढं मानसं कुरु ॥ १५ ॥ शोभन उवाच ॥ सत्यमेतत्त्वयैवोक्तं करिष्येऽहमुपोषणम्॥ दैवेन विहितं यद्वै तत्तथैव भविष्यति ॥ १६ ॥ इति दिष्टे मतिं कृत्वा चकार व्रतमुत्तमम् ॥ क्षुत्तृषापीडिततनुः स बभूवाति दुःखितः ॥ १७ ॥ इति चिन्तयतस्तस्य ह्यादित्योऽस्तमयाद्गिरिम् ॥ वैष्णवानां नराणां सा निशा हर्षविवर्द्धिनी ॥ १८ ॥ हरि पूजारतानां च जागरासक्तचेतसाम् ॥ बभूव नृपशार्दूल शोभनस्यातिदुःसहा ॥ १९ ॥ रवेरुदयवेलायां शोभनः पञ्चतां गतः ॥ दाहयामास राजा तं राजयोग्यैश्च दारुभिः ॥ २० ॥

ऐसो वह शोभन अतिदुःखित होत भयो ॥१७॥ वाको ऐसे चिंतवन करते२ सूर्य अस्ताचलको प्राप्त होत भये वैष्णव मनुष्यनको वह रति हर्षकी बढावनहारी भई ॥१८॥ तैसेही हरिकी पूजामें लगे भये जे वैष्णव हैं तिनकेहू हर्षकी बढावनहारी भई हे नृपशार्दूल ! वह शोभनको अतिदुस्सह होत भई ॥ १९ ॥ सूर्यके उदयसमयमें शोभन मृत्युको प्राप्त भये तब राजाने उनको राजाके योग्य चन्दन आदि काष्ठन करके दाह

१३

करायो ॥२०॥ और पिताकरि मना की गई चन्द्रभागा अपने देहको नहीं जरावत भई फिरि वाको प्रेतकृत्य करिके पिताहीके घरमें स्थित होती भई ॥२१॥ हे नृपश्रेष्ठ ! रमाको जो व्रत कियो ताके प्रभावते शोभित मंदराचलके शिखरपर मनोहर देवपुर पायो ॥२२॥ वह देवपुर कैसो है कि, सबते उत्तम है और जाको कोई दबाय नहीं सकै है और असंख्य गुणन करिके युक्त है रत्न और वैडूर्य मणिनसों जडे भये हैं

चन्द्रभागा नात्मदेहं ददाह पितृवारिता ॥ कृत्वौर्ध्वदैहिकं तस्य तस्थौ जनकवेश्मनि ॥ २१ ॥ शोभनेन नृपश्रेष्ठ रमाव्रत प्रभावतः ॥ प्राप्तं देवपुरं रम्यं मन्दराचलसानुनि ॥ २२ ॥ अनुत्तममनाधृष्यमसंख्येयगुणान्वितम् ॥ हेमस्तंभमयैः सौधै रत्नवैडूर्यमण्डितैः ॥ २३ ॥ स्फाटिकैर्विविधाकारैर्विचित्रैरुपशोभितम् ॥ सिंहासनसमारूढः सुश्वेतच्छत्रचामरः ॥ २४ ॥ किरीटकुण्डलयुतो हारकेयूरभूषितः ॥ स्तूयमानश्च गन्धर्वैरप्सरोगणसेवितः ॥ २५ ॥ शोभनः शोभते तत्र देवराडपरो यथा ॥ सोमशर्मेति विख्यातो मुचुकुन्दपुरे वसन् ॥ तीर्थयात्राप्रसंगेन भ्रमन्विप्रो ददर्श तम् ॥ २६ ॥

सुवर्णके खंभ जिनमें ऐसे महलनसों शोभित हैं ॥२३॥ नाना प्रकारके हैं आकर जिनके ऐसे विचित्र स्फटिकमणिन करिके शोभित है ऐसे मंदिरमें शोभन सिंहासनपर बैठे हैं उनके ऊपर श्वेत छत्र लगो है और चमर ढुर रहे हैं ॥२४॥ किरीट माथेपर है कुण्डल धारण किये हैं हार और केयूर जे बाजू हैं तिन करिके गन्धर्व स्तुति कर रहे हैं और अप्सरानके गण सेवन करि रहे हैं ॥ २५ ॥ वहां शोभन ऐसो शोभित है मानो

कि,दूसरो इन्द्र है सोमशर्मा नामसों विख्यात मुचुकुन्दके पुरको वसनहारा एक ब्राह्मण तीर्थयात्राके प्रसंगसों भ्रमतो भयो शोभनको देखत भयो ॥२६॥ वह राजाको जमाई जानि उनके समीप जात भयो तब शोभन शीघ्रही आसनते उठिके वा उत्तम द्विजको नमस्कार करत भयो ॥२७॥ और ससुरा जो राजा हो ताकी कुशल पूछत भयो और स्त्री जो चन्द्रभागा हैं ताकी तथा नगरकी कुशल पूछत भयो॥ २८ ॥सोमशर्मा बोले—कि,

नृपजामातरं ज्ञात्वा तत्समीपं जगाम सः ॥ आसनादुत्थितः शीघ्रं नमश्चक्रे द्विजोत्तमम् ॥ २७ ॥ चकार कुशलप्रश्नं श्वशुरस्य नृपस्य च ॥ कांतायाश्चन्द्रभागायास्तथैव नगरस्य च ॥२८॥ सोमशर्मोवाच ॥ कुशल वर्तते राजञ्छ्वशुरस्य गृहे तव ॥ चन्द्रभागा कुशलिनी सर्वतः कुशलं पुरे ॥ २९ ॥ स्ववृत्तं कथ्यतां राजन्नाश्चर्यं परमं मम ॥ पुरं विचित्रं रुचिरं न दृष्टं केनचित्कचित् ॥ ३० ॥ एतदाचक्ष्व नृपते कुतः प्राप्तमिदं त्वया ॥ शोभन उवाच ॥ कार्त्तिकस्यासिते पक्षे नाम्ना चैकादशीरमा ॥ ३१ ॥ तामुपोष्य मया प्राप्तं द्विजेन्द्र पुरमध्रुवम् ॥ ध्रुवं भवति येनैव तत्कुरुष्व द्विजोत्तम् ॥ ३२ ॥

हे राजन! तुम्हारे ससुरेके घरमें कुशल है और चन्द्रभागाहू कुशलिनी है और सब पुरमें कुशल है ॥२९॥ हे राजन् ! अपनो वृत्तांत कहिये मोको वडो आश्चर्य है सो विचित्र सुन्दर पुर है कि, जैसो कबहू काहूने कहूं न देखो होय ॥ ३० । हे राजन् ! यह कहिये कि, तुमने याहि कैसो पायो शोभन बोले—कि, कार्तिकके कृष्णपक्षमें रमा नाम एकादशी होय है॥३१॥ हे द्विजेंद्र ! वाको व्रत करिके मैंने यह अध्रुवपुर पायो है हे द्विजेंद्र !

जाते यह ध्रुव हो जाय सो उपाय करिये ॥ ३२ ॥ द्विजेंद्र बोले-कि,यह कैसे अध्रुव है और कैसे ध्रुव होय हे राजेन्द्र! सो आप कहिये वाको मैं वैसोही करौं यामें अन्यथा नहीं है॥३३॥ शोभन बोले-हे द्विजोत्तम ! ! मैंने या उत्तम व्रतको श्रद्धाहीन कियो है ताते मैं याको अध्रुव मानौं हौं और जाते ध्रुव होय सो सुनिये।।३४।। सुन्दर शोभायमान चन्द्रभागा नाम मुचुकुंदकी पुत्री है तासों तुम यह वृत्तांत कहो तो यह ध्रुव हो जायगो

द्विजेन्द्र उवाच ॥ कथमध्रुवमेतद्धि हि भवति ध्रुवम् ॥ तत्त्वं कथय राजेन्द्र तत्करिष्यामि नान्यथा ॥३३॥ शोभन उवाच ॥ मयैतद्विहितं विप्र श्रद्धाहीनं व्रतोत्तमम् ॥ तेनाहमध्रुवम्मन्ये ध्रुवं भवति तच्छृणु ॥ ३४ ॥ मुचुकुन्दस्य दुहिता चन्द्रभागा सुशोभना ॥ तस्यै कथय वृत्तान्तं ध्रुवमेतद्भविष्यति ॥ ३५ ॥ तच्छ्रुत्वाथ द्विजवरस्तस्यै सर्वं न्यवेदयत् ॥ श्रुत्वाऽथ सा द्विजवचो विस्मयोत्फुल्ललोचना ॥ ३६ ॥ प्रत्यक्ष मथवा स्वप्नस्त्वयैतत्कथ्यते द्विज ॥ सोमशर्मोवाच ॥ प्रत्यक्षं पुत्रि ते कांतो मया दृष्टो महावने ॥३७॥ देवतुल्यमनाधृष्यं दृष्टं तस्य पुरं मया ॥ अध्रुवं तेन तत्प्रोक्तं ध्रुवं भवति तत्कुरु ॥ ३८ ॥

।। ३५ ॥ सो सुनिके वह ब्राह्मण वा चन्द्रभागासों सब वृत्तांत कहिदेत भयो या पीछे वह ब्राह्मणको वचन सुनिके विस्मयसों उत्फुल्ल हैं नेत्र जाके ऐसी होत भई॥३६॥ हे द्विज ! यह प्रत्यक्ष कहते हो अथवा स्वप्न कहते हो ? सोमशर्मा बोले-कि हे पुत्रि ! मैंने तुम्हारो पति महावनमें प्रत्यक्ष देख्यो है॥३७।देवपुरके तुल्य जाहि कोऊ दवाय न सकै ऐसो मैंने उनको पुर देख्यो हैं बाने कही अध्रुव कहो जाते वह ध्रुव होय सो करो ॥३८॥

चन्द्रभागा बोली–कि,हे विप्रर्षे! मोको तुम वहां ले चलो पतिके दर्शनकी मेरी बडी लालसा है मैं अपने व्रतके पुण्यसों वा पुरको ध्रुव करि देऊँगी ॥३९॥ हे द्विज ! जैसे हम दोनोंको संयोग होय सो करो यह निश्चय है कि, वियोगीको योग कराके बडो पुण्य प्राप्त होय है ॥४०॥ यह सुनिके सोमशर्मा वाहि साथ लेके वहां जात भयो जहां मन्दराचल नाम पर्वतके समीप वामदेव ऋषिको आश्रम हो ॥ ४१ ॥ वामदेव उन दोनोंको

चन्द्रभागोवाच ॥ तत्र मां नय विप्रर्षे पतिदर्शनलालसाम् ॥ आत्मनो व्रतपुण्येन करिष्यामि पुरं ध्रुवम् ॥ ३९ ॥ आवयोर्द्विज संयोगो यथा भवति तत्कुरु ॥ प्राप्यते महत्पुण्यं कृत्वा योगं वियुक्तयोः ॥ ४० ॥ इति श्रुत्वा सह तया सोमशर्मा जगाम ह ॥ आश्रमं वामदेवस्य मन्दराचलसन्निधौ ॥ ४१ ॥ वामदेवोऽशृणोत्सर्वं वृत्तान्तं कथितं तयोः ॥ अभ्यषिञ्चच्चन्द्रभागां वेदमंत्रैरथोज्ज्वलाम् ॥ ४२ ॥ ऋषिमंत्रप्रभावेण विष्णुवासरसेवनात् ॥ दिव्यदेहा बभूवासौ दिव्यां गतिमवाप ह ॥ ४३ ॥ पत्युः समीपमगमत्प्रहर्षोत्फुल्ललोचना ॥ सहर्षः शोभनोऽतीव दृष्ट्वा कान्तां समागताम् ॥ ४४ ॥ समाहूय स्वके वामे पार्श्वे तां संन्यवेशयत् ॥ सा चोवाच प्रियं हर्षाच्चन्द्रभागा शुभं वचः ॥ ४५ ॥

कहो भयो सब वृत्तांत सुनत भये ता पीछे वामदेव वेदके मंत्रनसों उज्ज्वल वा चन्द्रभागाको अभिषेक करावत भये ॥४२॥ ऋषिको जो मंत्र है ताके प्रभावते और हरिवासरके सेवनते वह चन्द्रभागा दिव्यदेह होजात भई और दिव्य ही गतिको प्राप्त होत भई ॥ ४३ ॥ और आनंदसों प्रफुल्लित नेत्र होके पतिके समीप जाती भई और शोभनहू कांताको आई भई देखि बहुतही हर्षित होत भयो ॥४४ ॥ और वा चन्द्रभागाको बुलायके

अपनी वाईं ओर बैठाय लेत भयो। वह चन्द्रभागा बडे हर्षते पतिसों शुभ वचन बोलत भई ॥४५॥ हे कांत! हितवचन सुनिये जो पुण्य मोमें विद्यमान हैं जब मैं पिताके घरमें आठ वर्षते अधिक भई ॥४६॥ मैं तबसों लगाके एकादशीको व्रत श्रद्धायुक्त मनते यथोक्त विधिपूर्वक कियो हैं ॥४७॥ ता पुण्यके प्रभावसों तुम्हारा पुर ध्रुव होजायगो और कल्पके क्षय पर्यंत सब कामनासों भरो पूरो रहैगा ॥४८॥ हे नृप शार्दूल! या प्रकार वह

शृणु कान्त हितं वाक्यं तत्पुण्यं विद्यते मयि ॥ अष्टवर्षाधिका जाता यदाऽहं पितृवेश्मनि ॥ ४६ ॥ मया ततः प्रभृति च कृतमेकादशीव्रतम् ॥ यथोक्तविधिसंयुक्तं श्रद्धायुक्तेन चेतसा ॥ ४७ ॥ तेन पुण्यप्रभावेण भविष्यति पुरं ध्रुवम् ॥ सर्वकामसमृद्धं च यावदाभूतसंप्लवम् ॥ ४८ ॥ एवं सा नृपशार्दूल रमते पतिना सह ॥ दिव्यभोगा दिव्यरूपा दिव्याभरणभूषिता ॥ ४९ ॥ शोभनोऽपि तया सार्द्धं रमते दिव्यविग्रहः ॥ रमाव्रतप्रभावेण मन्दराचलसानुनि ॥ ५० ॥ चिन्तामणिसमा ह्येषा कामधेनुसमाऽथवा ॥ रमाभिधाना नृपते तवाग्रे कथिता मया ॥ ५१ ॥ ईदृशं च व्रतं राजन्ये कुर्वंति नरोत्तमाः ब्रह्महत्यादिपापानि नाशं यान्ति न संशयः ॥ ५२ ॥

पतिके साथ रमण करती दिव्य वाको भोग हो और दिव्यही रूप हो और दिव्यही आभूषण करिके भूषित हो ॥४९॥ और दिव्य हैं विग्रह जाको ऐसो शोभन रमाके व्रतके प्रभाव करिके मन्दराचलके शिखरपर वाके साथ विहार करत भयो ॥५०॥ यह रमानाम चिंतामणिके समान हैं अथवा कामधेनुके तुल्य है हे नृप! मैंने तुम्हारे आगे कही॥५१॥जे उत्तम मनुष्य या प्रकारको व्रत करै हैं तिनके ब्रह्महत्या आदि सबपाप नाशको प्राप्त होय

यामें सन्देह नहीं है ॥५२॥ दोनों पक्षकी एकादशीनके व्रतनमें जैसी कृष्णपक्षकी है वैसेही शुक्लपक्षकी है तिथिनको भेद नहीं करै ॥५३॥ सेवन करी गई एकादशी मनुष्यको भुक्ति मुक्तिकी देनहारीहै, जैसे काली गौ तथा सफेद दोनोंको दूध एकसो होय है॥५४॥तैसेही दोनों एकादशी तुल्य फलकी देनहारी हैं

एकादशीव्रतानां च पक्षयोरुभयोरपि ॥ यथा शुक्ला तथा कृष्णा तिथिभेदं न कारयेत् ॥ ९२ ॥ सेवितैकादशी नृणां भुक्ति मुक्तिप्रदायिनी ॥ धेनुः कृष्णा यथा श्वेत उभयोः सदृशं पयः ॥ ९४ ॥ तथैव तुल्यफलदं स्मृतमेकादशीव्रतम् ॥ एकादशी व्रतानां च माहात्म्यं शृणुयान्नरः ॥ ९९ ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ९६ ॥ इति श्रीब्रह्मवैवर्त्तपुराणे कार्तिककृष्णै कादशी रमामाहात्म्यं समाप्तम् ॥ २३ ॥

एकादशीके जे माहात्म्य हैं तिनको जो सुनै है ॥५५॥ वह सब पापनते छूटिके विष्णलोकमें आनन्द करै है ॥५६॥ इति श्रीमत्पण्डितपरमसुख तनयपण्डितकेशवप्रसादशर्म्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायां कार्त्तिककृष्णैकादशीरमाकथा समाप्ता ॥ २३ ॥

अपनी बाईं ओर बैठाय लेत भयो । वह चन्द्रभागा बडे हर्षते पतिसों शुभ वचन बोलत भई ॥४५॥ हे कांत ! हितवचन सुनिये जो पुण्य मोमें विद्यमान हैं जब मैं पिताके घरमें आठ वर्षते अधिक भई ॥४६॥ मैं तबसों लगाके एकादशीको व्रत श्रद्धायुक्त मनते यथोक्त विधिपूर्वक कियो हैं ॥४७॥ ता पुण्यके प्रभावसों तुम्हारा पुर ध्रुव होजायगो और कल्पके क्षय पर्यंत सब कामनासों भरो पूरो रहैगा ॥४८॥ हे नृप शार्दूल ! या प्रकार वह

शृणु कान्त हितं वाक्यं तत्पुण्यं विद्यते मयि ॥ अष्टवर्षाधिका जाता यदाऽहं पितृवेश्मनि ॥ ४६ ॥ मया ततः प्रभृति च कृत मेकादशीव्रतम् ॥ यथोक्तविधिसंयुक्तं श्रद्धायुक्तेन चेतसा ॥ ४७ ॥ तेन पुण्यप्रभावेण भविष्यति पुरं ध्रुवम् ॥ सर्वकामसमृद्धं च यावदाभूतसंप्लवम् ॥ ४८ ॥ एवं सा नृपशार्दूल रमते पतिना सह ॥ दिव्यभोगा दिव्यरूपा दिव्याभरणभूषिता ॥ ४९ ॥ शोभनोऽपि तया सार्द्धं रमते दिव्यविग्रहः ॥ रमाव्रतप्रभावेण मन्दराचलसानुनि ॥ ५० ॥ चिन्तामणिसमा ह्येषा कामधेनुसमाऽथवा ॥ रमाभिधाना नृपते तवाग्रे कथिता मया ॥ ५१ ॥ ईदृशं च व्रतं राजन्ये कुर्वंति नरोत्तमाः ब्रह्महत्यादिपापानि नाशं यान्ति न संशयः ॥ ५२ ॥

पतिके साथ रमण करती दिव्य वाको भोग हो और दिव्यही रूप हो और दिव्यही आभूषण करिके भूषित हो ॥४९॥ और दिव्य हैं विग्रह जाको ऐसो शोभन रमाके व्रतके प्रभाव करिके मन्दराचलके शिखरपर वाके साथ विहार करत भयो ॥५०॥ यह रमानाम चिंतामणिके समान है अथवा कामधेनुके तुल्य है हे नृप ! मैंने तुम्हारे आगे कही॥५१॥जे उत्तम मनुष्य या प्रकारको व्रत करै हैं तिनके ब्रह्महत्या आदि सबपाप नाशको प्राप्त होय

यामें सन्देह नहीं है ॥५२॥ दोनों पक्षकी एकादशीनके व्रतनमें जैसी कृष्णपक्षकी है वैसेही शुक्लपक्षकी है तिथिनको भेद नहीं करै ॥५३॥ सेवन करी गई एकादशी मनुष्यको भुक्ति मुक्तिकी देनहारीहै, जैसे काली गौ तथा सफेद दोनोंको दूध एकसो होय है॥५४॥तैसेही दोनों एकादशी तुल्य फलकी देनहारी हैं

एकादशीव्रतानां च पक्षयोरुभयोरपि ॥ यथा शुक्ला तथा कृष्णा तिथिभेदं न कारयेत् ॥ ५३ ॥ सेवितैकादशी नृणां भुक्ति मुक्तिप्रदायिनी ॥ धेनुः कृष्णा यथा श्वेत उभयोः सदृशं पयः ॥ ५४ ॥ तथैव तुल्यफलदं स्मृतमेकादशीव्रतम् ॥ एकादशी व्रतानां च माहात्म्यं शृणुयान्नरः ॥ ५५ ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ५६ ॥ इति श्रीब्रह्मवैवर्त्तपुराणे कार्तिककृष्णै कादशी रमामाहात्म्यं समाप्तम् ॥ २३ ॥

एकादशीके जे माहात्म्य हैं तिनको जो सुनै है ॥५५॥ वह सब पापनते छूटिके विष्णलोकमें आनन्द करै है ॥५६॥ इति श्रीमत्पण्डितपरमसुख वनयपण्डितकेशवप्रसादशर्म्मद्विवेदिकृतायामेकादशीमाहात्म्यभाषाटीकायां दीपिकासमाख्यायां कार्त्तिककृष्णैकादशीरमाकथा समाप्ता ॥ २३ ॥

अथ कार्त्तिकशुक्लैकादशीप्रबोधिनीकथा ॥ ऊर्जाऽपरदले या तु बोधिन्येकादशी स्मृता ॥ तन्माहात्म्यस्य भाषायां टीकां वच्मि मनोहराम् ॥१॥ ब्रह्मा बोले—कि, प्रबोधिनी जो एकादशी है ताको माहात्म्य पापनको नाश करनहारो और पुण्यको बढावनहारो है और सुबुद्धि मनुष्यनके मुक्तिको देनहारो हैं हे मुनिश्रेष्ठ ! ताहि सुनिये ॥१॥ हे विप्रेन्द्र ! पृथ्वीमें तबहिलों गंगभागीरथी गर्जे हैं जबलों कार्तिकमें पापनकी नाश करनहारी हरिबोधिनी तिथि नहीं आवै हैं ॥२॥ और तबहीलों समुद्रपर्यंत तीर्थ और सर गर्जे हैं जबताईं कार्तिकमें विष्णुकी प्रबोधिनी तिथि नहीं आवै

अथ कार्त्तिकशुक्लैकादशीकथा ॥ ब्रह्मोवाच ॥ प्रबोधिन्याश्च माहात्म्यं पापघ्नं पुण्यवर्धनम् ॥ मुक्तिप्रदं सुबुद्धीनां शृणुष्व मुनिसत्तम ॥१॥ तावद्गर्जति विप्रेन्द्र गङ्गा भागीरथी क्षितौ ॥ यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी ॥ २ ॥ तावद्गर्जति तीर्थानि ह्यासमुद्रं सरांसि च ॥ यावत्प्रबोधिनी विष्णोस्तिथिर्नायाति कार्त्तिकी ॥३॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥ एकेनैवोपवासेन प्रबोधिन्यां लभेन्नरः ॥ ४ ॥ नारद उवाच ॥ एकभुक्तेन किं पुण्यं किं पुण्यं नक्तभोजने ॥ उपवासेन किं पुण्यं तन्मे ब्रूहि पितामह ॥ ५ ॥ ब्रह्मोवाच ॥ एकभुक्तेन जन्मभोत्थं नक्तेन द्विजनुर्भवम् ॥ सप्तजन्मभवं पापमुपवासेन नश्यति ॥६॥

॥ ३ ॥ हजार अश्वमेधको और राजसूययज्ञनको फल मनुष्य एक ही प्रबोधिनीके व्रतसों प्राप्त होय है ॥ ४ ॥ नारद बोले—कि, एकबार भोजन करनेसों और रात्रिमें भोजन करनेसों तथा उपवास करनेसों कहा पुण्य होय है हे पितामह ! सो मोसों कहिये ॥ ५ ॥ ब्रह्मा बोले—कि, एकबार भोजन करनेसों एक जन्मको और रात्रिके भोजनसों दो जन्मको और उपवास करनेसों सात जन्मको पाप दूरि होजाय है ॥ ६ ॥

और जो दुर्लभ हैं और अप्राप्य है और जो त्रिलोकीमें नहीं दृष्टिगोचर है और हे पुत्र ! जो अप्रार्थित है ताको हरिबोधनी देय है ॥७॥ मेरु तथा मंदराचलके प्रमाणते पाप हैं उन सबको यह पापहारिणी भस्म करि देय है ॥८॥ हजार पूर्वले जन्मन करिके जो दुष्कर्म इकट्ठो कियो है वह प्रबोधिनीके रात्रि जागरणसों रुईके ढेरके समान भस्म होजाय है॥९॥हे मुनिशार्दूल!जो मनुष्य स्वभावहीसों विधिपूर्वक प्रबोधिनीकोव्रतकरै है

यद्दुर्लभं यदप्राप्यं त्रैलोक्ये न तु गोचरम् ॥ यदप्यप्रार्थितं पुत्रददाति हरिबोधिनी ॥७॥ मेरुमन्दरमात्राणि पापान्युग्राणि यानि तु ॥ एकेनैवोपवासेन दहते पापहारिणी ॥ ८ ॥ पूर्वजन्मसहस्रैस्तु यद्दुष्कर्म उपार्जितम् ॥ जागरेण प्रबोधिन्यां दहते तूलराशिवत् ॥ ९ ॥ उपवासं प्रबोधिन्यां यः करोति स्वभावतः ॥ विधिवन्मुनिशार्दूल यथोक्तं लभते फलम् ॥ १० ॥ यथोक्तं सुकृतं यस्तु विधिवत्कुरुते नरः ॥ स्वल्पं मुनिवरश्रेष्ठ मेरुतुल्यं भवेत्फलम् ॥ ११ ॥ विधिहीनं तु यः कुर्यात्सुकृतं मेरुमात्रकम् ॥ अणुमात्रं न चाप्नोति फलं धर्मस्य नारद ॥ १२ ॥ सन्ध्याहीने व्रतभ्रष्टे नास्तिके वेदनिन्दके ॥ नैतेषां तिष्ठते देहे धर्मशास्त्रविदूषके ॥१३॥ परदाररते मूर्खे कृतघ्ने बन्धके तथा ॥ धर्मो न तिष्ठते देहे एतेषामपि देहिनाम् ॥ १४ ॥

वह यथोक्त फलको प्राप्त होय है॥१०॥जो मनुष्य यथोक्त सुकृतको विधिपूर्वक करैहै हे मुनिश्रेष्ठ ! वह मेरुके थोरेहू तुल्य फल होय है॥११॥और जो विधिहीन कियो जाय है वह मेरुके प्रमाणहू हे नारद!वह अणुमात्रहू धर्मको फल नहीं मिले है॥१२॥ संध्याहीनमें व्रतभ्रष्टमें नास्तिकमें वेदनके निंदकमें और धर्मशास्त्रके दूषण देनहारेमें॥१३॥पराई स्त्रीसों भोग करनहारेमें मूर्ख कृतघ्नी वंचकमें इन देहियोंको देहमें धर्म नहीं स्थित होय है ॥१४॥

ब्राह्मण हो अथवा शूद्र हो पराई स्त्रीको सेवन करै है और विशेष करि ब्राह्मणीको तो वे दोनों चांडालके समान हैं ॥ १५ ॥ पतियुक्त होय वा विधवा हो ऐसी ब्राह्मणीको जो ब्राह्मण सेवन करै है हे मुनिशार्दूल ! वह वंशसमेत क्षयको प्राप्त होय है ॥१६॥ जो अधम ब्राह्मण पराई स्त्रीसों गमन करै है वाके संतति नहीं होय है और जन्मभरको इकट्ठो कियो भयो पुण्य नष्ट हो जाय है ॥ १७॥ जो गुरुके और ब्राह्मणके साथ अहंका

ब्राह्मणीं वापि शुद्रो वा सेवते परयोषितम् ॥ ब्राह्मणीं च विशेषेण चाण्डलसदृशावुभौ ॥ १५ ॥ सभर्तृकां वा विधवां ब्राह्मणीं ब्राह्मणो यदि ॥ सेवते मुनिशार्दूल सान्वयो याति संक्षयम् ॥ १६ ॥ परदाराभिगमनं कुरुते यो द्विजाधमः ॥ सन्ततिर्न भवेत्तस्य फलं जन्मार्जितं नहि ॥ १७ ॥ गुरुणा सह विप्रैश्च योऽहंकारेण वर्तते ॥ सुकृतं नश्यते शीघ्रं धनं नाप्नोति सन्ततिम् ॥ १८ ॥ आचारभ्रष्टदेहानां वृषलीगामिना तथा ॥ दुर्जनं सेवमानानां धर्मस्तेषां पराङ्मुखः ॥ १९ ॥ पतितैः सह संगं च तद्गृहे गमनं तथा ॥ ये कुर्वन्ति नृपश्रेष्ठ ते गच्छन्ति यमालये ॥ २० ॥ धर्मो नष्टो नृणां येषां स्वागतासनभोजनैः ॥ तेषां वै नश्यते वत्स कीर्तिरायुः प्रजास्सुखम् ॥ २१ ॥

रसों वर्ते ताको सुकृत शीघ्रही नष्ट हो और वह धन तथा संततिको नहीं प्राप्त होय है ॥ १८ ॥जिनके देह आचारते भ्रष्ट हैं और जे चांडालीमें गमन करै हैं और जे दुष्टनकी सेवा करैं इन सबको धर्म नष्ट होजाय है ॥ १९ ॥ जे पतित मनुष्यनको संग करै हैं और उनके घरमें जायँ हैं वे यमलोकमें जायँ हैं ॥ २० ॥ स्वागत आसन और भोजन करिके जिन मनुष्यनको धर्म नष्ट होगयो है हे वत्स ! कीर्ति आयु संतति और

सुख नाशको प्राप्त होय हैं ॥ २१ ॥ जे अधम नर साधुको अपमान करै हैं वे त्रिवर्ग अर्थात् धर्म, अर्थ कामसों रहित हो नरकरूप अग्नि करिके जराये जाते हैं ॥ २२॥ जे अधम साधुनको अपमान करिके प्रसन्न होय हैं और जे मूर्ख उनको मने नहीं करै हैं वे कुलक्षयको देखै हैं ॥२३॥ जाको देह आचारते भ्रष्ट हैं और जो चुगल है वह दान करै तथा होम करै ताहूपै वाकी गति नहीं होय हैं ॥२४॥ तातें किञ्चित् भी लोकमें

साधूनामपमानं तु ये कुर्वन्ति नराधमाः ॥ त्रिवर्गफलहीनास्ते दह्यन्ते नरकाग्निना ॥ २२ ॥ कृत्वाऽवमानं साधूनां ये हृष्यन्ति नराधमाः ॥ वारयन्ति न ये मूढास्ते पश्यन्ति कुलक्षयम् ॥२३॥ आचारभ्रष्टदेहस्य पिशुनस्य शठस्य च ॥ ददतो जुह्वतो वापि गतिस्तस्य न विद्यते ॥ २४ ॥ तस्मान्नत्वाचरेत्किञ्चिदशुभं लोकगर्हितम् ॥ सदाचारवता भाव्यं यथा धर्मो न नश्यति ॥ २५ ॥ ये ध्यायन्ति मनोवृत्त्या करिष्यामः प्रबोधिनीम् ॥ तेषां विलीयते पापं पूर्वजन्मशतोद्भवम् ॥ २६ ॥ समतीतं भविष्यं च वर्तमानं कुलायुतम् ॥ विष्णुलोकं नयत्याशु प्रबोधिन्यां तु जागरे ॥ २७ ॥ वसन्ति पितरो हृष्टा विष्णुलोकेऽत्य लंकृताः ॥ विमुक्ता नारकैर्दुःखैः पूर्वकर्मसमुद्भवैः ॥ २८ ॥

निंदित अशुभ कर्म न करैं सदाचारवान् होय जाते धर्मको नाश न होय ॥२५॥ जो अपने मनमें ऐसो सोचे हैं कि, हम प्रबोधिनीको व्रत करैं उनको पहले सौ जन्मनको पाप नाशको प्राप्त होय हैं ॥ २६ ॥ प्रबोधिनीकी रात्रि. जो जागरण करै है वह पिछले अगले और वर्तमान दश हजार कुलनको विष्णुलोकमें पहुँचाय देय है ॥ २७ ॥ वाके पितर कर्मसों उत्पन्न भये नरकके दुःखनते छूटिकै प्रसन्न और अति

अलंकृत हो विष्णुके लोकमें वास करैं हैं ॥ २८ ॥ मनुष्य ब्रह्महत्या आदि घोरपाप करिके जो प्रबोधिनीकी रात्रिमें जागरण करै हैं वाके सब पाप छूटि जायँ हैं ॥२९॥ जो फल सुन्दर अश्वमेध आदि यज्ञनसों बडी कठिनाईते मिलै है वह फल प्रबोधिनीरात्रिमें जागरण करनेसों सहज हीमें प्राप्त होय हैं ॥ ३० ॥ सब तीर्थनमें स्नान करिके और गौ, सुवर्ण करिके तथा भूमि देकै वा फलको नहीं प्राप्त होयहैं जो हरिको जागरण

कृत्वा तु पातकं घोरं ब्रह्महत्यादिकं नरः ॥ कृत्वा तु जागरं विष्णोर्धौतपापो भवेन्मुने ॥ २९ ॥ दुष्प्राप्यं यत्फलं स्यैरश्वमेधादिभिर्मखैः ॥ प्राप्यते तत्सुखेनैव प्रबोधिन्यां तु जागरे ॥ ३० ॥ आप्लुत्य सर्वतीर्थेषु दत्त्वा गाः काञ्चनं महीम् ॥ न तत्फलमवाप्नोति यत्कृत्वा जागरं हरेः ॥३१॥ जातः स एव सुकृती कुलं तेनैव पावितम् ॥ कार्तिके मुनिशार्दूल कृता येन प्रबोधिनी ॥ ३२ ॥ यथा ध्रुवं नृणां मृत्युर्धननाशस्तथा ध्रुवम् ॥ इति ज्ञात्वा मुनिश्रेष्ठ कर्तव्यं वैष्णवं दिनम् ॥ ३३ ॥ यानि कानि च तीर्थानि त्रैलोक्ये सम्भवन्ति च ॥ तानि तस्य गृहे सम्यग्यः करोति प्रबोधिनीम् ॥ ३४ ॥ सर्वकृत्यं परित्यज्य तुष्ट्यर्थं चक्रपाणिनः ॥ उपोष्यैकादशी रम्या कार्त्तिके हरिबोधिनी ॥ ३५ ॥

करनेसों मिलै है ॥३१॥ वही सुकृती उत्पन्न हुआ और वाहीने अपनो कुल तारो है हे मुनिशार्दूल ! जाने कार्तिकमें प्रबोधिनी एकादशीको व्रत कियो ॥३२॥ जैसे मनुष्यनको नाश ध्रुव कहिये निश्चित हैं तैसे धनको नाश निश्चित है हे मुनिश्रेष्ठ ! या बातको जानिके वैष्णवदिनको व्रत करनो योग्य है ॥ ३३ ॥ तीनों लोकनमें जे कोई तीर्थ हैं वे सब प्रबोधिनी करनहारेके घरमें वास करै हैं ॥ ३४ ॥ सब कर्मनको छोडि चक्रपाणिकी

प्रसन्नताके अर्थ कार्तिकमें हरिकी बो धनी एकादशीको व्रत करनो योग्य है ।। ३५ ।। वही ज्ञानी है, वही योगी है, वही तपस्वी हैं और वही जितेंद्रिय है और वाहीको भोग तथा मोक्ष है जो हरिबोधिनीको व्रत करै है ॥ ३६ ।। धर्मनके सारकी देनहारी यह एकादशी विष्णुकी अत्यंत प्यारी है एकबार याका व्रत करिके मनुष्य मुक्तिको भागी होय है ।। ३७ ।। प्रबोधिनीको व्रत करिके मनुष्य गर्भमें नहीं प्रवेश करै हैं हे नारद !

स ज्ञानी स च योगी च स तपस्वी जितेन्द्रियः ॥ भोगो मोक्षश्च तस्यास्ति ह्युपास्ते हरिबोधिनीम् ॥ ३६ ॥ विष्णुप्रियतरा ह्येषा धर्मसारस्य दायिनी ॥ सकृदेनामुपोष्यैव मुक्तिभाक्च भवेन्नरः ॥ ३७ ॥ प्रबोधिनीमुपोषित्वा न गर्भे विशते नरः ॥ सर्वधर्मान्परित्यज्य तस्मात्कुर्वीत नारद॥३८॥कर्मणा मनसा वाचा पापं यत्समुपार्जितम्॥तत्क्षालयति गोविन्दः प्रबोधिन्यां तु जागरे ॥ ३९ ॥ स्नानं दानं जपो होमः समुद्दिश्य जनार्दनम् ॥ नरैर्यत्क्रियते वत्स प्रबोधिन्यां तदक्षयम् ॥ ४० ॥ येऽर्चयन्ति नरास्तस्यां भक्त्या देवं च माधवम् ॥ समुपोष्य प्रमुच्यन्ते पापैस्ते शतजन्मभिः ॥ ४१ ॥

ताते सर्व धर्मनको त्याग करिकें याको व्रत करै ।। ३८ ॥ कर्म करिके मन करिके वचन करिके जो पाप संचित कियो है वाको प्रबोधिनीको जागरणसों हरि धोय देय हैं।। ३९ ॥ स्नान, दान, जप, होम जनार्दनके नामपैं प्रबोधिनीको दिन मनुष्य करिके कियो जाय है सो अक्षय होय है ॥ ४० ॥ जे मनुष्य वा एकादशीके दिन भक्तिसों माधवदेवको पूजन करैं हैं वे व्रतको करिके सौ जन्मके पापनते छूटि जायँ हैं ।। ४१ ॥

हे पुत्र ! यह बडो व्रत पापनके समूहको नाश करनहारो है यह जो विष्णुके प्रबोधको दिन है ताको व्रत विधिवत् करै ॥४२॥ या व्रतकरिके देवेश जो जनार्दन हैं तिनको संतुष्ट करिके सब दिशानको प्रकाशित करतो भयो हरिके धामको जाय है ॥४३॥ हे द्विपदोंमें श्रेष्ठ ! द्वादशीयुक्त यह कार्तिकमें प्रबोधिनी एकादशी कान्तिके चाहनेहारे पुरुषन करि यत्नसों करनी चाहिये॥४४॥हे वत्स ! बालकपनमें जवानीमें और बुढापेमें

महाव्रतमिदंपुत्र महापापौघनाशनम् ॥ प्रबोधवासरं विष्णोर्विधिवत्समुपोषयेत् ॥ ४२ ॥ व्रतेनानेन देवेशं परितोष्य जनार्दनम् ॥ विराजयन्दिशः सर्वाः प्रयाति भवनं हरेः ॥ ४३ ॥ कर्तव्यैषा प्रयत्नेन नरैः कांतिमभीप्सुभिः ॥ द्वादशी द्विपदां श्रेष्ठ कार्तिके तु प्रबोधिनीम् ॥ ४४ ॥ बाल्ये यच्चार्जितं वत्स यौवने वार्धके तथा ॥ शतजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥ ४५ ॥ शुष्कमार्द्रं मुनिश्रेष्ठ स्वगुह्यमपि नारद ॥ तत्क्षालयति गोविन्दमस्यामभ्यर्च्य भक्तितः ॥ ४६ ॥ धनधान्यवहा पुण्या सर्वपाप हरापरा ॥ तामुपोष्य हरेर्भक्त्या दुर्लभं न भवेत्क्वचित् ॥ ४७ ॥ चन्द्रसूर्योपरागे च यत्फलं परिकीर्तितम् ॥ तत्सहस्रगुणं प्रोक्तं प्रबोधिन्यां तु जागरात् ॥ ४८ ॥

जे पाप सौ जन्ममें इकट्ठे किये गये हैं थोडे होयँ वा बहु॥४५॥ हे मुनिश्रेष्ठ ! हे नारद ! सूखा गीला और अपने छिपाने योग्य जो पाप हैं ताको या एकादशीके दिन गोविंदको भक्तिसों पूजिके मनुष्य धोय देय ॥४६॥ धन धान्यकी देनहारी पवित्र और सब पापनकी उत्कृष्ट हरनहारी है ताको भक्तिसों व्रत करिके कुछ दुर्लभ नहीं ॥ ४७ ॥ चन्द्रमा और सूर्यके ग्रहणमें जो फल कह्यो है वाते हजार गुनो प्रबोधिनीके जागरणको

फल है ॥४८॥ स्नान, जप, होम, स्वाध्याय और हरिको पूजन प्रबोधिनीके दिन करनेते इन सबनको पुण्यफलकरि दुगुनो अधिक होय है ॥४९॥ जन्मसों लगाके मनुष्यन करि जो पुण्य इकट्ठो कियो है वह सब कार्तिककी एकादशीको व्रत न करनेसों वृथा होजाय है ॥ ५० ॥ विष्णुको नियम विना किये जो मनुष्य कार्तिकको व्यतीत करै है हे नारद ! वह सब जन्मभरिके जोरे भये पुण्यके फलको नहीं प्राप्त होय है ॥५१॥

स्नानं दानं जपो होमः स्वाध्यायोऽभ्यर्चनं हरेः॥तत्सर्वं कोटितुल्यं तु प्रबोधिन्यां तु यत्कृतम् ॥ ४९ ॥ जन्मप्रभृति यत्पुण्यं नरेणाभ्यर्जितं भवेत् ॥ वृथा भवति तत्सर्वमकृत्वा कार्तिकव्रतम् ॥ ५० ॥ अकृत्वा नियमं विष्णोः कार्तिकं यः क्षिपेन्नरः ॥ जन्मार्जितस्य पुण्यस्य फलं नाप्नोति नारद ॥ ५१ ॥ तस्मात्त्वया प्रयत्नेन देवदेवो जनार्दनः ॥ उपासनीयो विप्रेन्द्र सर्वकामफलप्रदः ॥ ५२ ॥ परान्नं वर्जयेद्यस्तु कार्तिके विष्णुतत्परः ॥ परान्नवर्जनाद्धत्स चान्द्रायणफलं लभेत् ॥ ५३ ॥ न तथा तुष्यते यज्ञैर्न दानैर्वा गजादिभिः ॥ यथा शास्त्रकथालापैः कार्तिके मधुसूदनः ॥ ५४ ॥ ये कुर्वंति कथां विष्णोर्ये शृण्वन्ति समाहिताः ॥ श्लोकं वा श्लोकपादं वा कार्तिके गोशतं फलम् ॥ ५५ ॥

हे विप्रेंद्र ! याते तुम करिके यत्नसों सब कामनाओंके फलके देनहारे देवदेव जनार्दनकी उपासना करने योग्य है ॥ ५२ ॥ जो विष्णुतत्पर मनुष्य कार्तिकमें पराये अन्नको त्याग करै है तो वह पराये अन्नके त्यागसों चांद्रायणव्रतके फलको प्राप्त होय है ॥ ५३ ॥ कार्तिकमें जैसे भगवान् मधुसूदन शास्त्रकी कथाओंके कहनेसों होय हैं तैसे यज्ञनसों घोडे और हाथिनके दानसों नहीं प्रसन्न होय है ॥ ५४ ॥ जे कार्तिकमें विष्णुकी कथाको

एक श्लोक वा आधा श्लोक कहै है और सावधान होके सुने है वे सौ गोदानके फलको प्राप्त होय है ॥ ५५ ॥ कार्तिकके महीनेमें सब धर्मोंको छोड़िके मेरे आगे सदा मनुष्यन करि शास्त्रको अवधारण और श्रवण करनो चाहिये ॥५६॥ हे मुनिशार्दूल ! कल्याणको लोभकी बुद्धिसों जो मनुष्य कार्तिकमें हरिकथाको कहै हैं वह अपने सौ कुल तारै है ॥५७॥ जो मनुष्य नित्य शास्त्रके विनोदसों कार्तिकमासको व्यतीत करै है वह सब

सर्वधर्मान्परित्यज्य ममाग्रे कार्तिके नरैः ॥ शास्त्रावधारणं कार्यं श्रोतव्यं च सदा मुने ॥ ५६ ॥ श्रेयसां लोभबुद्ध्या वा यः करोति हरेः कथाम् ॥ कार्तिके मुनिशार्दूल कुलानां तारयेच्छतम् ॥ ५७ ॥ नित्यं शास्त्रविनोदेन कार्तिकं यः क्षिपेन्नरः ॥ निर्दहेत्सर्वपापानि यज्ञायुतफलं लभेत् ॥ ५८ ॥ नियमेन नरो यस्तु शृणुते वैष्णवीं कथाम् ॥ कार्तिके तु विशेषेण गोसहस्रफलं लभेत् ॥ ॥ ५९ ॥ प्रबोधवासरे विष्णोः कुरुते यो हरेः कथाम् ॥ सप्तद्वीपवतीदाने तत्फलं लभते मुने ॥ ६० ॥ श्रुत्वा विष्णुकथां दिव्यां येऽर्चयन्ति कथाविदम् ॥ स्वशक्त्या मुनिशार्दूल तेषां लोकाः सनातनाः ॥ ६१ ॥

पापनको जला देय है और दशहजार यज्ञके फलनको प्राप्त होय हैं ॥५८॥ जो मनुष्य नियम करिके हरिकी कथाको सुने है सो विशेष करिके कार्तिकमें सहस्र गोदानके फलनके प्राप्त होय हैं ॥५९॥ विष्णुके प्रबोधदिनमें जो हरिकी कथा कहै हे मुने ! वह सात द्वीपन करि युक्त भूमिमें दानको फल पावै हैं ॥ ६० ॥ जे मनुष्य दिव्य विष्णुकी कथाको सुनिके कथा बाँचनेवालेको अपनी शक्तिके अनुसार पूजन करैं हैं हे मुनिशार्दूल !

उनको सनातन लोक प्राप्त होय हैं ॥६१॥ ब्रह्माको वचन सुनिके नारद फिर बोलत भये, नारद बोले–कि, हे स्वामिन् ! हे सुरोत्तम ! मोसों एकादशीको विधान कहो ॥६२॥ हे भगवन् ! जाके करनेसों जैसो फल प्राप्त होय है । नारदको वह वचन सुनिके ब्रह्मा वचन बोलत भये॥६३॥ ब्रह्मा बोले–कि हे द्विजोत्तम ! एकादशीको ब्राह्म मुहूर्त कहिये दो घडी रात्रि रहे उठि दंतधावन करिके स्नान करनो चाहिये ॥६४॥ नदीमें वा

ब्रह्मणो वचनं श्रुत्वा नरदः पुनरब्रवीत् ॥ नारद उवाच ॥ विधानं ब्रूहि मे स्वामिन्नेकादश्याः सुरोत्तम ॥ ६२ ॥ चीर्णेन येन भगवन्याहृशं फलमाप्नुयात् ॥ नारदस्यवचः श्रुत्वा ब्रह्मा वचनमब्रवीत्॥६३ ॥ ब्रह्मोवाच ॥ ब्राह्मे मुहूर्ते चोत्थाय ह्येकादश्यां द्विजोत्तम ॥ स्नानं चैव प्रकर्त्तव्यं दंतधावनपूर्वकम् ॥ ६४ ॥ नद्यां तड़ागे कूपे वा वाप्यां गेहे तथैव च ॥ केशवश्चैव संपूज्यः कथायाः श्रवणं तथा ॥ ६५ ॥ नियमार्थं महाभाग इमं मंत्रमुदीरयेत् ॥ एकादश्यां निराहारः स्थित्वाऽहनि परे ह्यहम्॥६६॥ भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत॥अमुं मन्त्रं समुच्चार्य देवदेवस्य चक्रिणः ॥६७॥ भक्तिभावेन तुष्टात्मा ह्युपवासं समर्पयेत् ॥ रात्रौ जागरणं कार्यं देवदेवस्य सन्निधौ ॥ ६८ ॥

कूपमें अथवा बावडीमें तथा घरमें फिरि केशवको पूजन और कथाको श्रवण करै ॥६५॥ और हे महाभाग ! नियमके अर्थ यह श्लोक पढै मैं एकादशीके दिन निराहाररहिके द्वादशीके दिन ॥६६॥ भोजन करौगो, हे पुंडरीकाक्ष ! हे अच्युत ! मेरे रक्षक होउ, देवदेव जे चक्री भगवान् हैं तिनके आगे या मंत्रको उच्चारण करै ॥६७॥ फिरि भक्तिभावसों तुष्टात्मा होके उपवासको समर्पण करै फिरि देवदेवके समीप रात्रिमें जागरण करै ॥६८॥

हे मुने ! जो गीत नृत्य वाद्य और कृष्णकी कथाको करै है वह पुण्यात्मा त्रिलोकीके ऊपर स्थित है ॥६९॥ बहुतसे फूलों और फलन करिके और कपूर अगर कुम्कुम करिके कार्तिकमें बोधनीके दिन हरिकी पूजा करनी चाहिये ॥७०॥ हरिवासरके प्राप्त होनेपै धनको लोभ न करै हे मुनिसत्तम ! जाते असंख्य पुण्य प्राप्त होय हैं ॥७१॥ प्रबोधिनीमें जागरणके समय नानाप्रकारके दिव्य फलनसों पूजन करै और शंखमें जल लेके जनार्दनको

गीतं नृत्यं च वाद्यं च तथा कृष्णकथां मुने ॥ यः करोति स पुण्यात्मा त्रैलोक्योपरि संस्थितः ॥ ६९ ॥ बहुपुष्पैर्बहुफलैः कर्पूरागुरुकुङ्कुमैः ॥ हरेः पूजा विधातव्या कार्तिक्यां बोधवासरे ॥७०॥ वित्तशाठ्यं न कर्त्तव्यं संप्राप्ते हरिवासरे ॥ यस्मात्पुण्यमसंख्यातं प्राप्यते मुनिसत्तम ॥ ७१ ॥ फलैर्नानाविधैर्दिव्यैः प्रबोधिन्यां तु जागरे ॥ शङ्खे तोयं समादाय ह्यर्घो देयो जनार्दने ॥ ७२ ॥ यत्फलं सर्वतीर्थेषु सर्वदानेषु यत्फलम् तत्फलं कोटिगुणितं दत्त्वार्घं बोधवासरे ॥७३॥ अगस्त्यकुसुमैर्दिव्यैः पूजयेद्यो जनार्दनम् ॥ देवेन्द्रोपि मुनिश्रेष्ठ करोति करसंपुटम् ॥ ७४ ॥ न तत्करोति विप्रेन्द्र तपसा तोषितो हरिः ॥ यत्करोति हृषीकेशो मुनिपुष्पैरलंकृतः ॥७५॥ बिल्वपत्रैश्च ये कृष्णं कार्त्तिके कलिवर्धन ॥ पूजयन्ति महाभक्त्या मुक्तिस्तेषां मयोदिता॥७६॥

अर्घ देनो चाहिये ॥७२॥ जो फल सब तीर्थनमें और जो फल सब दाननमें हैं वाते करोड गुणोफल बोधक दिनमें प्राप्त होय है ॥ ७३ ॥ जो दिव्य अगस्त्यके फूलनसों पूजन जनार्दनको करै है तो वाके आगे हे मुनिश्रेष्ठ ! देवेंद्रहू हाथ जोरे है ॥ ७४ ॥ हे विप्रेंद्र ! तप करिके सन्तुष्ट किये गये हरि वह नहीं करते हैं जो अगस्त्यके पुष्पनसों शोभित हृषीकेश भगवान् करैं हैं ॥ ७५ ॥ हे कलिवर्द्धन ! जे कार्त्तिकमें बडी भक्तिसों

बिल्वपत्रन करिके कृष्णको पूजन करै हैं उनको मेरी कही मुक्ति मिले है ॥ ७६ ॥ जे कार्तिकमें तुलसीदलन करिके और पुष्पन करिके जना र्दनको पूजन करै हैं हे वत्स ! वे दशहजार जन्मको सब पाप जलाय देय हैं ॥ ७७ ॥ देखी गई स्पर्श करी अथवा ध्यान करी गई नमस्कार करी गई स्तुती करी गई तुलसी शुभकी देनहारी है ॥७८॥ जे नवप्रकारकी तुलसीकी भक्ति नित दिन करै हैं वे कोटि हजार युगों ताईं हरिके

तुलसीदलपुष्पैश्च पूजयंति जनार्दनम् ॥ कार्त्तिके सकलं वत्स पापं जन्मायुतं दहेत् ॥७७॥ दृष्टा स्पृष्टाऽथवा ध्याता कीर्तिता नमिता स्तुता ॥ रोपिता सेचिता नित्यं पूजिता तुलसी शुभा ॥ ७८ ॥ नवधा तुलसीभक्तिं ये कुर्वंति दिनेदिने ॥ युगकोटि सहस्राणि ते वसंति हरेर्गृहे ॥ ७९ ॥ रोपिता तुलसी यावत्कुरुते मूलविस्तरम् ॥ यावद्युगसहस्राणि तनोति सुकृतं मुने ॥८०॥ यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैर्मुने ॥ रोपिता तुलसी पुंभिर्वर्धते वसुधातले ॥८१॥ कुले तेषां तु ये जाता ये भविष्यंति ये गताः ॥ आकल्पयुगसाहस्रं तेषां वासो हरेर्गृहे ॥ ८२ ॥

मन्दिरमें वास करैं हैं ॥७९॥ लगाई भई तुलसी जितनी जडनको विस्तार करै है हे मुने ! उतने हजार युगलों सुकृतको विस्तारित करै है ॥ ॥ ८० ॥ हे मुने ! पुरुषों करि लगाई भई तुलसी जबताईं शाखा और प्रशाखा और बीज पुष्प और दलन करिके पृथ्वीमें बढै है ॥ ८१ ॥ उन लगावनहारे मनुष्यनके कुलमें जे उत्पन्न हैं और होयँगे और जे होगये हैं इनको दो हजार कल्पता हरिके घरमें वास होय है ॥ ८२ ॥

जे नर कदंबके फूलनसों जनार्दनदेवको पूजन करै हैं उनको चक्रपाणिके प्रसादसों यमको घर नहीं मिलै है ॥८३॥ कदंबके फूलनको देखिकै केशव भगवान् प्रसन्न होय हैं हे विप्र ! पूजाकरनेसे सब कामनाओंके देनहारे हरि प्रसन्न होयँ तो फिर क्या कहनो है ॥८४॥ जो फिरी वसंतऋतुमें पाटलाके फूलन करिके परम भक्तिसों गरुडध्वजको पूजन करै है वह निश्चय मुक्तिको भागी होय है ॥८५॥ बकुल और अशोकके फूलनसों जे

कदम्बकुसुमैर्देवं येऽर्चयन्ति जनार्दनम् ॥ तेषां यमालयो नैव प्रसादाच्चक्रपाणिनः ॥ ८३ ॥ दृष्ट्वा कदम्बकुसुमं प्रीतो भवति केशवः ॥ किं पुनः पूजितो विप्र सर्वकामप्रदो हरिः ॥८४। यः पुनः पाटलापुष्पैर्वसन्ते गरुडध्वजम् ॥ अर्चयेत्परया भक्त्या मुक्तिभागी भवेद्धि सः ॥ ८५ ॥ बकुलाशोककुसुमैर्येऽर्चयन्ति जगत्पतिम् ॥ विशोकास्ते भविष्यंति यावच्चन्द्रदिवाकरौ ॥८६॥ येऽर्चयन्ति जगन्नाथं करवीरैः सितासितैः ॥ चतुर्युगानि विप्रेन्द्र प्रीतो भवति केशवः ॥ ८७ ॥ मञ्जरीं सहकारस्य केशवोपरि ये नराः ॥ यच्छंति ते महाभागा गोकोटिफलभागिनः ॥ ८८ ॥ दूर्वांकुरैर्हरेर्यस्तु पूजाकाले प्रयच्छति ॥ पूजाफलं शतगुणं सम्यगाप्नोति मानवः ॥ ८९ ॥

एतदन्यच्चयत्किंचित्तत्त्वंब्रूहितपोधन ॥ अनापृष्टमपिब्रूयुः साधवोदीनवत्सलाः ॥ ३१ ॥ नरायेभुविजायंतेपरभाग्यानुवर्तिनः ॥ दारिद्र्यपीडितानित्यंरोगिणः पुत्रकांक्षिणः ॥ ३२ ॥ जडामूकादांभिकाश्चहीनविद्याःकुचैलिनः ॥ नास्तिकालंपटानीचाजर्जराःपरसेविनः ॥ ३३ ॥ नष्टाशाभग्नसंकल्पाःक्षीणसत्त्वाःकुरूपिणः ॥ रोगिणःकुष्ठिनोव्यंगानेत्रहीनाश्चकेचन ॥ ३४ ॥ इष्टमित्रकलत्राप्तपितृमातृवियोगिनः ॥ शोकदुःखादिशुष्कांगाःस्वेष्टवस्तुविवर्जिताः ॥ ३५ ॥ पुनर्नैवंविधास्तेस्युर्यत्कृतेनश्रुतेनच ॥ पठितेनानुचीर्णेनतद्वदस्वममप्रभो ॥ ३६ ॥ वैधव्यवंध्यतादोषहीनांगत्वदुराधयः ॥ रक्तपित्ताद्यपस्माराराजयक्ष्मादयश्चये ॥ ३७ ॥ एतैर्दोषसमूहैश्चदुःखितान्वीक्ष्यमानवान् ॥ दुःखितोऽस्मिजगन्नाथकृपांकृत्वाममोपरि ॥ ३८ ॥ विस्तरेणवदब्रह्मन्मन्मनोमोदहेतुकम् ॥ सर्वज्ञःसर्वतत्त्वानांनिधानंत्वमसिप्रभो ॥ ३९ ॥ ॥ सूतउवाच ॥ ॥ इतिविधितनयोदितंरसालंजनहितहेतुनिशम्यदेवदेवः ॥ अभिनद्घनरावरम्यवाचाऽवददभिपूज्य मुनिंसुधांशुशांतम् ॥ ४० ॥ इति श्रीबृहन्नारदीयेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेप्रश्नविधिर्नामद्वितीयोऽध्यायः ॥ २ ॥
॥ ऋषयऊचुः ॥ ॥ नारायणोनरसखोयदुवाचशुभंवचः ॥ नारदायमहाभागतन्नोवदसविस्तरम् ॥ १ ॥ ॥ सूतउवाच ॥ ॥ नारायणवचोरम्यंश्रूयतांद्विजसत्तमाः ॥ यदुक्तंनारदायैतत्प्रवक्ष्यामियथाश्रुतम् ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्यामियदुक्तंहरिणापुरा ॥ राज्ञेयुधिष्ठिरायैवश्रीकृष्णेनमहात्मना ॥ ३ ॥ एकदाधार्मिकोराजाऽजातशत्रुर्युधिष्ठिरः ॥ द्यूतेपराजितोदुष्टैर्धार्तराष्ट्रैश्छलप्रियैः ॥ ४ ॥ समक्षमग्निसंभूताकृष्णाधर्मपरायणा ॥ दुःशासनेनदुष्टेनकचेष्वादायकर्षिता ॥ ५ ॥ आकृष्टानिचवासांसिश्री

कृष्णेनसुरक्षिता ॥ पश्चाद्राज्यंपरित्यज्यप्रयाताःकाम्यकंवनम् ॥ ६ ॥ अत्यंतंक्लेशमापन्नाःपार्थावन्यफलाशिनः ॥ विष्वक्कचाचिताः
सर्वेगजाइववनौकसः ॥ ७ ॥ अथतान्दुःखितान्द्रष्टुंभगवान्देवकीसुतः ॥ जगामकाम्यकवनंमुनिभिःपरिवारितः ॥ ८ ॥ तंदृष्ट्वासहसोत्त
स्थुर्देहाःप्राणानिवागतान् ॥ पार्थाःसस्वजिरेप्रीत्याश्रीकृष्णंप्रेमविह्वलाः ॥ ९ ॥ तेचानीनमतांभक्त्यायमौहरिपदांबुजम् ॥ द्रौपदीतंनना
माशुशनैःशनैरतंद्रिता ॥ १० ॥ तान्दृष्ट्वादुःखितान्पार्थान्नीरवाजिनवाससः ॥ धूलिभिर्धूसरान्रूक्षान्सर्वतःकचसंवृतान् ॥ ११ ॥ पांचा
लीमपितन्वंगींतादृशींदुःखसंवृताम् ॥ तेषांदुःखमतीवोग्रंदृष्ट्वैवातीवदुःखितः ॥ १२ ॥ धार्तराष्ट्रान्दग्धुकामोभगवान्भक्तवत्सलः ॥ चक्रेको
पंसविश्वात्माभ्रूभंगकुटिलेक्षणः ॥ १३ ॥ कोटिकालकरालास्यःप्रलयाग्निरिवोत्थितः ॥ संदष्टौष्ठपुटःप्रोच्चैस्त्रिलोकींज्वलयन्निव ॥ १४ ॥
सीतावियोगसंतप्तःसाक्षाद्दाशरथिर्यथा ॥ तमालक्ष्यतदावीरोबीभत्सुर्जातवेपथुः ॥ १५ ॥ उत्थायकृष्णंतुष्टावबद्धांजलिपुटोभिया ॥ धर्मा
नुमोदितःशीघ्रंद्रौपद्याचतथापरैः ॥ १६ ॥ ॥ अर्जुनउवाच ॥ ॥ हेकृष्णजगतांनाथनाथनाहंजगद्बहिः ॥ त्वमेवजगतांपातामांनपा
सिकथंप्रभो ॥ १७ ॥ यच्चक्षुःपतनेनैवब्रह्मणःपतनंभवेत् ॥ तत्कोपेनभवेत्किंवाकोवेदाकिंभविष्यति ॥ १८ ॥ क्रोधंसंहरसंहर्तस्तात
तातजगत्पते ॥ त्वद्विधानांचकोपेनजगतःप्रलयोभवेत् ॥ १९ ॥ वंदेत्वांसर्वतत्त्वज्ञंसर्वकारणकारणम् ॥ वेदवेदांगबीजस्यबीजंश्रीकृष्ण
मीश्वरम् ॥ २० ॥ त्वमीश्वरोऽसृजःसर्वंजगदेतच्चराचरम् ॥ सर्वमंगलमांगल्यबीजरूपःसनातनः ॥ २१ ॥ सकथंस्वकृतंहन्याद्विश्वमेकापरा
धतः ॥ मशकान्भस्मसात्कर्तुंकोवादहतिमंदिरम् ॥ २२ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इतिविज्ञाप्यश्रीकृष्णंफाल्गुनःपरवीरहा ॥ बद्धांज

लिपुटोभूत्वाप्रणनामजनार्दनम् ॥ २३ ॥ सूतउवाच ॥ हरिःक्रोधंनिरस्याशुसौम्योभूच्चंद्रमाइव ॥ तमालक्ष्यतदासर्वेपांडवाःस्वास्थ्यमागताः ॥ २४ ॥ प्रीत्युत्फुल्लमुखाःसर्वेप्रणेमुःप्रेमविह्वलाः ॥ श्रीकृष्णंपूजयांचक्रुर्वन्यैर्मूलफलादिभिः ॥ २५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ ततःप्रसन्नंश्रीकृष्णंशरण्यंभक्तवत्सलम् ॥ विज्ञायावनतोभूत्वाबृहत्प्रेमपरिप्लुतः ॥ २६ ॥ बद्धांजलिर्गुडाकेशोनामंनामंपुनःपुनः ॥ तंतथाकृतवान्प्रश्नंयथापृच्छतियंभवान् ॥ २७ ॥ श्रुत्वैवंभगवान्दध्यौमुहूर्त्तंमनसाहरिः ॥ ध्यात्वाश्वास्यसुहृद्वर्गंपांचालींचधृतव्रताम् ॥ उवाचवदतांश्रेष्ठःपांडवनांहितंवचः ॥ २८ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुराजन्महाभागबीभत्सोह्यथमद्वचः ॥ अपूर्वोयंकृतः प्रश्नोनोत्तरंवक्तुमुत्सहे ॥ २९ ॥ एषगुह्यतरोलोकेऋषीणामपिदुर्घटः ॥ तथापिवक्ष्येमित्रत्वाद्भक्तत्वाच्चतवार्जुन ॥ ३० ॥ तदुत्तरमतीवोग्रंक्रमतःशृणुसुव्रत ॥ मध्वादयश्चयेमासालवपक्षाश्चनाडिकाः ॥ ३१ ॥ यामाश्चियामाऋतवोमुहूर्तान्ययनेउभे ॥ हायनंचयुगान्येवपराधांताःपरेचये ॥३२॥ नद्योर्णवह्रदाःकूपावापीपल्वलनिर्झराः ॥ लतौषधिद्रुमाश्चैवत्वक्सारापादपाश्चये ॥ ३३ ॥ वनस्पतिपुरग्रामगिरयःपत्तनानिच ॥ एते सर्वेमूर्तिमंतःपूज्यंतेस्वात्मनोगुणैः ॥ ३४ ॥ नतेषांकश्चिदप्यस्तिह्यपूर्वःस्वामिवर्जितः ॥ स्वेस्वेधिकारेसततंपूज्यंतेफलदायिनः ॥ ३५ ॥ स्वस्वामियोगमाहात्म्यात्सर्वेसौभाग्यशालिनः ॥ अधिमासःसमुत्पन्नःकदाचित्पांडुनंदन ॥ ३६ ॥ तमूचुःसकलालोकाअसहायंजुगुप्सितम् ॥ अनर्होमलमासोयंरविसंक्रमवर्जितः ॥ ३७ ॥ अस्पृश्योमलरूपत्वाच्छुभेकर्मणिगर्हितः ॥ श्रुत्वैतद्वचनंलोकान्निरुद्योगोहतप्रभः ॥ ३८ ॥ दुःखान्वितोतिखिन्नात्माचिंताग्रस्तैकमानसः ॥ मुमूर्षुरभवत्तेनहृदयेनविदूयता ॥ पश्चाद्वै

यंसमालंब्यमामसौशरणंगतः ॥ ३९ ॥ प्राप्तोवैकुंठभवनंयत्राहमवसंनर ॥ अंतर्गृहंसमागत्यमामसौदृष्टवान्परम् ॥ ४० ॥ अमू ल्यरत्नरचितेहेमसिंहासनेस्थितम् ॥ तदानींमामसौदृष्ट्वादंडवत्पतितोभुवि ॥ ४१ ॥ प्रांजलिःप्रयतोभूत्वामुंचन्नश्रूणिनेत्रतः ॥ वाचाग द्गदयासौम्यंबभाषेधैर्यमुद्वहन् ॥ ४२ ॥ ॥ सूतउवाच ॥ ॥ इत्युक्त्वाबदरीनाथो विरराममहामुनिः ॥ तच्छ्रुत्वापुनरेवाहनारदो भक्तवत्सलः ॥ ४३ ॥ ॥ नारदउवाच ॥ ॥ इत्थंगत्वाभवनममलंपूर्णरूपस्यविष्णोर्भक्तिप्राप्यंजगदघहरंयोगिनामप्यगम्यम् ॥ यत्रै वास्तेजगदभयदोब्रह्मरूपोमुकुंदस्तत्पादाब्जंशरणमधितःकिंबभाषेऽधिमासः ॥ ४४ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्ये ऽधिमासस्यवैकुंठप्रापणंनामतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्येऽहंलोकानांहितका म्यया ॥ अधिमासेनयत्प्रोक्तंहरेरग्रेशुभंवचः ॥ १ ॥ ॥ अधिमासउवाच ॥ ॥ अयिनाथकृपानिधेहरेनकथंरक्षसिमामिहागतम् ॥ कृपणंप्रबलैर्निराकृतंमलमासेत्यभिधांविधायमे ॥ २ ॥ शुभकर्मणिवर्जितंहिमांनिरधीशंमलिनंसदैवतैः ॥ अवलोकयतोदयालुताक्वगता तेद्यकठोरताकथम् ॥ ३ ॥ वसुदेववरांगनायथाखलकंसानलतःसुरक्षिता ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ४ ॥ द्रुपदस्य सुतायथापुराखलदुःशासनदुःखतोऽविता ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ५ ॥ यमुनाविषतोयतोऽविताःपशुपालाःप शवोयथात्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ६ ॥ पशवःपशुपास्तदंगनाअवितादावधनंजयाद्यथा ॥ वदमांशरणाग तंकथंनतथाद्यावसिदीवत्सल ॥७॥ पृथिवीपतयोयथाविताम्गधेशालयबंधनात्त्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥८॥

गजनायकएत्यरक्षितोझटितिग्राहमुखाद्यथात्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ९ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इतिविज्ञाप्यभूमानंविररामनिरीश्वरः ॥ मलमासोऽश्रुवदनस्तिष्ठन्नग्रेजगत्पतेः ॥ १० ॥ तदानींश्रीहरिस्तूर्णंकृपयाप्लावितोभृशम् ॥ उवाचदीनवदनंमलमासंपुरःस्थितम् ॥ ११ ॥ ॥ श्रीहरिरुवाच ॥ ॥ वत्सवत्सकिमत्यंतंदुःखमग्नोसिसांप्रतम् ॥ एतादृशंमहद्दुःखंकिंतेमनसिवर्तते ॥ १२ ॥ त्वामहंदुःखसंमग्नमुद्धरिष्यामिमाशुचः ॥ नमेशरणमापन्नःपुनःशोचितुमर्हति ॥ १३ ॥ इहागत्यमहादुःखीपतितोपिनशोचति ॥ किमर्थंत्वमिहागत्यशोकसंमग्नमानसः ॥ १४ ॥ अशोकमजरंनित्यंसानंदंमृत्युवर्जितम् ॥ वैकुंठमीदृशंप्राप्यकथंदुःखान्वितोभवान् ॥ १५ ॥ त्वामत्रदुःखितंदृष्ट्वावैकुंठस्थाःसुविस्मिताः ॥ किमर्थमर्तुकामोसितन्मेवत्सवदाधुना ॥ १६ ॥ ॥ श्रीनारायणउवाच ॥ ॥ श्रुत्वेदंभगवद्वाक्यंविभारइवभारभृत् ॥ श्वासोच्छ्वाससमायुक्तउवाचमधुसूदनम् ॥ १७ ॥ ॥ अधिमासउवाच ॥ ॥ अज्ञातंकिंचिन्नैवास्तिसर्वत्रभगवंस्तव। आकाशइवसर्वत्रविश्वंव्याप्यव्यवस्थितः ॥ १८ ॥ चराचरगतोविष्णुःसाक्षीसर्वस्यविश्वदृक् ॥ कूटस्थेत्वयिसर्वाणिभूतानिचव्यवस्थया ॥ १९ ॥ संस्थितानिजगन्नाथनाकिंचिद्भवताविना ॥ किन्नजानासिभगवन्निर्भाग्यस्यममव्यथाम् ॥ ॥ २० ॥ तथापिवच्मिहेनाथदुःखजालमपावृतम् ॥ तादृशनंचकस्यापिनश्रुतंनावलोकितम् ॥ २१ ॥ क्षणालवामुहूर्ताश्चपक्षामासादिवानिशम् ॥ स्वामिनामधिकारैस्तेमोदंतेनिर्भयाःसदा ॥ २२ ॥ नमेनामनमेस्वामीनहिकश्चिन्ममाश्रयः ॥ तस्मान्निराकृतःसर्वैःसाधिदेवैःसुकर्मणः ॥ २३ ॥ निषिद्धोमलमासोयमित्यंधोऽवटगःसदा ॥ तस्माद्दिनष्टुमिच्छामिनाहंजीवितुमुत्सहे ॥ २४ ॥ कुजीविताद्वरंमृत्युर्नित्य

दग्धः कथंस्त्वपेत् ॥ अतः परंमहाराजवक्तव्यंनावशिष्यते ॥ २५ ॥ परदुःखासहिष्णुस्त्वमुपकारप्रियोमतः ॥ वेदेषुचपुराणेषुप्रसिद्धः पुरुषोत्तमः ॥ २६ ॥ निजधर्मंसमालोच्ययथारुचितथाकुरु ॥ पुनःपुनः पामरेणनवक्तव्यः प्रभुर्महान् ॥ २७ ॥ मरिष्येऽहंमरिष्येऽहंमरिष्येऽहं पुनःपुनः ॥ इत्युक्त्वामलमासोऽयंविरराम विधेःसुत ॥ २८ ॥ ततः पपातसहसासंनिधौश्रीरमापतेः ॥ तत्रतंपतितंदृष्ट्वासंसज्जातासुविस्मिता ॥ ॥ २९ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्युक्त्वाविरतिमुपागतेऽधिमासेश्रीकृष्णोबहुलकृपाभरावसन्नः ॥ प्रावोचज्जलदगभीररावरम्यंनिर्वाणंशिशिरमयूखवन्नयंस्तम् ॥ ३० ॥ ॥ सूतउवाच ॥ ॥ नारायणस्यनिगमर्द्धिपरायणस्यपापौघवार्धिवडवाग्निवचोवदातम् ॥ श्रुत्वाप्रहर्षितमनामुनिराबभाषेशुश्रूषुरादिपुरुषस्यवचांसिविप्राः ॥ ३१ ॥ इतिश्रीबृहन्ना॰पुराणेपुरुषोत्तममास॰ मलमासविज्ञप्तिर्नामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ नारदउवाच ॥ ॥ किमुवाचमहाभागश्रुत्वातद्वचनंहरिः ॥ चरणाग्रेनिपतितमधिमासंतपोनिधे ॥ १ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्यामियदुक्तंहरिणानघ ॥ धन्योऽसित्वंमुनिश्रेष्ठयन्मांपृच्छसिसत्कथाम् ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणुतत्रत्यवृत्तांतंप्रवक्ष्यामितवाग्रतः ॥ नेत्रकोणसमादिष्टस्तदानींहरिणार्जुनः ॥ ३ ॥ वीजयामासपक्षेणतंमासंमूर्च्छितंखगः ॥ उत्थितःपुनरेवाहनैतन्मेरोचतेविभो ॥ ४ ॥ ॥ अधिमासउवाच ॥ ॥ पाहिपाहिजगद्धातःपाहिविष्णोजगत्पते ॥ उपेक्षसेकथंनाथशरणंमामुपागतम् ॥ ५ ॥ इत्युक्त्वावेपमानंतंविलपंतंमुहुर्मुहुः ॥ तमुवाचहृषीकेशोवैकुंठनिलयोहरिः ॥ ६ ॥ ॥ श्रीविष्णुरुवाच ॥ उत्तिष्ठोत्तिष्ठभद्रंतेविषादंवत्समाकुरु ॥ त्वद्दुःखंदुर्निवार्यंमेप्रतिभातिनिरीश्वर ॥ ७ ॥ इत्युक्त्वामनसिध्यात्वातदुपायंक्षणंप्रभुः ॥ विनि

श्चिंत्यपुनर्वाक्यमुवाचमधुसूदनः ॥ ८ ॥ श्रीविष्णुरुवाच ॥ ॥ वत्सागच्छमयासार्धंगोलोकंयोगिदुर्लभम् ॥ यत्रास्तेभगवान्कृष्णःपुरुषोत्तमईश्वरः ॥ ९ ॥ गोपिकावृंदमध्यस्थोद्विभुजोमुरलीधरः ॥ नवीननीरदश्यामोरक्तपंकजलोचनः ॥ १० ॥ शारदीयपार्वणेंदुशोभातिरोचनाननः ॥ कोटिकंदर्पलावण्यलीलाधाममनोहरः ॥ ११ ॥ पीतांबरधरःस्रग्वीवनमालाविभूषितः ॥ सद्रत्नभूषणःप्रेमभूषणोभक्तवत्सलः ॥ १२ ॥ चंदनोक्षितसर्वांगःकस्तूरीकुंकुमान्वितः ॥ श्रीवत्सवक्षाःसंभ्राजत्कौस्तुभेनविराजितः ॥ १३ ॥ सद्रत्नसाररचितकिरीटीकुंडलोज्ज्वलः ॥ रत्नसिंहासनारूढःपार्षदैःपरिवेष्टितः ॥ १४ ॥ सएवपरमंब्रह्मपुराणपुरुषोत्तमः ॥ स्वेच्छामयःसर्वबीजंसर्वाधारःपरात्परः ॥ १५ ॥ निरीहोनिर्विकारश्चपरिपूर्णतमःप्रभुः ॥ प्रकृतेःपरईशानोनिर्गुणोनित्यविग्रहः ॥ १६ ॥ गच्छावस्तत्रत्वद्दुःखंश्रीकृष्णोव्यपनेष्यति ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्युक्त्वातंकरेकृत्वागतेलोकंगतवान्हरिः ॥ १७ ॥ अज्ञानांधतमोध्वंसंज्ञानवर्त्मप्रदीपकम् ॥ ज्योतिःस्वरूपंप्रलयेपुरासीत्केवलंमुने ॥१८॥ सूर्यकोटिनिभंनित्यमसंख्यंविश्वकारणम् ॥ विभोःस्वेच्छामयस्यैवतज्ज्योतिरुल्बणंमहत् ॥ ॥ १९ ॥ ज्योतिरभ्यंतरेलोकत्रयमेवमनोहरम् ॥ तस्यैवोपरिगोलोकःशाश्वतोब्रह्मवन्मुने ॥ २० ॥ त्रिकोटियोजनायामोविस्तीर्णोमंडलाकृतिः ॥ तेजःस्वरूपःसुमहद्रत्नभूमिमयःपरः ॥ २१ ॥ अदृश्योयोगिभिःस्वप्नेदृश्योगम्यश्चवैष्णवैः ॥ ईशेनविधृतोयोहिचांतरिक्षस्थितोवरः ॥ २२ ॥ आधिव्याधिजरामृत्युशोकभीतिविवर्जितः ॥ सद्रत्नभूषितासंख्यमंदिरैःपरिशोभितः ॥ २३ ॥ तदधोदक्षिणेसव्येपंचाशत्कोटिविस्तरात् ॥ वैकुंठःशिवलोकश्चतत्समःसुमनोहरः ॥ २४ ॥ कोटियोजनविस्तीर्णोवैकुंठोमंडलाकृतिः ॥ लसत्पीतपटारम्यायत्र

तिष्ठंतिवैष्णवाः ॥ २५ ॥ शंखचक्रगदापद्मश्रियाजुष्टचतुर्भुजाः ॥ स्त्रियोलक्ष्मीसमाःसर्वाःकूजन्नूपुरमेखलाः ॥ २६ ॥ सव्येनशिवलोकश्च
कोटियोजनविस्तृतः ॥ लयशून्यश्चसृष्टौचपार्षदैःपरिवारितः ॥ २७ ॥ निवसंतिमहाभागागणायत्रकपर्दिनः ॥ भस्मोद्धूलितसर्वांगा
नागयज्ञोपवीतिनः ॥ २८ ॥ अर्धचंद्रलसद्भालाःशूलपट्टिशपाणयः ॥ सर्वेगंगाधराःशूरारूयंबकाजयशालिनः ॥ २९ ॥ गोलोका
भ्यंतरेज्योतिरतीवसुमनोहरम् ॥ परमाल्हादकंशश्वत्परमानंदकारणम् ॥ ३० ॥ ध्यायंतेयोगिनःशश्वद्योगेनज्ञानचक्षुषा ॥ तदेवानंदज
नकंनिराकारंपरात्परम् ॥ ३१ ॥ तज्ज्योतिरंतरंरूपमतीवसुमनोहरम् ॥ इंदीवरदलश्यामंपंकजारुणलोचनम् ॥ ३२ ॥ कोटिशारदपू
र्णेंदुशोभातिरोचनाननम् ॥ कोटिमन्मथसौंदर्यलीलाधाममनोहरम् ॥ ३३ ॥ द्विभुजंमुरलीहस्तंसस्मितंपीतवाससम् ॥ श्रीवत्सवक्षसं
भ्राजत्कौस्तुभेनविराजितम् ॥ ३४ ॥ सद्रत्नकोटिखचितंकिरीटकटकोज्ज्वलम् ॥ रत्नसिंहासनस्थंचवनमालाविभूषितम् ॥ ३५ ॥
तदेवपरमंब्रह्मपूर्णंश्रीकृष्णसंज्ञकम् ॥ स्वेच्छामयंसर्वबीजंसर्वाधारंपरात्परम् ॥ ३६ ॥ किशोरवयसंशश्वद्गोपवेषविधायकम् ॥ कोटिपू
र्णेंदुशोभाढ्यंभक्तानुग्रहकारकम् ॥ ३७ ॥ निरीहंनिर्विकारंचपरिपूर्णतमंप्रभुम् ॥ रासमंडपमध्यस्थंशांतंरासेश्वरंहरिम् ॥ ३८ ॥
मंगलंमंगलार्हंचसर्वमंगलमंगलम् ॥ परमानंदराजंचसत्यमक्षरमव्ययम् ॥ ३९ ॥ सर्वसिद्धेश्वरंसर्वसिद्धिरूपंचसिद्धिदम् ॥
प्रकृतेःपरमीशानंनिर्गुणंनित्यविग्रहम् ॥ ४० ॥ आद्यंपुरुषमव्यक्तंपुरुहूतंपुरुष्टुतम् ॥ नित्यंस्वतंत्रमेकंचपरमात्मस्वरूपकम् ॥ ४१ ॥
ध्यायंतेवैष्णवाःशांताःशांतंशांतिपरायणम् ॥ एवंरूपंपरंबिभ्रद्भगवानेकएवसः ॥ ४२ ॥ ॥ श्रीनारायणउवाच ॥ ॥ एवमु

त्कात्ततोविष्णुरधिमाससमन्वितः ॥ गोलोकमगमच्छीघ्रंविरजोवेष्टितंपरम् ॥ ४३ ॥ ॥ सूतउवाच ॥ ॥ इतीरयित्वागिरमात्तसत्क्रिये मुनीश्वरेतूष्णिमवस्थितेमुनिः ॥ जगादवाक्यंविधिजोमहोत्सवाच्छुश्रूषुरानंदनिधेर्नवाःकथाः ॥ ४४ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेश्रीनारायणनारदसंवादेपुरुषोत्तममासमाहात्म्येविष्णोर्गोलोकगमनेपंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ नारदउवाच ॥ वैकुंठाधिपतिर्गत्वागोलोकेकिंचकारह ॥ तद्वदस्वकृपांकृत्वामह्यंशुश्रूषवेऽनघ ॥ १ ॥ श्रीनारायणउवाच ॥ ॥ शृणु नारदवक्ष्येऽहंयज्जातंतत्रतेनघ ॥ विष्णुर्गोलोकमगमदधिमासेनसंयुतः ॥२॥ तन्मध्येभगवद्धाममणिस्तंभैःसुशोभितम् ॥ ददर्शदूरतोविष्णुर्ज्योतिर्धाममनोहरम् ॥ ३ ॥ तत्तेजःपिहिताक्षोसौशनैरुन्मीलयलोचने ॥ मंदंमंदंजगामाधिमासंकृत्वास्वपृष्ठतः ॥ ४ ॥ उपमंदिरमासाद्य सोधिमासोमुदान्वितः ॥ उत्थितैर्द्वारपालैश्चवंदितांघ्रिर्हरिःशनैः ॥ ५ ॥ प्रविष्टोभगवद्धामशोभासंमुष्टलोचनः ॥ तत्रगत्वाननामाशुश्रीकृष्णंपुरुषोत्तमम् ॥ ६ ॥ गोपिकावृन्दमध्यस्थंरत्नसिंहासनासनम् ॥ नत्वोवाचरमानाथोबद्धांजलिपुटःपुरः ॥ ७ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ वदेविष्णुंगुणातीतंगोविंदमेकमक्षरम् ॥ अव्यक्तमव्ययंव्यक्तंगोपवेषविधायिनम् ॥८॥ किशोरवयसंशांतंगोपीकांतमनोहरम् ॥ नवीननीरदश्यामंकोटिकंदर्पसुन्दरम् ॥९॥ वृंदावनवनाभ्यंतेरासमंडलसंस्थितम् ॥ लसत्पीतपटंसौम्यंत्रिभंगललिताकृतिम् ॥१०॥ रासेश्वरंरासवासंरासोल्लाससमुत्सुकम् ॥ द्विभुजंमुरलीहस्तंपीतवाससमच्युतम् ॥ ११ ॥ इत्येवमुक्त्वातंनत्वारत्नसिंहासनेवरे ॥ पार्षदैःसत्कृतो विष्णुःसउवासतदाज्ञया ॥ १२ ॥ श्रीनारायणउवाच ॥ ॥ इतिविष्णुकृतंस्तोत्रंप्रातरुत्थाययःपठेत् ॥ पापानितस्यनश्यंतिदुःस्वप्नःसत्फ

लप्रदः ॥ १३ ॥ भक्तिर्भवतिगोविंदेपुत्रपौत्रविवर्द्धिनी ॥ अकीर्तिःक्षयमाप्नोतिसत्कीर्तिर्वर्द्धतेचिरम् ॥ १४ ॥ उपविष्टस्ततोविष्णुःश्रीकृ
ष्णचरणांबुजे ॥ नामयामासतंमासंवेपमानंतदग्रतः ॥ १५ ॥ तदापप्रच्छश्रीकृष्णःकोयंकस्मादिहागतः ॥ कस्माद्रुदतिगोलोकेनकश्चि
द्दुःखमश्नुते ॥ १६ ॥ गोलोकवासिनःसर्वेसदानंदपरिप्लुताः ॥ स्वप्नेपिनैवशृण्वंतिदुर्वार्तांचदुरन्वयाम् ॥ १७ ॥ तस्मादयंकथंविष्णोमद
ग्रेदुःखितःस्थितः ॥ मुंचन्नश्रूणिनेत्राभ्यांवेपतेचमुहुर्मुहुः ॥ १८ ॥ ॥ श्रीनारायणउवाच ॥ ॥ नवांबुदानीकमनोहरस्यगोलोकनाथस्यव
चोनिशम्य ॥ उवाचविष्णुर्मलमादुःखंप्रोत्थायसिंहासनतःसमग्रम् ॥ १९ ॥ ॥ श्रीविष्णुरुवाच ॥ वृंदावनकलानाथश्रीकृष्णमुरलीधर ॥
श्रूयतामधिमासीयंदुःखंवच्मितवाग्रतः ॥ २० ॥ तस्मादहमिहायातोगृहीत्वामुंनिरीश्वरम् ॥ दुःखदावानलंतीव्रमेतदीयंनिराकुरु ॥
॥ २१ ॥ अयंत्वधिकमासोस्तित्यपेतरविसंक्रमः ॥ मलिनोयमनर्होस्तिशुभकर्मणिसर्वदा ॥ २२ ॥ नस्नानंनैवदानंचकर्तव्यंप्रभुवर्जिते ॥
एवंतिरस्कृतःसर्वैर्वनस्पतिलतादिभिः ॥ २३ ॥ मासैर्द्वादशभिश्चैवकलाकाष्ठालवादिभिः ॥ अयनैर्हायनैश्चैवस्वामिवर्गसमन्वितैः
॥ २४ ॥ इतिदुःखानलेनैवदग्धोयंमर्तुमुन्मुखः ॥ अन्यैर्दयालुभिःपश्चात्प्रेरितोमामुपागतः ॥२५॥ शरणार्थीहृषीकेशवेपमानोरुदन्मुहुः॥
सर्वंनिवेदयामासदुःखजालमसंवृतम् ॥ २६ ॥ एतदीयंमहद्दुःखमनिवार्यंभवद्दते ॥ अतस्त्वामाश्रितोनूनंकरेकृत्वानिराश्रयम् ॥ २७ ॥ पर
दुःखासहिष्णुस्त्वमितिवेदविदोजगुः ॥ अतएनंनिरातंकंसानंदंकृपयाकुरु ॥ २८ ॥ त्वदीयचरणांभोजंगतोनैवावशोचते ॥ इतिवेदवि
दोमिथ्याकथंभाविजगत्पते ॥ २९ ॥ मदर्थमपिकर्तव्यमेतद्दुःखनिवारणम् ॥ सर्वंत्यक्त्वाहमायातोयातंमेसफलंकुरु ॥३०॥ मुहुर्मुहुर्नवक्त

व्यंकदापिप्रभुसन्निधौ ॥ वदंत्येवंमहाप्राज्ञानित्यंनीतिविशारदाः ॥ ३१ ॥ इतिविज्ञाप्यभूमानंबद्धांजलिपुटोहरिः ॥ पुरस्तस्थौभगवतोनि रीक्षंस्तन्मुखांबुजम् ॥ ३२ ॥ ॥ ऋषयऊचुः ॥ ॥ सूतसूतवदान्योसिजीवत्वंशाश्वतीःसमाः ॥ पिबामोयन्मुखात्सेव्यंहरेर्लीलाकथामृ तम् ॥ ३३ ॥ गोलोकवासिनासूतकिमुक्तंकिंकृतंवद ॥ विष्णुश्रीकृष्णसंवादःसर्वलोकोपकारकः ॥ ३४ ॥ विधिसुतःकिमपृच्छदृषीश्वरं तदधुनावदसूततपस्विनः ॥ परमभागवतःसहरेस्तनुस्तदुदितंवचनंपरमौषधम् ॥३५॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्री नारायणनारदसंवादेपुरुषोत्तमविज्ञप्तिर्नामषष्ठोऽध्यायः ॥ ६ ॥ सूतउवाच ॥ भवद्भिर्यःकृतःप्रश्नस्तमचीकरदाशुगाः ॥ यदुत्तरमुवाचेश स्तद्वदामितपोधनाः ॥ १ ॥ ॥ नारदउवाच ॥ विधूरश्रवसिमौनमास्थितेसंनिवेद्यपरदुःखमपारम् ॥ किंचकारपुरुषोत्तमःपरस्तद्वदस्व बदरीपतेऽधुना ॥ २ ॥ श्रीनारायणउवाच ॥ ॥ गोलोकनाथोयदुवाचविष्णुंतदेवगुह्यंकथयामिवत्स ॥ वाच्यंसुभक्तायसदास्तिकायशु श्रूषवेदंभविवर्जिताय ॥ ३ ॥ सुकीर्तिकृत्पुण्यकरंयशस्यंसत्पुत्रदंवश्यकरंचराज्ञाम् ॥ दारिद्र्यदावाग्निरनल्पपुण्यैःश्राव्यंतथाकार्यमनन्यभ क्त्या ॥ ४ ॥ श्रीपुरुषोत्तमउवाच ॥ समीचीनंकृतंविष्णोयदत्रागतवान्भवान् ॥ मलमासंकरेकृत्वालोकेकीर्तिमवाप्स्यसि ॥ ५ ॥ यस्त्व योरीकृतोजीवःसमयैवोररीकृतः ॥ अतएनंकरिष्यामिसर्वोपरिमयासमम् ॥ ६ ॥ गुणैःकीर्त्यानुभावेनषड्भगैश्चपराक्रमैः ॥ भक्तानांवर दानेनगुणैरन्यैश्चमामकैः ॥ ७ ॥ अहमेतैर्यथालोकेप्रथितःपुरुषोत्तमः ॥ तथायमपिलोकेषुप्रथितःपुरुषोत्तमः ॥ ८ ॥ अस्मैसमर्पिताःसर्वे येगुणामयिसंस्थिताः ॥ पुरुषोत्तमेतिमन्नामप्रथितंलोकवेदयोः ॥ ९ ॥ तदप्यस्मैमयादत्तंतवतुष्टयैजनार्दन ॥ अहमेवास्यसंजातःस्वामी

चमधुसूदन ॥ १० ॥ एतन्नाम्नाजगत्सर्वंपवित्रंचभविष्यति ॥ मत्साहश्यमुपागम्यमासानामधिपोभवेत् ॥ ११ ॥ जगत्पूज्यो
जगद्वंद्योमासोयंतुभविष्यति ॥ पूजकानांचसर्वेषांदुःखदारिद्र्यखंडनः ॥ १२ ॥ सर्वेमासाःसकामाश्चनिष्कामोयंमयाकृतः ॥ मोक्षदः
सर्वलोकानांमत्तुल्योयंमयाकृतः ॥ १३ ॥ अकामःसर्वकामोवायोधिमासंप्रपूजयेत् ॥ कर्माणिभस्मसात्कृत्वामामेवैष्यत्यसंशयम् ॥
॥ १४ ॥ यदर्थं चमहाभागायतिनोब्रह्मचारिणः ॥ तपस्यंतिमहात्मानोनिराहाराद्दढव्रताः ॥ १५ ॥ फलपत्रानिलाहाराः कामक्रोधवि
वर्जिताः ॥ जितेंद्रियचयाःसर्वेप्रावृट्कालेनिराश्रयाः ॥ १६ ॥ शीतातपसहाश्चैवयतंतेगरुडध्वज ॥ तथापिनैवमेयांति परमंपदमव्ययम्
॥ १७ ॥ पुरुषोत्तमस्यभक्तास्तुमासमात्रेणतत्पदम् ॥ अनायासेनगच्छंतिजरामृत्युविवर्जितम् ॥ १८ ॥ सर्वसाधनतःश्रेष्ठःसर्वकामा
र्थसिद्धिदः ॥ तस्मात्संसेव्यतामेवमासोयंपुरुषोत्तमः ॥ १९ ॥ सीतानिक्षिप्तबीजानिवर्धंतेकोटिशोयथा ॥ तथाकोटिगुणंपुण्यंकृतंमेपुरु
षोत्तमे ॥ २० ॥ चातुर्मास्यादिभिर्यज्ञैःस्वर्गंगच्छंतिकेचन ॥ तत्रत्यंभोगमासाद्यपुनर्गच्छंतिभूतलम् ॥ २१ ॥ विधिवत्सेवतेयस्तुपुरु
षोत्तममादरात ॥ कुलंस्वकीयमुद्धृत्यमामेवैष्यत्यसंशयम् ॥ २२ ॥ मामुपेतोत्रसंसारंजन्ममृत्युभयाकुलम् ॥ आधिव्याधिजराग्रस्तंन
पुनर्यातिमानवः ॥ २३ ॥ यद्गत्वाननिवर्ततेतद्धामपरमंमम ॥ इतिच्छंदोवचःसत्यमसत्यंजायतेकथम् ॥ २४ ॥ एतन्मासाधिपश्चाहंमयै
वायंप्रतिष्ठितः ॥ पुरुषोत्तमेतिमन्नामतदप्यस्मैसमर्पितम् ॥ २५ ॥ तस्मादेतस्यभक्तानांममाचिंतादिवानिशम् ॥ तद्भक्तकामनाः सर्वाःपूर
णीयामयैवहि ॥ २६ ॥ कदाचिन्ममभक्तानामपराधोधिगण्यते ॥ पुरुषोत्तमभक्तानांनापराधःकदाचन ॥ २७ ॥ मदाराधनतोविष्णो
२

मदीयाराधनंप्रियम् ॥ मद्भक्तकामनादानेविलंबेहंकदाचन ॥ २८ ॥ मदीयमासभक्तानांनविलंबःकदाचन ॥ मदीयमासभक्तायेममैवा तीववल्लभाः ॥ २९ ॥ यएतस्मिन्महामूढाजपदानादिवार्जिताः ॥ सत्कर्मस्नानरहितादेवतीर्थद्विजद्विषः ॥ ३० ॥ जायंतेदुर्भगादुष्टाःपर भाग्योपजीविनः ॥ नकदाचित्सुखंतेषांस्वप्नेपिशशशृङ्गवत् ॥ ३१ ॥ तिरस्कुर्वंतियेमूढामलमासंममप्रियम् ॥ नाचरिष्यंतियेधर्मंतेसदा निरयालयाः ॥ ३२ ॥ पुरुषोत्तममासाद्यवर्षेवर्षेतृतीयके ॥ नाचरिष्यंतिधर्मंयेकुंभीपाकेपतंतिते ॥ ३३ ॥ इहलोकेमहद्दुःखंपुत्रपौत्रकल त्रजम् ॥ प्राप्नुवंतिमहामूढादुःखदावानलस्थिताः ॥ ३४ ॥ तेकथंसुखमेधंतेयेषामज्ञानतोगतः ॥ श्रीमान्पुण्यतमोमासोमदीयः पुरुषो त्तमः ॥ ३५ ॥ याः स्त्रियः सुभगाः पुत्रसुखसौभाग्यहेतवे ॥ पुरुषोत्तमेकरिष्यंतिस्नानदानार्चनादिकम् ॥ ३६ ॥ तासांसौभाग्यसंपत्ति सुखपुत्रप्रदोह्यहम् ॥ यासांमासोगतः शून्योमन्नामापुरुषोत्तमः ॥ ३७ ॥ नतासामनुकूलोऽहंनसुखंस्वामिजंभवेत् ॥ भ्रातृपुत्रधनानांच सुखंस्वप्नेपिदुर्लभम् ॥ ३८ ॥ तस्मात्सर्वात्मनासर्वैः स्नानपूजाजपादिकम् ॥ विशेषेणप्रकर्तव्यंदानंशक्त्यनुसारतः ॥ ३९ ॥ येनाहम र्चितोभक्त्यामासेस्मिन्पुरुषोत्तमे ॥ धनपुत्रसुखंभुक्त्वापश्चाद्गोलोकवासभाक् ॥ ४० ॥ ममाज्ञयाजनाः सर्वेपूजयिष्यन्तिमामकम् ॥ सर्वेषामपिमासानामुत्तमोयंमयाकृतः ॥ ४१ ॥ अतस्त्वमधिमासस्यचिंतांत्यक्त्वारमापते ॥ गच्छवैकुंठमतुलंगृहीत्वापुरुषोत्तमम् ॥ ४२ ॥ श्रीनारायणउवाच ॥ इतिरसिकवचोनिशम्यविष्णुःप्रबलमुदापरिगृह्यमासमेनम् ॥ नवजलदरुचंप्रणम्यदेवंझटितिजगामनिजालयंस्वगेन ॥ ४३ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेऽधिमासस्यैश्वर्यप्राप्तिर्नामसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥

सूतउवाच ॥ नारदःकृतवान्प्रश्नंपुनरेवतपोधनाः ॥ विष्णुश्रीकृष्णसंवादंश्रुत्वासंतुष्टमानसः ॥ १ ॥ नारदउवाच ॥ वैकुंठंगतवतिरुक्मिणी
शाकजातंतदनुवदप्रभोमे ॥ वृत्तांतंहरिसुतकृष्णयोश्चसर्वेषांहितकरभाविपुंसोः ॥२॥ इतिसंप्रश्नसंहृष्टोभगवान्बदरीपतिः ॥ उवाचपुनरेवा
मुंजगदानंददंबृहत् ॥ ३ ॥ श्रीनारायणउवाच ॥ ॥ अथश्रीरुक्मिणीनाथोवैकुंठंगतवान्मुदा ॥ तत्रगत्वाधिमासंतंवासयामासनारद ॥४॥
तत्रत्यवसतिंप्राप्यमोदमानोभवत्तदा ॥ मासानामधिपोभूत्वारमतेविष्णुनासह ॥ ५ ॥ द्वादशस्वपिमासेषुमलमासंवरंप्रभुः ॥ विधायमन
सातुष्टोबभूवप्रकृतिप्रियः ॥ ६ ॥ अथार्जुनमुवाचेदंभगवान्भक्तवत्सलः ॥ युधिष्ठिरंचपांचालींनिरीक्षन्कृपयामुने ॥ ७ ॥ ॥ श्रीकृष्ण
उवाच ॥ जानेऽहंराजशार्दूलतपोवनमुपागतैः ॥ भवद्भिर्दुःखसंमग्नैर्नादृतःपुरुषोत्तमः ॥८॥ वृंदावनकलानाथवल्लभःपुरुषोत्तमः ॥ प्रमादा
द्गतवान्मासोभवतांकाननौकसाम् ॥ ९ ॥ युष्माभिर्नैवविज्ञातोभयद्वेषसमन्वितैः ॥ गांगेयद्रोणकर्णेभ्योभयसंत्रस्तमानसैः ॥ १० ॥
कृष्णद्वैपायनादातविद्याराधनतत्परैः ॥ इंद्रकीलंगतवतिबीभत्सौरणशालिनि ॥ ११ ॥ तद्वियोगपरिक्लिष्टैर्नज्ञातःपुरुषोत्तमः ॥ युष्माभिः
किंप्रकर्तव्यमदृष्टमवलंब्यताम् ॥ १२ ॥ अदृष्टंयादृशंपुंसांतादृशंभासतेसदा ॥ अवश्यमेवभोक्तव्यमदृष्टजनितंफलम् ॥ १३ ॥ सुखंदुःखं
भयंक्षेममदृष्टात्प्राप्यतेजनैः ॥ तस्माददृष्टनिष्ठैश्चभवद्भिःस्थीयतांसदा ॥१४॥ अथापरंप्रवक्ष्यामिभवतांदुःखकारणम् ॥ सेतिहासंमहाराज
श्रूयतांमन्मुखादहो ॥१५॥ श्रीकृष्णउवाच ॥ पांचालीयंमहाभागापूर्वजन्मनिसुन्दरी ॥ मेधाविद्विजमुख्यस्यपुत्रीजातासुमध्यमा ॥१६॥
कालेनगच्छताराजन्संजातादशवार्षिकी ॥ रूपलावण्यललितानयनापांगशालिनी ॥ १७ ॥ चातुर्यगुणसंपन्नापितुरेकैवपुत्रिका ॥ वल्लभा

तीवर्ततेनेयंचतुरागुणसुन्दरी ॥ १८ ॥ लालितापुत्रवन्नित्यंनैकदाचित्प्रलंभिता ॥ साहित्यशास्त्रकुशलानीतावपिविशारदा ॥ १९ ॥ तन्मा
तास्वर्गतापूर्वंपित्रासापोषितामुदा ॥ पार्श्वस्थालिसुखंदृष्ट्वापुत्रपौत्रसुखस्पृहा ॥ २० ॥ तर्कयंतीतदाबालामामेवंचकथंभवेत् ॥ गुणभाग्यनि
धिर्भर्तासुखदः सत्सुताः कथम् ॥ २१ ॥ एवंमनोरथंचक्रेदैवेनध्वंसितंपुरा ॥ किंकृत्वाकिंविदित्वाहंकमुपास्येसुरेश्वरम् ॥ २२ ॥ कंवामु
निमुपातिष्ठेकिंवातीर्थमुपाश्रये ॥ ममभाग्यंकथंसुतंभर्ताकोपिनवाञ्छति ॥२३॥ पंडितोपिपितामूढोममभाग्यवशादहो ॥ विवाहकालेसंप्रा
प्तेनदत्तासदृशेवरे ॥ २४ ॥ अध्यक्षाहंसखीमध्येकुमारीदुःखपीडिता ॥ नाहंस्वामिसुखाभिज्ञायथाचालिगणोमम ॥ २५ ॥ ममभाग्यव
तीमाताकथंस्वर्गंगतापुरा ॥ एवंचिंताकुलाबालामनोरथमहोदधौ ॥२६॥ निमग्नामोहसलिलेशोकमोहोर्मिपीडिता ॥ मेधावीऋषिराजो
सौविचचारमहीतले ॥२७॥ कन्यादाननिमित्तंचविचिन्वन्संदृक्षंवरम् ॥ तादृशंवरमप्राप्यनिराशःस्वमनोरथे ॥२८॥ सुतास्वकीयभाग्या
भ्यांभग्नसंकल्पपंजरः ॥ अवापदैवयोगेनज्वरंतीव्रंसुदारुणम् ॥२९॥ स्फुटत्सर्वांगसंभिन्नतापज्वालासमाकुलः ॥ श्वासोच्छ्वाससमायुक्तोम
हादारुणमूर्च्छया ॥ ३० ॥ प्रस्खलन्निपतन्भूमौमदिरामत्तवद्भृशम् ॥ आगच्छन्नेवभवनंसपपातधरातले ॥३१॥ यावत्सुतासमायातापितरं
भयविह्वला ॥ तावन्मुमूर्षुःसंजातोभूत्सुरस्तामनुस्मरन् ॥ ३२ ॥ भाविनार्थबलेनैवसहसाजातवेपथुः ॥ कन्यादानप्रसंगोत्थमहोत्सवविव
र्जितः ॥३३॥ अथप्राचीनगार्हस्थ्यकृतधर्मपरिश्रमात् ॥ संसारवासनांत्यक्त्वाहरौचित्तमधारयत् ॥३४॥ सस्मारश्रीहरिंतूर्णंमेधावीपुरुषोत्त
मम् ॥ इंदीवरदलश्यामंत्रिभंगललिताकृतिम् ॥३५॥ रासेशराधारमणप्रचंडदोर्दंडदूराहतनिर्जरारे ॥ अत्युग्रदावानलपानकर्तःकुमारिको

त्तारितवस्त्रहर्तः ॥ ३६ ॥ श्रीकृष्णगोविंदहरेमुरारेराधेशदामोदरदीननाथ ॥ मांपाहिसंसारसमुद्रमग्नंनमोनमस्तेहृषिकेश्वराय ॥ ३७ ॥
इतिमुनिवचनंनिशम्यदूराज्झटितिययुश्चरामुकुंदलोकात् ॥ तदनुमृतमुनिंकरेगृहीत्वाचरणसरोरुहमीयुरीश्वरस्य ॥ ३८ ॥ प्राणोत्क्रमण
मालोक्यहाहेतिसासुतारुदत् ॥ अंकेकृत्वापितुर्देहंविललापसुदुःखिता ॥ ३९ ॥ कुररीवचिरंसातुविलप्यभृशदुःखिता ॥ उवाचपितरंबा
लाजीवंतमिवविह्वला ॥ ४० ॥ ॥ बालोवाच ॥ ॥ हाहापितःकृपासिंधोआत्मजानंददायक ॥ कस्यांकेमांनिधायाद्यगतोसिवै
ष्णवंपुरम् ॥ ४१ ॥ पितृहीनांचमांतातकोवासंभावयिष्यति ॥ नभ्रातानैवबंधुश्चनमेमातातपस्विनी ॥ ४२ ॥ भोजनाच्छादनेचिंतां
कोमेतातकरिष्यति ॥ कथंतिष्टाम्यहंशून्येवेदध्वनिविवर्जिते ॥ ४३ ॥ आश्रमेतेमुनिश्रेष्ठअरण्यइवनिर्जने ॥ अतःपरंमरिष्यामिजीवने
किंप्रयोजनम् ॥ ४४ ॥ असंपाद्यैववैवाहंविधिंदुहितृवत्सल ॥ क्वगतोसिपितस्तातइहागच्छतपोनिधे ॥ ४५ ॥ वाणींवदसुधाकल्पांकथंतू
ष्णीमवस्थितः ॥ उत्तिष्ठोत्तिष्ठहेतातचिरंसुतोसिसांप्रतम् ॥ ४६ ॥ इत्युक्त्वाश्रुमुखीबालाविललापमुहुर्मुहुः ॥ मुक्तकंठरुरोदार्ताकुररीवसुदुः
खिता ॥ ४७ ॥ तत्सुतारोदनंश्रुत्वाविप्रास्तद्वनवासिनः ॥ अतीवकरुणं कोवा रोदित्यस्मिंस्तपोवने ॥ ४८ ॥ मेधाऋषेःसुताशब्दंशनैर्नि
श्चित्यतापसाः ॥ ससंभ्रमाःसमाजग्मुर्हाहाकारसमन्विताः ॥४९॥ आगत्यददृशुःसर्वेसुतांकस्थंमृतंमुनिम् ॥ ततःसंरुरुदुःसर्वेमुनयःकान
नौकसः ॥ ५० ॥ सुतोत्संगाच्छवंनीत्वाश्मशानेशिवसंनिधौ ॥ अंत्येष्टिंविधिनाकृत्वातेऽदहन्काष्ठवेष्टितम् ॥ ५१ ॥ ततःकन्यांसमाश्वा
स्यसर्वेतेस्वगृहान्ययुः ॥ कन्याधैर्यंसमालंब्ययथाशक्त्यकरोद्व्ययम् ॥ ५२ ॥ इत्यौर्ध्वदैहिकविधिंप्रणिधायपित्र्यंपुत्रीनिवासमकरोच्चत

पोवनेस्मिन् ॥ साविव्यथेपितृजदुःखदवाग्निदग्धारंभेववत्सेमरणात्सुरभीवबाला ॥ ६३ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेकुमारीविलापोनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ सूतउवाच ॥ ॥ ततस्तंविस्मयाविष्टःपप्रच्छनारदोमुनिः ॥ मेधाविद्विजवर्यस्यसुतावृत्तांतमद्भुतम् ॥ १ ॥ ॥ नारदउवाच ॥ ॥ मुनेमुनिसुतातत्रकिंचकारतपोवने ॥ कोवामुनिवरस्तस्याःपाणिग्रहमचीकरत् ॥ २ ॥ श्रीनारायणउवाच ॥ निवसंत्यास्ततस्तस्याःकियान्कालोविनिर्गतः ॥ स्मारंस्मारंस्वपितरंशोचंत्याश्चमुहुर्मुहुः ॥ ३ ॥ शून्यसद्मनिसंविष्टांयूथभ्रष्टांमृगीमिव ॥ गलद्बाष्पौघनयनांज्वलद्धृदयपंकजाम् ॥ ४ ॥ विनिःश्वासपरांदीनांसंरुद्धांमुरगीमिव ॥ चिंतयंतीमपश्यंतींदुःखपारंकृशोदरीम् ॥ ५ ॥ तामाससादभगवान्भविष्यद्बलनोदितः ॥ यदृच्छयावनेतस्मिन्परमः कोपनोमुनिः ॥ ६ ॥ यद्विलोकनमात्रेणत्रस्येदपिशतक्रतुः ॥ जटाकलापसंछन्नःसाक्षादिवसदाशिवः ॥ ७ ॥ यस्त्वञ्जनन्याराजेंद्रशैशवेतिप्रसादितः ॥ त्रिदशाकर्षिणींविद्यांददावस्यैसुपूजितः ॥ ८ ॥ येनाहमपिभूपालसर्वदेवनमस्कृतः ॥ रथेसंयोजितःसाक्षाद्रुक्मिण्यासहनारद ॥ ९ ॥ उभाभ्यांचालितेमार्गेरथेदुर्वाससान्विते ॥ अत्युग्रयातृषाशुष्यत्ताल्वोष्ठपुटयानया ॥ १० ॥ सूचितोहंजलार्थिन्यास्कंधस्थयुगयापुरा ॥ गच्छन्नेवपदाग्रेणसंपीड्यवसुधातलम् ॥ ११ ॥ आनीतवान्भोगवतींप्रियाप्रेमपरिप्लुतः ॥ सैवोर्ध्वगामिनीभूत्वातावन्मात्रेणवारिणा ॥ १२ ॥ न्यवारयन्महाराजरुक्मिणीतृषमुल्बणाम् ॥ तद्दृष्ट्वातत्क्षणोद्भूतक्रोधेनप्रज्वलन्निव ॥ १३ ॥ प्रलयाग्निरिवोत्तिष्ठञ्शशापकोपनोमुनिः ॥ अहोश्रीकृष्णतेत्यंतवल्लभारुक्मिणीसदा ॥ १४ ॥ यद्भवान्मामवज्ञायप्रियाप्रेमपरिप्लुतः ॥ पाययामासपानीयंमाहात्म्य

दर्शयन्स्वकम् ॥ १५ ॥ दंपत्योरुभयोरेववियोगोस्तुयुधिष्ठिर ॥ इतियोदत्तवान्शापंसएवमुनिसत्तमः ॥ १६ ॥ साक्षाद्रुद्रांशसंभूतःकाल रुद्रइवापरः॥ अत्रेरुग्रतपःकल्पवृक्षदिव्यफलंमहत् ॥ १७ ॥ पतिव्रताशिरोरत्नाऽनुसूयागर्भसंभवः ॥ दुर्वासानाममेधावीयथावैमूर्तिमत्त पः ॥ १८ ॥ नैकतीर्थजलक्लिन्नजटाभूषितसच्छिराः ॥ तमालोक्यसमायांतंकुमारीशोकसागरात् ॥ १९ ॥ उन्मज्ज्योत्थायधैर्येणववंदे चरणौमुनेः ॥ नत्वास्वाश्रममानीयजानकीवाल्मिकिंयथा ॥ २० ॥ अर्घ्यपाद्यैर्वन्यफलैःपुष्पैश्चविविधैर्मुनिम् ॥ स्वागतंपृच्छच साबालापूजयामाससादरम् ॥ ततःसविनयाराजन्नुवाचमुनिकन्यका ॥ २१ ॥ ॥ बालोवाच ॥ ॥ नमस्तेस्तुमहाभाग अत्रिगोत्रदिवाकर ॥ कुतोधिगमनंसाधोदुर्भगायाममाश्रमे ॥ ममभाग्योदयोजातस्तवागमनतोमुने ॥ २२ ॥ अथवामत्पितुः पुण्यप्रवाहप्रेरितोभवान् ॥ संभावयितुंमामेवह्यागतोमुनिसत्तमः ॥ २३ ॥ भवादृशांपादरजस्तीर्थरूपंमहात्मनाम् ॥ स्पृशंत्याःसफलं जन्मसफलंचाद्यमेव्रतम् ॥ २४ ॥ अद्यमेसफलंपुण्यमद्यमेसफलोभवः ॥ भवादृशामहापुण्यायन्मेदृष्टिपथंगताः ॥ २५ ॥ एवमुक्त्वा चसाबालातस्थौतूष्णींतदग्रतः ॥ सस्मितंमुनिराहेदंदुर्वासाःशंकरांशजः ॥ २६ ॥ ॥ दुर्वासाउवाच ॥ ॥ साधुसाधुद्विजसुतेकुलम भ्युद्धृतंपितुः ॥ मेधाऋषेःसुतपसःफलमेतादृशीसुता ॥ २७ ॥ कैलासादहमागच्छंज्ञात्वातेधर्मशीलताम् ॥ त्वदाश्रममनुप्राप्तस्त्वयासंपू जितोस्म्यहम् ॥ २८ ॥ गमिष्यामिवरारोहेशीघ्रंबदरिकाश्रमम् ॥ द्रष्टुंनारायणंदेवंसनातनमुनीश्वरम् ॥ २९ ॥ तपश्चरंतमेकाग्रमत्युग्रंलो कहेतवे ॥ ॥ बालोवाच ॥ ऋषेत्वदर्शनादेवशुष्कोमेशोकसागरः ॥ ३० ॥ अतःपरंशुभंभावियस्मात्संभावितात्वया ॥ समुद्धृत

बृहज्ज्वालदावहव्यभुजंमुने ॥ ३१ ॥ किंनवेत्सिदयासिंधोतंनिर्वापयशंकर ॥ हर्षहेतुर्नमेकश्चिद्दृश्यतेमुविचारतः ॥ ३२ ॥ नमातान पिताभ्रातायोमेधैर्यंप्रयच्छति ॥ कथंकारमहंजीवेदुःखसागरपीडिता ॥ ३३ ॥ यांयांदिशंप्रपश्यामिसासाशून्याविभातिमे ॥ ममदुःख प्रतीकारंकुरुशीघ्रंतपोनिधे ॥ ३४ ॥ नमांकामयतेकश्चित्पाणिग्रहणहेतवे ॥ अतःपरंभविष्यामिवृषलीतिमहद्भयम् ॥ ३५ ॥ तस्मान्न जायतेनिद्रानरुचिर्भोजनेमम ॥ अत्रन्मुमूर्षुरस्म्येवइतिमेनिश्चयोऽधुना ॥ ३६ ॥ इत्युक्त्वाश्रुमुखीबालाविररामतदग्रतः ॥ दुर्वासास्तदु पायार्थंविचारमकरोत्तदा ॥ ३७ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इतिमुनितनयावचोनिशम्यबहुलतपामुनिराड्विचार्यछंदः ॥ अति शयकृपयाविलोक्यबालांकिमपिहितंनिजगादसारभूतम् ॥ ३८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येदुर्वासस्तपोवनागमनं नामनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ नारदउवाच ॥ ॥ किंविचार्यबृहद्धामापरमःकोपनोमुनिः ॥ अब्रवीदृषिकन्यांतांतन्मेब्रूहितपो निधे ॥ १ ॥ ॥ सूतउवाच ॥ ॥ नारदस्यवचःश्रुत्वाप्रोवाचबदरीपतिः ॥ दुर्वासोवचनंगुह्यंसर्वेषांहितकृद्द्विजाः ॥२॥ श्रीनारायणउवाच ॥ शृणुनारदवक्ष्येऽहंयदुक्तंमुनिनातदा ॥ मेधावितनयादुःखमपनेतुंकृपालुना ॥३॥ ॥ दुर्वासाउवाच ॥ ॥शृणुसुंदरिवक्ष्यामिगुह्याद्गुह्यतरं महत् ॥ आख्येयंनैवकस्यापित्वदर्थंतुविचारितम् ॥ ४ ॥ नविस्तरंकरिष्यामिसमासेनब्रवीमिते॥ इतस्तृतीयःसुभगेमासस्तुपुरुषोत्तमः॥५॥ तस्मिन्स्नातोनरस्तीर्थेमुच्यतेभ्रूणहत्यया॥एततुल्योनकोप्यन्यःकार्तिकादिषुसुंदरि॥६॥ सर्वेमासास्तथापक्षाःपर्वाण्यन्यानियानिच॥पुरुषो त्तममासस्यकलांनार्हंतिषोडशीम्॥७॥ साधनानिसमस्तानिनिगमोक्तानियानिच॥मासस्यैतस्यनार्हंतिकलामपिचषोडशीम्॥८॥ द्वादश

न्दसहस्राणिगंगास्नानेनयत्फलम् ॥गोदावरीसकृत्स्नानाद्यत्फलंसिंहगेगुरौ ॥९॥ तदेवफलमाप्नोतिमासेवैपुरुषोत्तमे॥सकृत्सुस्नानमात्रेणयत्र कुत्रापिसुन्दरि ॥१०॥ श्रीकृष्णवल्लभोमासोनाम्नाचपुरुषोत्तमः ॥ तस्मिन्संसेवितेबालेसर्वंभवतिवांछितम्॥११॥ तस्मान्निषेवयाशुत्वंमासंतं पुरुषोत्तमम् ॥ मयापिसेव्यतेसोऽयंपुरुषोत्तमवन्मुदा ॥ १२ ॥ एकदाभस्मसात्कर्तुमंबरीषंक्रुधामया ॥ मुक्ताकृत्यातदाबालेसुनाभंहरिणां ज्वलत्॥१३॥ मामेवभस्मसात्कर्तुंतदानींप्रेरितंमयि ॥ पुरुषोत्तमव्रतादेवतच्चक्रंसंन्यवर्तत ॥१४॥ त्रैलोक्यंभस्मसात्कर्तुंसमर्थंतच्चसुन्दरि ॥ मय्यकिंचित्करंजातंतदामेविस्मयोऽभवत्॥१५॥ तस्माद्भजस्वसुभगेश्रीमंतंपुरुषोत्तमम् ॥ इत्युक्त्वामुनिशार्दूलोविरराममुनेःसुता ॥ १६ ॥ ॥ श्रीकृष्णउवाच ॥ दुर्वासोवचनंश्रुत्वाबालामूढधियावदत् ॥ भाविनाप्रेरिताराजन्नसूयाप्रेरितासती ॥ दुर्वाससंमुनिश्रेष्ठंमनसिक्रोधसंयुता ॥ १७ ॥ ॥ बालोवाच ॥ ॥ नमह्यंरोचतेब्रह्मन्यदुक्तंभवतामुने ॥१८॥ कथंमाघादयोमासाअकिंचित्करतांगताः ॥ कथंकार्तिकमासंत्व मूनंवदसितद्वद ॥ १९ ॥ वैशाखःसेवितःकिंवानदास्यतिसुकामितम् ॥ सदाशिवादयोदेवाःफलदाःकिंनसेविताः ॥ २० ॥ अथवाशु विमार्तंडोदेवःप्रत्यक्षदर्शनः ॥ सकिंनदाताकामानांदेवीचजगदंबिका ॥ २१ ॥ गणेशःसेवितःकिंवानसंयच्छतिकामितम् ॥ व्यतीपाता दिकान्योगान्देवाञ्शर्वादिकानपि ॥ २२ ॥ सर्वानुल्लंघ्यवदतस्त्वपाकिंतेनजायते ॥ अयंतुमलिनोमासःसर्वकर्मविगर्हितः ॥ २३ ॥ अस्मू र्यसंक्रमः श्रेष्ठःक्रियतेचकथंमुने ॥ वेदाहंसर्वदुःखानांपारदंश्रीहरिंपरम् ॥ २४ ॥ नान्यंपश्यामिभूदेवचिंतयंतीदिवानिशम् ॥ रामाद्राजान कीजानेः शंकरात्पार्वतीपतेः ॥ २५ ॥ नान्यःकोपिमहान्देवोयोमेदुःखंव्यपोहति ॥ एतान्विहायविप्रेंद्रकथंस्तौषिमलंमुने ॥ २६ ॥ एव

मुक्तस्तयाविप्रःपुत्र्यासक्रोधनोमुनिः ॥ जाज्वल्यमानोवपुषाक्रोधसंरक्तलोचनः ॥२७॥ तथापिनशशापैनांमित्रजांकृपयान्वितः॥मूढेयंनैव जानातिहिताहितमपूर्णधीः ॥ २८ ॥ पुरुषोत्तममाहात्म्यंदुर्ज्ञेयंविदुषामपि ॥ किमुताल्पधियांपुंसांकुमारीणांविशेषतः ॥ २९ ॥ पितृहीनाकुमारीयंबालादुःखाग्निभर्जिता ॥ अतीवोग्रतरंशापंमदीयंसहतेकथम् ॥ ३० ॥ इत्येवंकृपयाक्रोधंसंजहारमनःस्थितम् ॥ स्वस्थोभूत्वा मुनिःप्राहतांबालामतिविह्वलाम् ॥ ३१ ॥ ॥ दुर्वासाउवाच ॥ अहोबालेनमेकोपोमित्रजेत्वयिकश्चन ॥ यत्तेमनसिनिर्भाग्येयथारुचितथाकुरु ॥ ३२ ॥ अपरंश्रूयतांबालेभविष्यंकिंचिदुच्यते ॥ पुरुषोत्तममासस्ययस्त्वयाऽनादरःकृतः ॥ ३३ ॥ सर्वथातत्फलंभाविइहवापरजन्मनि ॥ अतःपरंगमिष्यामिनरनारायणालयम् ॥ ३४ ॥ नचशप्तामयाभीरुमन्मित्रंतेपितायतः ॥ हिताहितंनजानासिबालभावाच्छुभाशुभम् ॥ ३५ ॥ स्वस्तितेस्तुगमिष्यामिमास्तुकालात्ययोमम ॥ शुभंशुभेतरंभाविनकेनाप्यनुलंघ्यते ॥ ३६ ॥ ॥ श्रीकृष्णउवाच ॥ इत्युदीर्यजगामाशुतामसस्तापसोमुनिः ॥ तत्क्षणंनिष्प्रभासाभूत्पुरुषोत्तमहेलया ॥ ३७ ॥ विमृश्यसुचिरंकालंतत्कालफलदंशिवम् ॥ आराधयामिदेवेशंतपसापार्वतीपतिम् ॥ ३८ ॥ इतिनिश्चित्यमनसामेधावितनयानृप ॥ दुष्करंतत्तपःकर्तुमियेषस्वाश्रमेस्थिता ॥ ३९ ॥ ॥ ॥ सूतउवाच ॥ ॥ आर्षेयीप्रबलमुनेर्वचोविनिंद्यप्रोद्युक्तांधकरिपुसेवनेवनेस्वे ॥ लक्ष्मीशंबहुलफलप्रदंविहायसावित्रीपतिमपिताहशंनिरस्य ॥ ४० ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेकुमारीशिवाराधनोद्योगोनामदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ नारदउवाच ॥ ॥ अचीकरत्कुमारीयंमहत्कर्मसुदुष्करम् ॥ मुनीनामपिसर्वेषां तन्मेवदमहामुने ॥१॥

॥ ॥ श्रीनारायणउवाच ॥ ॥ अथारभतकल्याणीतपःपरमदारुणम् ॥ चिंतयंतीशिवंशांतंपंचवक्रंसनातनम् ॥ २ ॥ भुजंगभू
षणंदेवंनंदिभृंगिनिषेवितम् ॥ चतुर्विंशतितत्त्वैश्चगुणैस्त्रिभिरभिष्टुतम् ॥ ३ ॥ महासिद्धिभिरष्टाभिः प्रकृत्यापुरुषेणच ॥ चंद्रखंडलसद्भा
लंजटाजूटविराजितम् ॥ ४ ॥ चचारदुश्चरंबालातमुद्दिश्यपरंतपः ॥ पंचाग्नीनांचमध्येसास्थायिनीग्रीष्मगेरवौ ॥ ५ ॥ हेमंतेशिशिरेचैव
शीतवार्यंतरस्थिता ॥ व्यक्तवक्त्रातथारेजेजलस्थंकमलंयथा ॥ ६ ॥ शिरोधःप्रसृतश्यामनीलालकविगुंठिता ॥ जंबालवल्लरीपुंजैर्वेष्टितेवा
बभौजले ॥ ७ ॥ ब्रह्मरंध्रोद्गतश्रीमद्धूम्रराजिर्व्यदृश्यत ॥ नलिनंसेव्यमानेवमिलिंदालिःप्रसर्पिणी ॥ ८ ॥ वर्षास्वनावृताशेतेस्थंडिलेबृसि
कान्विते ॥ संध्ययोरुभयोस्तन्वीधूमपानमचीकरत् ॥ ९ ॥ पुरंदरःपरांचिंतामवापाश्रुत्यतत्तपः ॥ दुर्धर्षादिविजैःसर्वैःस्पृहणीयामहर्षिभिः
॥ १० ॥ एवंतपसिवृत्तायामार्षेय्यांनृपनंदन ॥ गतान्यब्दसहस्राणिनवराजन्यभूषण ॥ ११ ॥ संतुष्टस्तपसातस्याभगवान्पार्वतीपतिः ॥
दर्शयामासबालायैनिजंरूपमगोचरम् ॥ १२ ॥ तदृष्ट्वासहसोत्तस्थौदेहःप्राणमिवागतम् ॥ तपःकृशापिसाबालाहृष्टपुष्टातदाभवत् ॥ १३ ॥
भूरिवातातपक्लिष्टादेवमीढागरीयसी ॥ साबालाऽवनताभूत्वाववंदेगिरिजापतिम् ॥ १४ ॥ मानसैरुपचारैस्तंसंपूज्यविश्ववंदितम् ॥ तुष्टावज
गतांनाथंभक्तियुक्तेनचेतसा ॥ १५ ॥ ॥ बालोवाच ॥ ॥ अयेशैलजावल्लभप्राणनाथप्रभोभर्गभूतेशगौरीशशंभो ॥ तमःसोमसूर्याग्निदि
व्यत्रिनेत्रमदाधारमुंडास्थिमालिन्नमस्ते ॥ १६ ॥ नरोनेकतापाभिभूतांगपीडःपरंघोरसंसारवार्धौनिमग्नः ॥ खलव्यालकालोग्रदंष्ट्राभिदष्टो
विमुच्येद्भवंतंशरण्यंप्रपन्नः ॥ १७ ॥ विभोयेनबाणःस्वकीयीकृतश्चमृताजीवितालर्कभूपालपत्नी ॥ दयानाथभूतेशचंडीशभव्यभवत्राणमृत्युं

जयप्राणनाथ ॥ १८ ॥ मखध्वंसकर्तःसमस्तारिहर्तःसदासेवकानांभवध्वंसकर्तः ॥ नमोजन्महर्तःपुरासृष्टिकर्तस्त्वदीयानवप्राणनाथाव
हर्तः ॥ १९ ॥ इत्येवंमनसावाचाशिवंस्तुत्वातपस्विनी ॥ विररामममहाभागामेधावितनयानृप ॥ २० ॥ ॥ श्रीकृष्णउवाच ॥ ॥
तत्कृतंस्तोत्रमाकर्ण्यतपसोग्रतरेणच ॥ प्रसन्नवदनांभोजस्तामुवाचसदाशिवः ॥ २१ ॥ ॥ शिवउवाच ॥ ॥ वरंवरयभद्रंतेयस्तेमनसि
वांछितः ॥ प्रसन्नोस्मिमहाभागेमामाखिदतपस्विनि ॥ २२ ॥ तदाकर्ण्यकुमारीयंमहानंदपरिप्लुता ॥ उवाचवचनंराजन्सुप्रसन्नंसदाशिव
म् ॥ २३ ॥ ॥ बालोवाच ॥ ॥ दीननाथदयासिंधोप्रसन्नश्चेन्ममोपरि ॥ तदामत्कामितंदेहिमाविलंबंकुरुप्रभो ॥ २४ ॥ पतिंदेहि
पतिमह्यंपतिंपतिमहंवृणे ॥ पतिंदेहिमहादेवनान्यन्मेचिंतितंहृदि ॥ २५ ॥ एवमुक्तातदार्षेयीविररामकपर्दिनम् ॥ तदाकर्ण्यमहादेवोज
गादमुनिकन्यकाम् ॥ २६ ॥ शिवउवाच ॥ ॥ त्वयायत्स्वमुखेनोक्तंतदस्तुमुनिकन्यके ॥ पंचकृत्वस्त्वयायस्मात्पतिःसंप्रार्थितोऽधु
ना ॥ २७ ॥ तस्मात्पंचभविष्यंतिपतयस्तवसुंदरि ॥ शूराःसकलधर्मज्ञाःसाधवःसत्यविक्रमाः ॥ २८ ॥ यज्वानःस्वगुणख्याताःसत्यसं
धाजितेंद्रियाः ॥ त्वन्मुखप्रेक्षकाःसर्वेराजन्यागुणशालिनः ॥ २९ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ इत्याकर्ण्यवचस्तस्यधूर्जटेरनतिप्रियम् ॥
उवाचावनताभूत्वाबालावाक्यविशारदा ॥ ३० ॥ ॥ बालोवाच ॥ ॥ एवंमेगिरिजाकांतमास्तुलोकेऽतिकौतुकम् ॥ एकस्याएकएवा
स्तिभर्तानार्याःसदाशिव ॥ ३१ ॥ नदृष्टानश्रुताक्वापिनार्येकापंचभर्तृका ॥ एकस्यपंचपत्न्यस्तुपुरुषस्यभवंतिहि ॥ ३२ ॥ त्वदीयाहं
कथंशंभोभवेयंपंचभर्तृका ॥ नैवाहंसिवचस्त्वेवंमयिवक्तुंकृपानिधे ॥ ३३ ॥ तवैवजायतेलज्जात्वदीयाहंयतःप्रभो ॥ इत्याकर्ण्यवचस्तस्याः

शंकरःप्राहतांपुनः ॥ ३४ ॥ ॥ शिवउवाच ॥ ॥ मास्तुतेस्मिन्भवेभीरुभव्यंतत्परजन्मनि ॥ अयोनिसंभवातत्रभविष्यसितपोबा
लात् ॥ ३५ ॥ भर्तृजंसुखमासाद्यततोगंत्रीपरंपदम् ॥ दुर्वासामेप्रियामूर्तिःसत्वयाऽवमतःपुरा ॥ ३६ ॥ सचेत्कोपावृतःसुभ्रुनिर्दहेद्भुवनत्र
यम् ॥ त्वयागर्वातिरेकेणब्रह्मतेजःप्रमर्दितम् ॥ ३७ ॥ पुरुषोत्तमस्त्वयामासोनकृतोभगवत्प्रियः ॥ यस्मिन्नर्पितमैश्वर्यंश्रीकृष्णेनात्मनः
स्वकम् ॥ ३८ ॥ अहंब्रह्मादयोदेवानारदाद्यास्तपस्विनः ॥ यदादेशकराबालेतदाज्ञांकोविलंघयेत् ॥ ३९ ॥ समासोनत्वयामूढेपूजितो
लोकपूजितः ॥ अतस्तेपंचभर्तारोभविष्यंतिद्विजात्मजे ॥ ४० ॥ नान्यथाभावितद्बालेपुरुषोत्तमखंडनात् ॥ योवैनिंदतितंमासंसयाति
घोररौरवम् ॥ ४१ ॥ विपरीतंभवेत्तस्यनकदाप्यन्यथाभवेत् ॥ पुरुषोत्तमस्ययेभक्ताःपुत्रपौत्रधनान्विताः ॥ ४२ ॥ ऐहिकामुष्मिकींसि
द्धियातायास्यंतियांतिच ॥ वयंसर्वेपिगीर्वाणाःपुरुषोत्तमसेविनः ॥ ४३ ॥ यस्मिन्संसेवितेशीघ्रंप्रीयतेपुरुषोत्तमः ॥ सेवनीयंकथंमासंन
भजामसुमध्यमे ॥ ४४ ॥ अत्युत्कटानांमहतांवचोमिथ्याकथंवद ॥ अनुनेयाहिमुनयःसदसद्वादवादिनः ॥ ४५ ॥ वदन्नेवंनीलकंठः
क्षिप्रमंतर्दधेहरः ॥ चकितासावदद्बालायूथभ्रष्टामृगीयथा ॥ ४६ ॥ ॥ सूतउवाच ॥ ॥ शशांकलेखांकितभालदेशेसदाशिवेशैव
दिशंप्रयाते ॥ चिंताबबाधेमुनिराजकन्यांहत्यायथावृत्रहणंमुनीशाः ॥ ४७ ॥ ॥ इति श्रीबृहन्नारदीयपुराणेपुरुषोत्तममास
माहात्म्येशिववाक्यंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ नारदउवाच ॥ शितिकंठेगतेनाथबालाकिमकरोच्छुचा ॥ तन्मे
वदविनीतायशुश्रूषाधर्मसिद्धये ॥ १ ॥ ॥ श्रीनारायणउवाच ॥ एवमेवपुरापृष्टःश्रीकृष्णःपांडुसूनुना ॥ यदुवाचवचोराज्ञेतन्मेनिगदतः

शृणु ॥ २ ॥ श्रीकृष्णउवाच ॥ एवंगतेशिवेराजन्साबालाविगतप्रभा ॥ निःश्वासपरमाभीतासाश्रुनेत्राकृशोदरी ॥ ३ ॥ हृदयाग्निलस
ज्ज्वालाज्वलितांगीकुमारिका ॥ दावाग्निदग्धपत्रासालतेवासीत्तपस्विनी ॥ ४ ॥ दुःखमीर्ष्यामाप्तवत्यामेवंकालोमहान्गतः ॥ असौताम
वचस्कंदताहृशींतापसींप्रभुः ॥ ५ ॥ सहसातांसमापन्नांफणीवाखुनिवेशनम् ॥ इति कालेनबलिनावशंनीतातपस्विनी ॥ ६ ॥ प्रावृण्मे
घावृतेव्योम्निविद्युत्सौदामिनीयथा ॥ तथाऽऽश्रमेस्वकेनष्टातपसादग्धकल्मषा ॥ ७ ॥ तदानीमेवधर्मिष्ठोयज्ञसेनोनराधिपः ॥ बृहत्संभार
संपन्नमकरोद्यज्ञमुत्तमम् ॥ ८ ॥ तद्यज्ञकुंडादुद्भूताकुमारीकनकप्रभा ॥ सेयंद्रुपदशार्दूलतनयाप्रथिताभुवि ॥९॥ द्रौपदीसर्वलोकेषुद्यार्षेयी
यापुराऽभवत् ॥ सेयंस्वयंवरेराजन्मत्स्यवेधेकृतेसति ॥ १० ॥ लब्धार्जुनेनपांचालीक्षुभितेराजमंडले ॥ तृणीकृत्यनृपान्सर्वान्भीष्मक
र्णादिकान्बहून् ॥ ११ ॥ सेयंकचग्रहंप्राप्तादुष्टदुःशासनान्मुने ॥ वचांसिकर्णशूलानिश्राविताविवर्णिनी ॥ १२ ॥ मयाचोपेक्षिताराज
न्पुरुषोत्तमहेलनात् ॥ यदामयिकृतस्नेहामन्नामान्यवदन्मुहुः ॥१३॥ दामोदरदयासिंधोकृष्णकृष्णजगत्पते ॥ हेनाथहेरमानाथकेशवक्ले
शनाशन ॥ १४ ॥ नमातानतातोनचभ्रातृवर्गोनसख्योनजामिर्नवैभागिनेयः ॥ नबंधुर्नचेष्टोनवैप्राणनाथोहृषीकेशसर्वंभवानेवमेऽस्ति ॥
॥ १५ ॥ गोविंदगोपिकानाथदीनबंधोदयानिधे ॥ दुःशासनपराभूतांकिंनजानासिमांप्रभो ॥१६॥ दुःशासनपराभूतातदाद्रुपदनंदिनी ॥
मदीयस्मरणंप्राप्ताविस्मृतापिमयापुरा ॥ १७ ॥ शीघ्रंगरुडमारुह्यतत्रागत्यस्थितेनवै ॥ पूरितानिमयाराजन्नस्यैवासांस्यनेकशः ॥ १८॥
सदामयिकृतस्नेहामत्प्राणामत्परायणा ॥ ममातिवल्लभासाध्वीसखीमेप्राणसन्निभा ॥ १९ ॥ तथाप्युपेक्षितेयंसापुरुषोत्तमहेलनात् ॥

पुरुषोत्तमतिरस्कारकर्तारंपातयाम्यहम् ॥ २० ॥ सर्वथामुनिदेवानांसेव्योयंपुरुषोत्तमः ॥ किंपुनर्मानुषाणांतुसर्वार्थफलदायकः ॥ २१ ॥ तस्मादाराधयस्वैनमागामिपुरुषोत्तमम् ॥ वर्षेचतुर्दशेपूर्णेसर्वंतेभविताशुभम् ॥ २२ ॥ व्यलोकिचिकुरव्रातोयैरस्याःपांडुनंदन ॥ तन्नारीणामहंराजन्निर्वपिष्येऽलकान्रुषा ॥ २३ ॥ सुयोधनादिभूपालान्सर्वान्नेष्येयमक्षयम् ॥ सर्वशत्रुक्षयंकृत्वात्वंचराजाभविष्यसि ॥ २४ ॥ नमेक्षीरोदतनयाप्रियानापिहलायुधः ॥ नतथादेवकीदेवीप्रद्युम्नोनापिसात्यकिः ॥ २५ ॥ यादृशामेप्रियाभक्तास्तादृशोनास्तिकश्चन ॥ येनमेपीडिताभक्तास्तेनाहंपीडितःसदा ॥ २६ ॥ द्वेष्योमेनास्तितत्तुल्योयमस्तस्यफलप्रदः॥नावलोक्योमयादुष्टोदंडार्थमपि पांडव ॥२७॥ ॥ श्रीनारायणउवाच ॥ ॥ श्रीकृष्णस्तान्समाश्वास्यपांडवान्द्रौपदींतथा ॥ कुशस्थलींजिगमिषुरुवाचमधुसूदनः ॥२८॥ राजन्नद्यगमिष्यामिद्वारकांविरहाकुलाम् ॥ वसुदेवोमहाभागोबलदेवोममाग्रजः ॥२९॥ मन्मातादेवकीदेवीगदसांबादयोऽपरे ॥ आहुकाद्याश्चयदवोरुक्मिण्याद्याश्चयाःस्त्रियः ॥ ३० ॥ सर्वेतेऽनिमिषैर्नेत्रैर्मदागमनकांक्षिणः ॥ मामेवचिंतयंत्येवंमद्दर्शनसमुत्सुकाः ॥ ३१ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्युक्तवंतंदेवेशंकथंचित्पांडुनंदनाः ॥ हरिप्रयाणमालक्ष्यतमूचुर्गद्गदाक्षरम् ॥ ३२ ॥ जीवनंनोभवानेवयथावारिजलौकसाम् ॥ पुनर्दर्शनमल्पेनकालेनास्तुजनार्दन ॥ ३३ ॥ पांडवानांहरिर्नाथोनान्यःकश्चिज्जगत्त्रये ॥ इत्थंसर्वेवदंत्यद्धातस्मान्नःपाहिसर्वदा ॥३४॥ नविस्मार्यावयंसर्वेत्वदीयाजगदीश्वर ॥ अस्मच्चेतोमिलिंदानांजीवनंत्वत्पदांबुजम् ॥३५॥ अवलंबनमेवास्तुप्रार्थयामो मुहुर्मुहुः ॥ असकृत्पाण्डुपुत्रेषुगृणत्स्वेवंयदूद्वहः ॥३६॥ मंदमंदंसमारुह्यरथंप्रेमपरिप्लुतः ॥ ययौद्वारवतीमेनान्पराकृत्यानुगच्छतः ॥३७॥

॥ श्रीनारायणउवाच ॥ ॥ अथश्रीद्वारकानाथेगतेद्वारवतींतदा ॥ राजापिसानुजस्तप्यंस्तीर्थानिविचचारह ॥ ३८ ॥ पुरुषो त्तमेमनःकृत्वाब्रह्मञ्छ्रीभगवत्प्रिये ॥ अनुजानाहकृष्णांचविष्क्सेनवचःस्मरन् ॥ ३९ ॥ अहोश्रुतमतीवोग्रंमाहात्म्यंपौरुषोत्तमम् ॥ कथंसुखानिलभ्यंतेनाभ्यर्च्यपुरुषोत्तमम् ॥ ४० ॥ सधन्योभारतेवर्षेसपूज्यःश्रेष्ठएवसः ॥ विविधैर्नियमैर्यस्तुपूजयेत्पुरुषोत्तमम् ॥ ४१ ॥ एवंसर्वेषुतीर्थेषुभ्रमंतःपांडुनंदनाः ॥ पुरुषोत्तमासाद्यव्रतंचेरुर्विधानतः ॥ ४२ ॥ तदंतेराज्यमतुलमवापुर्गतकंटकम् ॥ पूर्णेचतुर्दशेवर्षे श्रीकृष्णकृपयामुने ॥ ४३ ॥ दृढधन्वानृपःपूर्वंसूर्यवंशसमुद्भवः ॥ पुरुषोत्तममासस्यसेवनान्महतींश्रियम् ॥ ४४ ॥ पुत्रपौत्रसुखंचैवत्यक्त भोगाननेकशः ॥ जगामभगवल्लोकमगम्यंयोगिनामपि ॥ ४५ ॥ ॥ सूतउवाच ॥ ॥ पुरुषोत्तममासस्यकृष्णद्वैपायनादहम् ॥ माहा त्म्यंश्रुतवान्विप्राः सोपिवक्तुंशशाकनो ॥ ४६ ॥ अस्यमाहात्म्यमखिलंवेत्तिनारायणःस्वयम् ॥ अथवाभगवान्साक्षाद्वैकुंठनिलयो हरिः ॥ ४७ ॥ ब्रह्मादिदेवानतपादपीठगोलोकनाथेनस्वकीकृतस्य ॥ सर्वंमाहात्म्यंपुरुषोत्तमस्यदेवोनजानातिकुतोमनुष्यः ॥ ४८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेपुरुषोत्तमव्रतोपदेशोनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ऋषयऊचुः ॥ ॥ सूतसूतमहाभागवदनोवदतांवर ॥ दृढधन्वाकथंप्रापपुरुषोत्तमसेवनात् ॥ १ ॥ सौराज्यंपुत्रपौत्रादीन्ललनांचपतिव्रताम् ॥ कथंचभगवल्लोकमवापयोगिदुर्लभम् ॥ २ ॥ शृण्वतांतेमुखांभोजात्कथासारंमुहुर्मुहुः ॥ अलंबुद्धिर्ननस्तातयथापीयूषपानतः ॥ ३ ॥ अतोविस्तरतोब्रूहिइतिहासंपुरातनम् ॥ अस्मद्भाग्यबलेनैवधात्रासंदर्शितोभवान् ॥ ४ ॥ ॥ सूतउवाच ॥ सनातनमुनिर्विप्रानारदायपुरा

तनम् ॥ इतिहाससमुवाचेमंसएवप्रोच्यतेऽधुना ॥ ५ ॥ शृण्वंतुमुनयःसर्वेचरित्रंपापनाशनम् ॥ यथाधीतंगुरुमुखाद्राज्ञोवैदृढधन्वनः ॥ ६ ॥
॥ श्रीनारायणउवाच ॥ ॥ शृणुराजन्प्रवक्ष्येहंभूपस्यदृढधन्वनः ॥ कथांपुरातनींरम्यांस्वर्धुनीमिवपावनीम् ॥ ७ ॥ आसीद्धैहयदेशस्यगो
ताश्रीमान्महीपतिः ॥ चित्रधर्मेतिविख्यातोधीमान्सत्यपराक्रमः ॥ ८ ॥ तस्यपुत्रोऽतितेजस्वीदृढधन्वेतिविश्रुतः ॥ ससर्वगुणसंपन्नःसत्य
वाग्धार्मिकःशुचिः ॥ ९ ॥ आकर्णांतविशालाक्षः पृथुवक्षामहाभुजः ॥ अवर्धतमहातेजाःसार्धंगुणगणैरसौ ॥ १० ॥ अधीत्यसांगान्निगमां
श्चतुरश्चतुरोमुदा ॥ सकृन्निगदमात्रेणप्रागधीतानिवस्फुटम् ॥ ११ ॥ दक्षिणांगुरवेदत्त्वासंपूज्यविधिवच्चतम् ॥ गुरोरनुज्ञयाधीमान्पितुःपुर
मजीगमत् ॥ १२ ॥ जनयन्नयनानंदंनिजपत्तनवासिनाम् ॥ चित्रधर्मापितंपुत्रंदृष्ट्वालेभेपरांमुदम् ॥ १३ ॥ युवानंसर्वधर्मज्ञंप्रजानांपालने
क्षमम् ॥ अतःपरंकिमत्रास्तिसंसारेसारवर्जिते ॥ १४ ॥ आराधयामिश्रीकृष्णंद्विभुजंमुरलीधरम् ॥ प्रसन्नवदनंशांतंभक्तानामभयप्रदम् ॥
॥ १५ ॥ ध्रुवांबरीषशर्यातिययातिप्रमुखानृपाः ॥ शिबिश्चरंतिदेवश्चशशबिंदुर्भगीरथः ॥ १६ ॥ भीष्मश्चविदुरश्चैवदुष्यंतोभरतोपिवा ॥
पृथुरुत्तानपादश्चप्रह्लादोऽथविभीषणः ॥ १७॥ एतेचान्येचराजानस्त्यक्त्वाभोगाननेकशः ॥ अध्रुवेणध्रुवंप्राप्ताआराध्यपुरुषोत्तमम् ॥१८॥
अतोमयापिकर्तव्यमरण्येहरिसेवनम् ॥ छित्त्वास्नेहमयंपाशंदारागारसुतादिषु ॥ १९ ॥ इतिनिश्चित्यमनसासमर्थेदृढधन्वनि ॥ धुरंन्य
स्यजगामाशुविरक्तःपुलहाश्रमम् ॥ २० ॥ तत्रगत्वातपस्तेपेश्रीकृष्णंमनसास्मरन् ॥ निस्पृहःसर्वकामेभ्यो निराहारोनिरंतरम् ॥ २१ ॥
कियत्कालंतपस्तप्त्वाहरेर्धामजगामसः ॥ दृढधन्वापिशुश्रावस्वपितुर्वैष्णवींगतिम् ॥ २२ ॥ हर्षशोकसमाविष्टोह्यकरोदौर्ध्वदेहिकम् ॥

पितृभक्त्यामहीपालोविद्वज्जनवचःस्थितः ॥२३॥ पुष्करावर्तकेपुण्येनगरेऽत्यंतशोभिते ॥ राज्यंचकारभूपालोनीतिशास्त्रविशारदः ॥२४॥ तस्यशीलवतीभार्यानाम्नायागुणसुन्दरी ॥ विदर्भराजतनयारूपेणाप्रतिमाभुवि ॥ २५ ॥ पुत्रान्सासुषुवेदिव्यांश्चतुरश्चतुराञ्शुभान् ॥ पुत्रींचारुमतींनामसर्वलक्षणसंयुताम् ॥ २६ ॥ चित्रवाक्चित्रवाहश्चमणिमांश्चित्रकुंडलः ॥ सर्वेतेमानिनःशूराविख्यातानामभिःपृथक् ॥ २७ ॥ दृढधन्वागुणैःख्यातःशांतोदांतोदृढव्रतः ॥ रूपवान्गुणवाञ्शूरःश्रीमान्प्रकृतिसुन्दरः ॥ २८ ॥ वेदवेदांगविद्वाग्मीधनुर्विद्याविशारदः ॥ सुनिर्जितारिषड्वर्गःशत्रुसंघविदारणः ॥ २९ ॥ क्षमयापृथिवीतुल्योगांभीर्येसागरोपमः ॥ पितामहसमः साम्येप्रसादेगिरिशोपमः ॥ ३० ॥ एकपत्नीव्रतधरोरघुनाथइवापरः ॥ अत्युग्रवीर्यःसद्धर्मीकार्तवीर्यइवापरः ॥ ३१ ॥ श्रीनारायणउवाच ॥ ॥ एकदानिशि सुप्तस्याचिंतासीत्तस्यभूपतेः ॥ अहोऽयंवैभवःकेनपुण्येनमहतांभवत् ॥ ३२ ॥ नमयाचतपस्तप्तंनदत्तंनहुतंक्वचित् ॥ कमिदंपरिपृच्छामि ममभाग्यस्यकारणम् ॥ ३३ ॥ एवंचिंतयतस्तस्यरजनीविरतिंगता ॥ ब्राह्मेमुहूर्तउत्थायस्नानंकृत्वायथाविधि ॥ ३४ ॥ उपस्थायार्कमुद्यंतंसंतर्प्यभगवत्कलाः ॥ दत्त्वादानानिविप्रेभ्योनमस्कृत्वाऽश्वमारुहत् ॥३५॥ ततोरण्यंजगामाशुमृगयासक्तमानसः ॥ मृगान्वराहाञ्शार्दूलाञ्जघानगवयान्बहून् ॥ ३६ ॥ कश्चिन्मृगःक्षतोऽरण्येबाणेनदृढधन्वना ॥ वनाद्वनांतरंयातोबाणमादायसत्वरम् ॥ ३७ ॥ शोणितस्रुतिमार्गेणराजाप्यनुययौमृगम् ॥ मृगःकुत्रापिसंलीनोराजाबभ्रामतद्वनम् ॥ ३८ ॥ तृषाक्रांतःसकासारंददर्शसागरोपमम् ॥ तत्रगत्वाशुपीत्वा सौपानीयंतीरमागतः ॥ ३९ ॥ ततोददर्शन्यग्रोधंघनच्छायंमहातरुम् ॥ तज्जटायांनिबद्ध्याश्वंनिषसादमहीपतिः ॥ ४० ॥ तत्रागमत्खगः

कश्चित्कीरःपरमशोभनः ॥ मानुषीमीरयन्वाणीमतुलांनृपमोहिनीम् ॥ ४१ ॥ शुकःपपाठसुश्लोकमेकमेवपुनःपुनः ॥ संबोध्यदृढधन्वान मेकाकिनमुपस्थितम् ॥ ४२ ॥ विद्यमानातुलसुखमालोक्यातीवभूतले ॥ नचिंतयसितत्त्वंत्वंतत्कथंपारमेष्यसि ॥ ४३ ॥ वारंवारमिदंप द्यंपपाठनृपतेःपुरः ॥ श्रुत्वातस्यवचोराजामुमुदेसुमुहेपिच ॥ ४४ ॥ किमेतदुक्तवान्कीरएकंपद्यंपुनः पुनः ॥ नारिकेलमिवागम्यंदु र्बोधंसारसंभृतम् ॥ ४५ ॥ किंवानायंभवेत्कृष्णद्वैपायनसुतःपरः ॥ श्रीकृष्णसेवकंमूढंमग्नंसंसारसागरे ॥ ४६ ॥ विष्णुरातमिवोद्धर्तुंकृप यामांसमागतः ॥ इतिचिंतयतस्तस्यतत्सेनासमुपागता ॥४७॥ कीरस्त्वदर्शनंप्राप्तोबोधयित्वानराधिपम् ॥ राजास्वपुरमागत्यकीरवाक्य मनुस्मरन् ॥ ४८ ॥ वाच्यमानोपिनावोचद्विनिद्रस्त्यक्तभोजनः ॥ राज्ञीरहःसमागत्यराजानंपर्यपृच्छत ॥ ४९ ॥ ॥ गुणसुन्दर्युवाच ॥ ॥ भोभोपुरुषशार्दूलदौर्मनस्यमिदंकुतः ॥ उत्तिष्ठोत्तिष्ठभूपालभुंक्ष्वभोगान्वचोवद ॥ ५० ॥ एवंस्त्रियानुनीतोपिनाकिंचिदवदन्नृपः ॥ स्मर ञ्छुकवचस्तथ्यंदुर्ज्ञेयममरैरपि ॥ ५१ ॥ सापिबालाविनिःश्वस्यभर्तृदुःखातिपीडिता ॥ नबुबोधनिजस्वामिचिंताकारणमुत्कटम् ॥५२ ॥ एवंचिंतानिमग्नस्यराज्ञःकालःकियान्गतः ॥ संदेहसागरोत्तारेहेतुंनैवाभ्यपश्यत ॥ ५३ ॥ ॥ नारदउवाच ॥ ॥ इतिचिंतयतोधरापतेर्वन जातंदृढधन्वनश्चकिम् ॥ विमलंचरितंहिवैष्णवंकलुषंहंतिमनःकुरुश्रुतम्मुने ॥५४॥ इतिश्रीबृहन्नारदीयपु० पुरुषोत्तममासमा० श्रीनारायण० दृढधन्वोपाख्यानेदृढधन्वनोमनःखेदोनामत्रयोदशोऽध्यायः॥१३॥ श्रीनारायणउवाच ॥ अथचिंतातुरस्यास्यगृहंवाल्मीकिरायया ॥ योरा मचरितंदिव्यंचकारपरमाद्भुतम् ॥१॥ दूरादालोक्यभूपालःसमुत्थायससंभ्रमम् ॥ अनीनमत्तच्चरणौदंडवद्भक्तिसंयुतः ॥ २ ॥ संपूज्यस्थाप

यामासतमृषिंपरमासने ॥ पादावंकगतौकृत्वाकराभ्यांसमलालयत् ॥ ३ ॥ पादावनेजनीरापःशिरसाधारयन्मुदा ॥ उवाचस्निग्धयावाचा स्मरन्कीरवचोनृपः ॥ ४ ॥ ॥ दृढधन्वोवाच ॥ भगवन्कृतकृत्योहंभाग्यवानस्मिसांप्रतम् ॥ अद्यमेसफलंजन्मद्यद्याथोधिगतःप्रभो ॥५॥ श्रुतंमेसफलंजातंयद्भवानक्षिगोचरः ॥ किंवर्ण्यंमेमहद्भाग्यंजगत्पावनपावन ॥ ६ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्युक्त्वामुनिशार्दूलंविर रामसभूपतिः ॥ वाल्मीकिरपितंदृष्ट्वाराजानंविनयान्वितम् ॥ ७ ॥ उवाचपरमप्रीतोहर्षयन्नतांमुनिः ॥ ॥ वाल्मीकिरुवाच ॥ ॥ साधुसाधु नृपश्रेष्ठत्वय्येतदुपपद्यते ॥ ८ ॥ चिंतातुरःकथंराजन्वदसर्वंमनोगतम् ॥ किंचिद्वक्तुंस्पृहातेस्तितद्वदस्वमहामते ॥ ९ ॥ ॥ दृढधन्वोवाच ॥ भवदीयपदांभोजकृपयामेसुखंसदा ॥ परंत्वेकोमहान्विद्वन्संदेहोहृदयेमम ॥ १० ॥ तमपाकुरुशल्यंत्वंवन्यकीरमुखोद्गतम् ॥ कदाचिन्मृ गयाकामोगतोहंगहनेवने ॥ ११ ॥ भ्रमन्नपश्यंकासारंतत्रपीतंजलंमया ॥ श्रमापनोदनाकांक्षीमहान्यग्रोधमाश्रितः ॥ १२ ॥ स्निग्धच्छायं सुनिबिडंमनोनयननंदनम् ॥ तत्रापश्यंस्थितंकीरंमनोमोदविधायकम् ॥ १३ ॥ दत्तदृष्टिरहंयावज्जातस्तस्मिन्पतत्रिणि ॥ तावन्मांसंमु खीभूयश्लोकमेकंपपाठह ॥ १४ ॥ विद्यमानातुलसुखमालोक्यातीवभूतले ॥ नचिंतयसितत्त्वंत्वंतत्कथंपारमेष्यसि ॥ १५ ॥ इति वाचःशुकेनोक्ताआकर्ण्याहंसुविस्मितः ॥ नतज्जानाम्यहंब्रह्मन्किमुवाचहरिच्छदः ॥ १६ ॥ इमंमेहार्दसंदेहंभवानुच्छेत्तुमर्हति ॥ ममराज्य सुखंपुत्राश्चत्वारश्चारुदर्शनाः ॥ १७ ॥ पत्नीपतिव्रतारम्यागजाश्वरथपत्तयः ॥ समृद्धिरतुलाब्रह्मन्केनपुण्येनमेऽधुना ॥ १८ ॥ एतत्सर्वंस मासेनविचार्यवक्तुमर्हसि ॥ श्रुत्वावाक्यानिभूपस्यवाल्मीकिर्मुनिसत्तमः ॥ १९ ॥ प्राणायामपरोभूत्वामुहूर्तंध्यानमास्थितः ॥ करामल

कवद्विश्वंभूतंभव्यंभवच्चयत् ॥ विलोक्यहृदिनिश्चित्यराजानंप्रत्युवाचसः ॥ २० ॥ ॥ वाल्मीकिरुवाच ॥ ॥ शृणुभूपतिशार्दूलप्राग्जन्म
चरितंतव ॥ २१ ॥ पुराजन्मनिराजेंद्रभवान्द्रविडदेशजः ॥ द्विजःकश्चित्सुदेवाख्यस्ताम्रपर्णीतटेवसन् ॥२२॥ धार्मिकःसत्यवादीचयथा
लाभेनतोषवान् ॥ वेदाध्ययनसंपन्नोविष्णुभक्तिपरायणः ॥ २३ ॥ अग्निहोत्रादियागैश्चतोषयामासतंहरिम् ॥ सदैवंवर्तमानस्यभार्यासी
द्वरवर्णिनी ॥ २४ ॥ गौतमीतिसुविख्यातागौतमस्यसुताशुभा ॥ पतिंपर्यचरत्प्रेम्णाभवानीवभवंप्रभुम् ॥ २५ ॥ गृहमेधविधौतस्यवर्तमान
स्यधर्मतः ॥ व्यतीतःसुमहान्कालःप्रापासौ संततिंनहि ॥ २६ ॥ एकदासनसंविष्टःसेव्यमानःस्वकांतया ॥ उवाचवचनंविप्रोविषण्णोग
द्गदाक्षरम् ॥ २७ ॥ अयिसुन्दरिसंसारेसुखंनास्तिसुतात्परम् ॥ लोकांतरसुखंपुण्यंतपोदानसमुद्भवम् ॥ २८ ॥ संततिःशुद्धवंश्याहिपरत्रेह
चशर्मणे ॥ तमप्राप्यवरंपुत्रंजीवितंममनिष्फलम् ॥ २९ ॥ नलालितोमयापुत्रोवेदार्थोनप्रबोधितः ॥ नोद्वाहश्चकृतस्तस्यवृथाजन्मगतं
मम ॥ ३० ॥ सद्योमेमृतिरेवास्तुनह्यायुश्चप्रियंमम ॥ इत्थंप्रियवचःश्रुत्वासुन्दरीखिन्नमानसा ॥ ३१ ॥ समाश्वासयितुंधीराप्रियवाक्यवि
शारदा ॥ अवीवदद्वचःसौम्यंप्रियप्रेमपरिप्लुता ॥ ३२ ॥ ॥ गौतम्युवाच ॥ ॥ मामाप्राणेश्वरब्रूहितुच्छवाक्यानिसांप्रतम् ॥ भवद्विधा
भागवतानैवमुह्यंतिसूरयः ॥ ३३ ॥ सत्यधर्मपरोसित्वंजितःस्वर्गस्त्वयाविभो ॥ कथंपुत्रैःसुखावाप्तिर्ज्ञानिनस्तवसुव्रत ॥ ३४ ॥ चित्र
केतुःपुराब्रह्मन्पुत्रशोकेनतापितः ॥ सनारदेनांगिरसाभ्येत्यसंतारितोभवत् ॥ ३५ ॥ तथांगराजादुष्पुत्राद्वेनाद्वनमगान्निशि ॥ तथातेसं
ततिःस्वामिन्दुःखदाचभविष्यति ॥ ३६ ॥ तथापितवसत्पुत्रलालसाचेत्तपोधन ॥ आराधयजगन्नाथंहरिंसर्वार्थदंमुदा ॥ ३७ ॥ यमारा

ध्यपुराब्रह्मन्कर्दमःपुत्रमाप्तवान् ॥ सांख्याचार्यन्तुतंदेवंकपिलंयोगिनांवरम् ॥ ३८ ॥ धर्मपत्न्यावचश्चेत्थंश्रुत्वाविप्रशिरोमणिः ॥ निश्चि त्यैवंतयासार्धंताम्रपर्णीतटंगतः ॥ ३९ ॥ स्नात्वाथविरजेपुण्येचचारपरमंतपः ॥ शुष्कपर्णजलाहारःपंचमेपंचमेदिने ॥ ४० ॥ चत्वार्यब्द सहस्राणिगतान्येवंतपोनिधेः ॥ तस्यैतत्तपसाब्रह्मंस्त्रयोलोकाश्चकंपिरे ॥ ४१ ॥ अत्युग्रंतत्तपोदृष्ट्वाभगवान्भक्तवत्सलः ॥ प्रादुर्बभूवतरसाग रुडोपरिसंस्थितः ॥ ४२ ॥ ॥ श्रीनारायणउवाच ॥ ॥ तंदृष्ट्वानवजलदोपमंमुरारिंदोर्दंडैर्जगदवनक्षमैश्चतुर्भिः ॥ संलक्ष्यंमुदितमुखं सुदेवशर्मासाष्टांगंनतिमकरोन्मुदामुकुंदम् ॥ ४३ ॥ ॥ इति श्रीबृहन्नारदीयपुराणेपुरुषोत्तममास॰श्रीनारायणनारदसंवादेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्रीनारायणउवाच ॥ ॥ ततस्तुष्टावतंदेवंश्रीकृष्णंभक्तवत्सलम् ॥ बद्धांजलिपुटोभूत्वासुदेवोगद्गदाक्षरम् ॥ १ ॥ नमस्तेदे वदेवेशत्रैलोक्याभयदप्रभो ॥ सर्वेश्वरनमस्तेस्तुत्वामहंशरणंगतः ॥ २ ॥ पाहिमांपरमेशानशरणागतवत्सल ॥ जगद्वंद्यनमस्तेस्तुप्रपन्नभ यभंजन ॥ ३ ॥ जयस्वरूपंजयदंजयेशंजयकारणम् ॥ विश्वाधारंविश्वसंस्थंविश्वकारणकारणम् ॥ ४ ॥ विश्वैकरक्षकंदिव्यंविश्वघ्नंवि श्वपंजरम् ॥ फलबीजंफलाधारंफलमूलंफलप्रदम् ॥ ५ ॥ तेजःस्वरूपंतेजोदंसर्वतेजस्विनांवरम् ॥ कृष्णंविष्णुंवासुदेवंवंदेहंदीनवत्सलम् ॥ ६ ॥ नत्वांब्रह्मादयोदेवाःस्तोतुंशक्ताजगत्प्रभो ॥ कथंमंदोमनुष्योहमल्पबुद्धिर्जनार्दन ॥ ७ ॥ अतिदुःखतरंदीनंत्वद्भक्तंमामुपेक्षसे ॥ तत्कथंलोकबंधुत्वंप्रभोलोकेवृथागतम् ॥ ८ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ इत्यभिष्टूयभूमानंद्विजस्तस्थौहरेःपुरः ॥ तदाकर्ण्यहरिर्वाक्यंमुवा चजलदस्वनः ॥ ९ ॥ ॥ श्रीहरिरुवाच ॥ ॥ सम्यक्संपादितंवत्सयत्त्वयाचरितंतपः ॥ किमिच्छसिमहाप्राज्ञतपोधनवदस्वमे ॥ १० ॥

तत्तेहंवितरिष्यामिसंतुष्टस्तपसातव ॥ एतादृशंमहत्कर्मनकेनापिकृतंपुरा ॥११॥ सुदेवउवाच ॥ यदिप्रीतोसिहेनाथदीनबंधोदयानिधे ॥
सत्पुत्रंदेहिमेविष्णोपुराणपुरुषोत्तम॥१२॥हरेपुत्रंविनाशून्यंगार्हस्थ्यंमेनरोचते ॥ इतिविप्रवचःश्रुत्वाजगादहारिरीश्वरः ॥ १३ ॥ श्रीहरिरु
वाच ॥ अदेयमपितेसर्वंदास्येपुत्रंविनाद्विज ॥ तवपुत्रसुखंवत्सविधात्रानैवनिर्मितम् ॥ १४ ॥ त्वदीयभालफलकेवर्णाःसर्वेमयेक्षिताः ॥
तत्रनैवास्तितेपुत्रसुखंसप्तसुजन्मसु ॥ १५ ॥ इत्याकर्ण्यहरेर्वाक्यंवज्रनिर्घातनिष्ठुरम् ॥ सपपातमहीपृष्ठेछिन्नमूलइवद्रुमः ॥ १६ ॥ पतिं
पतितमालोक्यप्रमदात्यंतदुःखिता ॥ पश्यंतीस्वामिनंपुत्रस्पृहाशून्यमरूरुदत् ॥ १७ ॥ पश्चाद्धैर्यंसमालंब्यसावोचत्पतितंपतिम् ॥ ॥
गौतम्युवाच ॥ ॥ उत्तिष्ठोत्तिष्ठहेनाथकिंनस्मरसिमेवचः ॥ १८ ॥ विधात्रालिखितंभालेतल्लभेतसुखासुखम् ॥ किंकरोतिरमानाथःस्व
कृतं भुंजतेनरः ॥ १९ ॥ अभाग्यस्यकृतोद्योगोमुमूर्षोरिवभेषजम् ॥ तस्यसर्वंभवेद्व्यर्थंयस्यदैवमदक्षिणम् ॥ २० ॥ क्रतुदानतपःसत्य
व्रतेभ्योहरिसेवनम् ॥ श्रेष्ठंसर्वेषुवेदेषुततोदैवबलंवरम् ॥ २१ ॥ तस्मात्सर्वत्रविश्वासंविहायोत्तिष्ठभूसुर ॥ दैवमेवावलंब्याशुहरिणाकिंप्रयोज
नम् ॥ २२ ॥ इत्याकर्ण्यवचस्तस्यास्तीव्रशोकसमन्वितम् ॥ वैनतेयोवदद्विष्णुंक्षोभसंजातवेपथुः ॥ २३ ॥ ॥ गरुडउवाच ॥ ॥ शोकसा
गरसंमग्नांब्राह्मणींवीक्ष्यहेहरे ॥ तथैवब्राह्मणंनेत्रगलद्बाष्पकुलाकुलम् ॥ २४ ॥ दीनबंधोदयासिंधोभक्तानामभयंकर ॥ भक्तदुःखासहिष्णो
स्तेदयाद्यक्कगताप्रभो ॥२५॥ अहोब्रह्मण्यदेवस्त्वंत्वद्धर्मःक्कगतोऽधुना ॥ त्वद्भक्तस्यचतुर्धापिमुक्तिःकरतलेस्थिता ॥ २६ ॥ अहोतथापिने
च्छंतिविहायभक्तिमुत्तमाम् ॥ तदग्रेसिद्धयश्चाष्टौकिंकरीभूयसंस्थिताः ॥२७॥ त्वदाराधनमाहात्म्यमेवंसर्वत्रविश्रुतम् ॥ तर्हिविप्रस्यपुत्रेच्छा

पूरणेकःपरिश्रमः ॥२८॥ गजमर्पयतःपुंसोह्यंकुशेकःपरिश्रमः ॥ अतः परंनकेनापिसेव्यतेतेपदांबुजम् ॥२९॥ यदहृष्टगतंपुंसस्तदेवभविता ध्रुवम् ॥ इतिलोकेप्रथाजातात्वद्भक्तिर्विलयंगता ॥३०॥ कर्तुमकर्तुसामर्थ्यंतवसर्वत्रविश्रुतम् ॥ तदेवाद्यगतंनाथनचेदस्मैसुतप्रदः ॥ ३१ ॥ अतस्त्वंसर्वथादेहिपुत्रमेकंद्विजन्मने ॥ सुदामात्वांसमाराध्यलेभेवैभवमुत्तमम् ॥ ३२ ॥ सांदीपिनिर्मृतंपुत्रमवापकृपयातव ॥ इतितेशरणं प्राप्तौदंपतीपुत्रलालसौ ॥ ३३ ॥ श्रीनारायणउवाच ॥ ॥ इतिगरुडवचोनिशम्यविष्णुर्वचनमुवाचखगंसुधोपमानम् ॥ अयिखगवरपुत्रमेक मस्मैवितरमनोगतमाशुवैनतेय ॥ ३४ ॥ इतिहरिवचनंनिजानुकूलंझटितिनिशम्यखगोतिहृष्टचेताः ॥ अददतिविषण्णमानसायसुतम नुरूपमिलासुरायरम्यम् ॥ ३५ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येदृढधन्वोपाख्यानेश्रीनारायणनारदसंवादेसुदेववरप्रदानं नामपंचदशोध्यायः ॥ १५ ॥ ॥छ॥ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्येहंयदुक्तंदृढधन्वने ॥ वाल्मीकिनामहाप्राज्ञचरितं परमाद्भुतम् ॥ १ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ दृढधन्वन्महाराजशृणुष्ववचनंमम ॥ सुपर्णःकेशवादेशादिदमाहद्विजेश्वरम् ॥ २ ॥ ॥ गरुडउवाच ॥ ॥ सप्तजन्मसुतेपुत्रसुखंनास्तीतियद्वचः ॥ हरिणोक्तंद्विजश्रेष्ठतत्तथैवतवाधुना ॥ ३ ॥ तथापिस्वामिनाज्ञतःकृप याददामितेसुतम् ॥ मदंशसंभवःपुत्रोभवितातेतपोधन ॥ ४ ॥ येनत्वमाशिषःसत्यालप्स्यसेगौतमीयुतः ॥ परंतज्जनितंदुःखंयुवयोर्भविता ध्रुवम् ॥ ५ ॥ धन्योसिद्विजशार्दूलयत्तेजाताहरौमतिः ॥ सकामाप्यथनिष्कामाहरिभक्तिर्हरेःप्रिया ॥ ६ ॥ जलबुद्बुदवत्पुंसांशरीरंक्षणभं गुरम् ॥ तदासाद्यहरेःपादंधन्यश्चिंतयतेहृदि ॥ ७ ॥ हरेरन्योनसंसारात्तारयेद्बहुदुस्तरात् ॥ हरेरेवकृपालेशान्मयादत्तःसुतस्तव ॥ ८ ॥

मनसिश्रीहरिंधृत्वाविचरस्त्वयथासुखम् ॥ उदासीनतयास्थित्वाभुंक्ष्वसंसारजंसुखम् ॥ ९ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ दंपत्योःपश्यतोःसद्योदत्त्वावरमनुत्तमम् ॥ खगद्वाराहरिःशीघ्रंययौनिजनिकेतनम् ॥ १० ॥ सुदेवोपिसपत्नीकोवरंलब्ध्वामनोगतम् ॥ आसाद्यस्वगृहंभेजेगार्हस्थ्यसुखमुत्तमम् ॥ ११ ॥ कियत्कालक्रमेणास्यादोहदःसमपद्यत ॥ दशमेमासिसंप्राप्तेपूर्णोगर्भोबभूवह ॥ १२ ॥ प्रसूतिकालेसंप्राप्तेसासूतसुतमुत्तमम् ॥ सुदेवस्त्वात्मजेजातेजाताह्लादोबभूवह ॥ १३ ॥ आहूयजातकंकर्मचकारद्विजसत्तमान् ॥ बृहद्दानंददौतेभ्यःसुस्नातोद्विजसत्तमः ॥ १४ ॥ नामचास्याकरोद्धीमान्ब्राह्मणैःस्वजनैर्वृतः ॥ अयंसुतःसुपर्णेनदत्तःप्रेम्णाकृपालुना ॥ १५ ॥ शारदेंदुरिवप्रोद्यत्तेजस्वीशुकसन्निभः ॥ शुकदेवेतिनामायंपुत्रोस्तुममवल्लभः ॥ १६ ॥ अवर्धतसुतःशीघ्रंशुक्लपक्षइवोडुपः ॥ पितुर्मनोरथैःसाकंमातृमानसनंदनः ॥ १७ ॥ उपनीयसुतंतातःसावित्रींदत्तवान्मुदा ॥ संस्कारंवैदिकंप्राप्यब्रह्मचर्यव्रतेस्थितः ॥ १८ ॥ तत्तेजसान्वितोरेजेसाक्षात्सूर्यइवापरः ॥ वेदाध्ययनमारेभेकुमारोबुद्धिसागरः ॥ १९ ॥ सद्बुद्ध्यानंदयामासस्वगुरुंगुरुवत्सलः ॥ सकृन्निगदमात्रेणविद्यांसर्वामुपेयिवान् ॥ २० ॥ ॥ वाल्मीकिरुवाच ॥ ॥ एकदादेवलोऽभ्यागात्कोटिसूर्यसमप्रभः ॥ तमालोक्यसुदेवोसौननामदंडवन्मुदा ॥ २१ ॥ पूजयामासविधिवदर्घ्यपाद्यादिभिर्मुनिम् ॥ आसनंकल्पयामासदेवलायमहात्मने ॥ २२ ॥ तत्रोपविष्टोभगवान्देवलोदेवदर्शनः ॥ चरणेपतितंदृष्ट्वाकुमारंदेवलोब्रवीत् ॥ २३ ॥ ॥ देवलउवाच ॥ ॥ भोभोसुदेवधन्योसितुष्टस्तेभगवान्हरिः ॥ यतस्त्वंप्राप्तवान्पुत्रंदुर्लभंसुंदरंवरम् ॥ २४ ॥ एतादृशःसुतःक्कापिकस्याप्यनवलोकितः ॥ विनीतोबुद्धिमान्वाग्मीवेदाध्ययनशीलवान् ॥ २५ ॥ एहि

पुत्रकिमेतत्तेकरेपश्यामिकौतुकम् ॥ सच्छत्रंचामरयुगंकमलंयवसंयुतम् ॥ २६ ॥ आजानुलंबिनौहस्तौहस्तिहस्तसमौतव ॥ आकर्णां तविशालेचचक्षुषीमधुपिंजरे ॥ २७ ॥ वपुर्वर्तुलकंमध्यंवलित्रयविभूषितम् ॥ एवमुक्त्वासुतंदृष्ट्वापुनराहोत्सुकंद्विजम् ॥ २८ ॥ अहोसुदेव तनयस्तवायंगुणसागरः ॥ गूढजत्रुःकंबुकंठःस्निग्धकुंचितमूर्धजः ॥ २९ ॥ तुंगवक्षाःपृथुग्रीवःसमकर्णोवृषांसकः ॥ सर्वलक्षणसंपूर्णःपुत्रोभा ग्यनिधिर्महान् ॥३०॥ एकएवमहान्दोषोयेनसर्वंवृथाकृतम् ॥ इत्युक्त्वामौलिमाधुन्वन्विनिःश्वस्याब्रवीन्मुनिः ॥३१॥ पूर्वमायुःपरीक्षेतपश्चा ल्लक्षणमादिशेत् ॥ निरायुषःकुमारस्यलक्षणैःकिंप्रयोजनम् ॥३२॥ सुदेवतनयोऽयंतेद्वादशेहायनेजले ॥ मृत्युमेष्यतितस्मात्त्वंशोकंमाकुरु मानसे ॥ ३३ ॥ अवश्यंभाविनोभावाभवंत्येवनसंशयः ॥ तत्रप्रतिविधिर्नास्तिमुमूर्षोरिवभेषजम् ॥३४॥ वाल्मीकिरुवाच ॥ इत्युदीर्यगतो देवलोकंदेवलकोमुनिः ॥ सुदेवःसहगौतम्यापपातधरणीतले ॥३५॥ विललापचिरंभूमौदेवलोक्तंवचःस्मरन् ॥ अथसागौतमीपुत्रंस्वांकमारो प्यधैर्यतः ॥ चुचुंबवदनंप्रेम्णापश्चात्पतिमुवाचसा ॥३६॥ ॥ गौतम्युवाच ॥ ॥ द्विजराजनकर्तव्याभीतिर्भाव्येषुवस्तुषु ॥३७॥ नाभाव्यंभ विताकुत्रभाव्यमेवभविष्यति ॥ किंनुनोदुःखमापन्नानलरामयुधिष्ठिराः ॥ ३८ ॥ बंधनंबलिराजोपिप्राप्तवान्यदवःक्षयम् ॥ हिरण्याक्षोवधं घोरोवृत्रोपिनिधनंगतः ॥ ३९ ॥ कार्त्तवीर्यःशिरश्छेदंरावणोपितथाप्तवान् ॥ विरहंरघुनाथोपिजानक्याःप्राप्तवान्मुने ॥ ४० ॥ परीक्षिद पिराजर्षिर्ब्राह्मणान्मृत्युमाप्तवान् ॥ एवंयेभाविनोभावाभवंत्येवमुनीश्वर ॥ ४१ ॥ अतउत्तिष्ठहेनाथहरिंभजसनातनम् ॥ शरण्यंसर्वजीवा नांनिर्वाणपददायकम् ॥ ४२ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ इतिनिजवनितावचोनिशम्यप्रकृतिमुपागतवान्सुदेवशर्मा ॥ हृदिहरिचरणांबुजं

निधायझटितिजहौशुचमात्मजाद्धविन्नीम् ॥४३॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्याने सुदेवप्रतिबोधोनामषोडशोऽध्यायः ॥१६॥ ॥ नारदउवाच ॥ ॥ ततःकिमभवत्तस्यप्रबुद्धस्यमहीपतेः ॥ तन्मेवदकृपासिंधोशृण्वतांपापना शनम् ॥ १ ॥ श्रीनारायणउवाच ॥ ॥ स्वकीयचरितंश्रुत्वाप्राक्तनंचकिताननम् ॥ राजानंपुनरेवाहवाल्मीकिःश्रवणोत्सुकम् ॥ २ ॥ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ इतिताःशीतलावाचःसमाकर्ण्यप्रियामुखात् ॥ सुदेवोधैर्यमालंब्यहरौचित्तमधारयत् ॥ ३ ॥ निःश्वस्यदीनवद नोयद्भाव्यंतद्भविष्यति ॥ इतिनिश्चित्यमनसापुष्पाद्यर्थंवनंययौ ॥ ४ ॥ एवंकृतवतस्तस्यकियान्कालोगतःक्रमात् ॥ समित्कुशफलाद्यर्थं कदाचित्काननंययौ ॥ ५ ॥ सुदेवोमनसाध्यायन्हरेःपादसरोरुहम् ॥ तस्मिन्नेवदिनेगच्छद्वापींसूनुःसुहृद्वृतः ॥ ६ ॥ प्रविश्यवापींचिक्रीडे वयस्यैःसहवारिणि ॥ जलयंत्रैःक्षिपन्वारिबालकेषुस्मयन्मुहुः ॥ ७ ॥ जलेक्रीडांमुहुःकुर्वन्ग्रीष्मेमोदमुपाययौ ॥ एवंसर्वेषुबालेषुक्रीडत्सुप्रे मनिर्भरम् ॥ ८ ॥ अगाधसलिलेतिष्ठन्बालकैरुपमर्दितः ॥ सपलायनमन्विच्छन्सुहृद्वर्गभयाद्भुतम् ॥ ९ ॥ विधिनानोदितस्तत्रनिय म्यश्वासमात्मनः ॥ ममज्जागाधतोयेसौवंचयन्नात्मनः सखीन् ॥१०॥ तत्रापिव्याकुलीभूयततोनिर्गंतुमुन्मनाः ॥ सहसामृतिमापन्नःकुम रोऽगाधवारिणि॥११॥जलादनिर्गतंवीक्ष्यसर्वेचकितमानसाः ॥ समानवयसःसर्वेहाहाकृत्वाप्रधाविताः ॥१२॥ गौतम्यैकथयामासुर्बृहच्छो कपरायणाः॥वज्रपातसमांवाचंबालानामनतिप्रियाम्॥१३॥श्रुत्वाभूमौपपाताशुगौतमीपुत्रवत्सला॥एतस्मिन्नेवसमयेवनाद्विप्रःसमाययौ ॥ ॥१४॥निशम्यपुत्रमरणंत्वष्टेवावापतद्भुवि ॥ ततउत्थायतौविप्रदंपतीवापिकांगतौ॥१५॥मृतंपुत्रंसमालिंग्यस्वांकेकृत्वाकलेवरम् ॥ सुदेवःपुत्र

वदनंचुचुंबचमुहुर्मुहुः ॥ १६ ॥ ततःस्वांकेस्थितंपुत्रंमृतंवीक्षन्मुहुर्मुहुः ॥ सरुदन्विलपन्नेवगद्गदाक्षरमूचिवान् ॥ १७ ॥ ॥सुदेवउवाच ॥ वदपुत्रशुभांवाणींममशोकविनाशिनीम् ॥ शीतलांललितांवत्समनसोमोदमावह ॥ १८ ॥ विहायपितरौवृद्धौनत्वंगंतुमिहार्हसि ॥ वत्साह्व यतिसन्मित्रंवेदाध्ययनहेतवे ॥ १९ ॥ मुदाह्वयत्युपाध्यायस्त्वामध्यापनहेतवे ॥ तूर्णमुत्तिष्ठहेपुत्रकथंसुतोसिसांप्रतम् ॥२० ॥ त्वांविहा यनगच्छामिगृहेकिंमेप्रयोजनम् ॥ शून्यारण्यमिवाद्यैवत्ववर्ततेसदनंमम ॥ २१ ॥ वनेपिनैवगच्छामिगमनेकिंप्रयोजनम् ॥ फलमूलप्रियत्वं चेन्नोत्तिष्ठसिममाग्रतः ॥ २२ ॥ नमयाचरितंगर्ह्यंब्रह्महत्यापिनोकृता ॥ केनकर्मविपाकेनपुत्रोमेनिधनंगतः ॥ २३ ॥ अहोधातःकिमेताव त्फलंलब्धंत्वयामहत् ॥ लोचनंममदीनस्यवृद्धस्याकृष्यनिर्दय ॥२४॥ निर्धनस्यधनंबालंदंपत्योरवलंबनम् ॥ हरतस्तेकथंलज्जाजायतेन हिकुत्रचित् ॥ २५ ॥ सर्वत्रसदयस्त्वंवैमयिनिर्दयतांगतः ॥ कथमित्यन्यथाभावोममभाग्यवशादहो ॥ २६ ॥ कुत्राहंशोधयाम्यद्यपुत्रंप्रकृ तिसुन्दरम् ॥ द्रक्ष्येतवाननंकुत्रपुत्रचारुसुलोचनम् ॥ २७ ॥ पर्जन्यःस्रवतेवारिसूतेधान्यंवसुंधरा ॥ गिरयोरत्नजातानिमुक्तासारंपयोनिधिः ॥ २८ ॥ नतंदेशंप्रपश्यामियत्रपुत्रंमृतंलभेत् ॥ यद्गात्रंतुसमालिंग्यहृद्गतंतापमुत्सृजेत् ॥ २९ ॥ हेवत्सत्वंसकृद्वाचंश्रावयाशुदयांकुरु ॥ विलपत्यतितेमाताकुररीवगतत्रपा ॥ ३० ॥ तांदृष्ट्वातुकथंपुत्रदयानोत्पद्यतेतव ॥ अननुज्ञाप्यपितरौनकदापिभवान्गतः ॥ ३१ ॥ आ वामपृष्ट्वाकिंदीर्घमार्गंयातोसिपुत्रक ॥ वेदाध्ययनसद्वाणींकस्यश्रोष्यामिसांप्रतम् ॥ ३२ ॥ त्वामनुस्मरतोवत्सकलवाक्यंमनोहरम् ॥ शत धादीर्यतेनोयद्यायसंहृदयंमम ॥ ३३ ॥ मन्येसुधन्यंकिलकोशलेंद्रंयःकाननंदाशरथौप्रयाते ॥ दधारनोऽसून्सुततापदग्धोधिङ्मांसुतस्य

प्रलयेप्यनष्टम् ॥ ३४ ॥ गोविंदविष्णोयदुनाथनाथश्रीरुक्मिणीप्राणपतेमुरारे ॥ दीनानुकंपिन्भगवन्दयालोमांपाहिपुत्रानलतापतप्तम् ॥
॥ ३५ ॥ देवाधिदेवाखिललोकनाथगोपालगोपीशरथांगपाणे ॥ कलिंदकन्याविषदोषहारिन्मांपाहिपुत्रानलतापतप्तम् ॥ ३६ ॥
वैकुंठविष्णोनरकासुरारेचराचराधारभवाब्धिपोत ॥ ब्रह्मादिदेवानतपादपीठमांपाहिपुत्रानलतापतप्तम् ॥ ३७ ॥ शठोमदन्योभवितानको
पियोदेवकीसूनुवचोविलंघ्य ॥ पुत्रेदुराशांकृतवानभाग्योलभेतकोदृष्टविनष्टवस्तु ॥ ३८ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमा
हात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेसुदेवविलापोनामसप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ छ ॥
॥ ॥ नारदउवाच ॥ ॥ दृढधन्वामहीपालंकिमुवाचततःपरम् ॥ वालमीकिर्भगवान्साक्षात्तद्वदस्वतपोनिधे ॥ १ ॥ ॥ श्री
नारायणउवाच ॥ ॥ दृढधन्वासराजर्षिः श्रुत्वाप्राक्तनमात्मनः ॥ सविस्मयःसमापृच्छद्वालमीकिंमुनिसत्तमम् ॥ २ ॥ ॥ दृढधन्वो
वाच ॥ ॥ ब्रह्मंस्तववचोरम्यंसुधाकल्पंनवंनवम् ॥ पीत्वापीत्वानतृप्तोस्मिभूयोवदततःपरम् ॥ ३ ॥ ॥ वालमीकिरुवाच ॥ ॥ एवंविल
पतस्तस्यविप्रस्यजगतीपते ॥ अकालजलदोभ्यागाद्गर्जयंश्चदिशोदश ॥ ४ ॥ ववौवायुःखरस्पर्शःकंपयन्निवपर्वतान् ॥ बृहद्धसन्म
हाविद्युत्स्वनेनापूरयन्दिशः ॥ ५ ॥ यावन्मासंववर्षैवमहीपूर्णजलाभवत् ॥ नासौविज्ञातवान्किंचित्पुत्रशोकाग्नितापितः ॥ ६ ॥ नपपौ
बुभुजेचैवपुत्रपुत्रइतिब्रुवन् ॥ एवंविलपतस्तस्यमासोयोविगतस्तदा ॥ ७ ॥ श्रीकृष्णवल्लभोमासःसोभवत्पुरुषोत्तमः ॥ आजनतोपित
स्यासीत्पुरुषोत्तमसेवनम् ॥ ८ ॥ तेनात्यंतप्रसन्नःसन्प्रादुरासीद्धरिःस्वयम् ॥ नवीनजलदश्यामोवनमालाविभूषितः ॥ ९ ॥ प्रादुर्भूते

जगन्नाथेविलीनाघनराजयः ॥ ततोददर्शविप्रोसौश्रीकृष्णंपुरुषोत्तमम् ॥१०॥ सहसांकगतंपुत्रदेहंभुविनिधायच ॥ सपत्नीकोनमश्चक्रेदंड वच्छ्रीहरिंमुदा ॥ ११ ॥ बद्धांजलिपुटोभूत्वासंस्थितःश्रीहरेःपुरः ॥ श्रीकृष्णएवशरणंममास्त्वितिविचिंतयन् ॥ १२ ॥ भगवानपितुष्टःस न्पुरुषोत्तमसेवनात् ॥ अवोचन्मधुरांवाणींबृहत्पीयूषवर्षिणीम् ॥ १३ ॥ श्रीहरिरुवाच ॥ भोभोसुदेवधन्योसिभाग्यवान्सांप्रतंभवान् ॥ त्वद्भाग्यंवर्णितुंकोवासमर्थोभुवनत्रये ॥ १४ ॥ शृणुवत्सप्रवक्ष्येहंयत्तेभावितपोधन ॥ द्वादशाब्दसहस्रायुःपुत्रस्तेभविताद्विज ॥ १५ ॥ अतःपरंनसंदेहस्तवपुत्रोद्भवेसुखे ॥ मयायंतेसुतोदत्तःप्रसन्नेनद्विजोत्तम ॥ १६ ॥ तवपुत्रसुखंदृष्ट्वादेवगंधर्वमानवाः ॥ सस्पृहास्तेभविष्यंति प्रसादान्मेद्विजोत्तम ॥ १७ ॥ अत्रतेकथयिष्यामिइतिहासंपुरातनम् ॥ मार्कंडेयेनमुनिनापुराप्रोक्तंरघुंनृपम् ॥१८॥ पुरामुनीश्वरःकश्चिद्ध नुर्नामामहामनाः ॥ पश्यन्पुत्राधिनिर्दग्धाल्लँलोकान्दीनमनाअभूत् ॥ १९ ॥ अमरंपुत्रमन्विच्छंस्तपस्तेपेसुदारुणम् ॥ सहस्राब्देगते कालेदेवास्तमब्रुवन्मुनिम् ॥२०॥ वरंवरयभद्रंते यस्तेमनसिवांछितः ॥ प्रसन्नाः स्मोवयंसर्वेतीव्रेणतपसातव ॥ २१ ॥ श्रीनारायण उवाच ॥ ॥ इतिदेववचः श्रुत्वासुतृप्तोऽमृतसन्निभम् ॥ वव्रेतपोधनःपुत्रममरंबुद्धिशालिनम् ॥ २२ ॥ तमूचुर्निर्जराःसर्वेनैवंभूतोस्तिभूतले ॥ पुनराहमुनिर्देवान्निमित्तायुर्भवत्विति ॥ २३ ॥ सुराःप्रोचुर्निमित्तंकिंवदसोप्यवदन्मुनिः ॥ असौमहान्गिरिर्यावत्तावदायुर्विधीयताम् ॥२४॥ एवमस्त्वितिसंपाद्यसेंद्रादेवादिवंययुः ॥ धनुःशर्मासुतंलेभेकालेनाल्पेनतादृशम् ॥ २५ ॥ सपुत्रोववृधेतस्यतारापतिरिवांबरे ॥ प्राप्तेतुषो डशेवर्षेपुत्रंप्राहमुनीश्वरः ॥२६॥ हेवत्सम्मुनयः सर्वेनावज्ञेयाः कदाचन ॥ शिक्षितोपियथापुत्रःसोद्वेगानकरोन्मुनीन् ॥२७॥ निमित्तायुर्बलो

न्मत्तोब्राह्मणान्नवमन्यते ॥ कदाचिन्महिषोनाममुनिःपरमकोपनः॥२८॥पूजयामासविधिनाशालग्रामशिलांशुभाम्॥तदानींससमागत्यता
मादयत्वरान्वितः ॥ २९ ॥चिक्षेपनिजचांचलयात्कूपेपूर्णजलेहसन् ॥ ततःक्रोधसमाविष्टःकालरुद्रइवापरः ॥ ३० ॥ शशापधनुषःपुत्रमद्यैव
म्रियतामयम् ॥ नमृतंपुत्रमालक्ष्यदध्यौमनसिकारणम् ॥ ३१ ॥ निमित्तायुरयंदेवैःकृतोयंधनुषःसुतः ॥ इतिचिंतापरेणाशु निःश्वासःप्रकटी
कृतः ॥ ३२ ॥ महिषाःकोटिशोजातातैर्गिरिःशकलीकृतः ॥ तदानींमृतिमापन्नोमुनिपुत्रोतिदुर्मदः ॥ ३३ ॥ धनुःशर्मातिदुःखेनविल
लापमुहुर्मुहुः ॥ विलप्यबहुधाविप्रोगृह्यपुत्रकलेवरम् ॥ ३४ ॥ प्रविवेशचितावह्निंपुत्रदुःखातिपीडितः ॥ एवंहठात्पुत्रायेनसुखंयातिकुत्र
चित् ॥३५॥ वैनतेयेनयोदत्तस्तनयोऽयंतपोधन ॥ तेनत्वंपुत्रवाँछ्लोकेस्पृहणीयोभविष्यसि॥३६॥ पुरुषोत्तममाहात्म्यात्प्रसन्नेनमयानघ ॥
सुचिरंस्थापितोयंहितनयःसुखदोस्तुते ॥ ३७ ॥ गार्हस्थ्यमतुलंभुक्त्वासहपुत्रेणसर्वदा ॥ ततस्त्वंब्रह्मणोलोकंगत्वातत्रमहत्सुखम् ॥ ३८ ॥
दिव्याब्दवर्षसाहस्रंभुक्त्वागंतासिभूतले ॥ ततोराजाचक्रवर्तीभविष्यसिद्विजोत्तम ॥ ३९ ॥ दृढधन्वेतिविख्यातःसमृद्धबलवाहनः ॥ संव
त्सराणामयुतंराज्यंभोक्ष्यसिपार्थिवम् ॥ ४० ॥ अव्याहतबलैश्वर्यमाखंडलपदाधिकम् ॥ गौतमीयंतवांगार्धहारिणीमहिषीतदा ॥ ४१ ॥
पतिसेवारतानित्यंनाम्नाचगुणसुंदरी ॥ चत्वारस्तेसुताभाव्याराजनीतिविशारदाः ॥४२॥ कन्यैकाचमहाभागासुशीलासुवरानना ॥ भुक्त्वा
भोगान्महाभागसुरासुरसुदुर्लभान् ॥ ४३ ॥ कृतार्थोहंधरापीठेइत्यज्ञानविमोहितः ॥ अतिदुस्तरसंसारविषयाकृष्टमानसः ॥ ४४ ॥
यदाविस्मरसेविष्णुंसंसारार्णवतारकम् ॥ अयंतेतनयोविप्रशुकोभूत्वातदावने ॥ ४५ ॥ वटवृक्षंसमाश्रित्यत्वामेवंबोधयिष्यति ॥ वैराग्यो

त्पादकंपद्यंपठन्नेवमुहुर्मुहुः ॥ ४६ ॥ श्रुत्वावाक्यंशुकप्रोक्तंदुर्मनागृहमेष्यसि ॥ अथचिंतार्णवेमग्नंत्यक्त्वाविषयजंसुखम् ॥ ४७ ॥ वाल्मीकिस्त्वांसमागत्यबोधयिष्यतिभूसुर ॥ तद्वाक्यैश्छिन्नसंदेहस्त्यक्त्वालिंगंहरेःपदम् ॥ ४८ ॥ गमिष्यसिसपत्नीकःपुनरावृत्तिवर्जितम् ॥ वदत्येवंमहाविष्णौसमुत्तस्थौद्विजात्मजः ॥ ४९ ॥ दंपतीतौसुतंदृष्ट्वामहानंदौबभूवतुः ॥ सुराःसर्वेपिसंतुष्टाववृषुःकुसुमाकरान् ॥ ५० ॥ ननामशुकदेवोपिश्रीहरिंपितरौचतौ ॥ गरुडोप्यतिसंहृष्टस्तंदृष्ट्वासमुतंद्विजम् ॥ ५१ ॥ ब्राह्मणश्चकितोभूत्वाननामश्रीहरिंतदा ॥ बद्धांजलिपुटोविप्रःप्रोवाचजगदीश्वरम् ॥ ५२ ॥ हृदिस्थंसंशयंछेत्तुंहर्षगद्गदयागिरा ॥ ५३ ॥ चत्वार्यब्दसहस्रमेवमनिशंतप्तंतपोदुष्करंतत्रागत्यवचस्त्वयानिगदितंयन्मांहरेकर्कशम् ॥ हेवत्साद्यविलोकितंतवसुतोनैवास्तिनैवास्तिहितद्वाक्यंव्यतिलंघ्यमेमृतसुतोत्थानेचहेतुंवद ॥ ५४ ॥ ॥ इति श्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेसुदेवपुत्रजीवनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ सूतउवाच ॥ इतिब्रुवाणंप्राचीनंमुनिमाहतपस्विनः ॥ प्रीणयन्निवसद्वाचानारदोमुनिसत्तम ॥ १ ॥ किमुवाचोत्तरंब्रह्मन्सुदेवंतपसांनिधिम् ॥ प्रसन्नोभगवान्विष्णुस्तन्मेब्रूहितपोनिधे ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्थमावेदितोविष्णुःसुदेवेनमहात्मना ॥ प्रत्याहप्रीणयन्वाचाभगवान्भक्तवत्सलः ॥ ३ ॥ हरिरुवाच ॥ द्विजराजकृतंयत्तेनैतदन्यःकरिष्यति ॥ नतद्वेत्तिभवान्नूनंयेनाहंतुष्टिमाप्तवान् ॥ ४ ॥ अथममप्रियोमासःप्रयातःपुरुषोत्तमः ॥ तत्सेवातेसमजनिशोकमग्नस्यसस्त्रियः ॥ ५ ॥ एकमप्युपवासंयःकरोत्यस्मिंस्तपोनिधे ॥ असावनंतपापानिभस्मीकृत्यद्विजोत्तम ॥ सुरयानंसमारुह्यवैकुंठंयातिमानवः ॥ ६ ॥ माससमात्रंनिराहारोह्यकालजलदागमात् ॥ त्रिषुकालेषुतेस्नानं

संजातंप्रतिवासरम् ॥ ७ ॥ अभ्रस्नानंत्वयालब्धंमासमात्रंतपोधन ॥ उपवासाश्चतेजातास्तावन्मात्रमखंडिताः ॥८॥ शोकसागरमग्नस्यपु
रुषोत्तमसेवनम् ॥ अजानतोपिसंजातंचेतनारहितस्यते ॥ ९ ॥ त्वदीयसाधनस्यास्यप्रमाणंकःकरिष्यति ॥ एकतःसाधनान्येववेदोक्ता
निचयानिवै ॥ १० ॥ तानिसर्वाणिसंगृह्यह्येकतःपुरुषोत्तमम् ॥ तोलयामासदेवानांसन्निधौचतुराननः ॥ ११ ॥ लघून्यन्यानिजातानि
गुरुश्चपुरुषोत्तमः ॥ तस्माद्भूमिस्थितैर्लोकैःपूज्यतेपुरुषोत्तमः ॥१२॥ पुरुषोत्तममासस्तुसर्वत्रास्तितपोधन ॥ तथापिपृथिवीलोकेपूजितः
सफलोभवेत् ॥ १३ ॥ तस्मात्सर्वात्मनावत्सभवान्धन्योस्तिसांप्रतम् ॥ यदस्मिंस्तत्तवानुग्रंतपःपरमदारुणम् ॥ १४ ॥ मानुषंजन्मसंप्रा
प्यमासेश्रीपुरुषोत्तमे ॥ स्नानदानादिरहितादरिद्राजन्मजन्मनि ॥ १५ ॥ तस्मात्सर्वात्मनासेव्योमत्प्रियःपुरुषोत्तमः ॥ समेवल्लभतांया
तिधन्योभाग्ययुतोनरः ॥ १६ ॥ ॥ श्रीनारायणउवाच ॥ ॥ एवमुक्त्वाहरिःशीघ्रंजगामजगदीश्वरः ॥ वैनतेयंसमारुह्यवैकुंठममलंमुने
॥ १७ ॥ सपत्नीकःसुदेवस्तुमुमुदेहर्निशंभृशम् ॥ मृतोत्थितंशुकंदृष्ट्वापुरुषोत्तमसेवनात् ॥ १८ ॥ अजानतोममैवासीत्पुरुषोत्तमसेवनम् ॥
तदेवसफलंजातंयेनपुत्रोमृतोत्थितः॥ १९ ॥ अहोएतादृशोमासोनैवदृष्टःकदाचन ॥ इत्येवंविस्मयाविष्टस्तंमासंसमपूजयत् ॥ २० ॥ तेन
पुत्रेणमुमुदेसपत्नीकोद्विजोत्तमः ॥ पितरंनंदयामासशुकदेवोपिसत्कृतैः ॥ २१ ॥ स्तुवन्मासंचविष्णुंचपूजयामाससादरम् ॥ कर्ममार्गेस्पृ
हांत्यक्त्वाभक्तिमार्गैकसस्पृहः ॥ २२ ॥ सर्वदुःखापहंमासंवरिष्ठंपुरुषोत्तमम् ॥ जपहोमादिभिस्तस्मिन्नभजच्छ्रीहरिंश्रिया ॥ २३ ॥ भुक्त्वा
थविषयान्सर्वान्सहस्राब्दमहर्निशम् ॥ जगामपरमंलोकंसपत्नीकोद्विजोत्तमः ॥२४॥ योगिनामपिदुष्प्रापंयाजकानांतुतत्कुतः ॥ यत्रगत्वा

नशोचंतिवसंतोहरिसन्निधौ ॥ २५ ॥ तत्रत्यंसुखमासाद्यसपत्नीकोसुवंगतः ॥ सएवदृढधन्वात्वंप्रथितःपृथिवीपतिः ॥ २६ ॥
पुरुषोत्तममासस्यसेवनात्सकलर्द्धिभाक् ॥ महिषीयंपुराराजन्गौतमीपतिदेवता ॥ २७ ॥ एतत्तेसर्वमाख्यातंपृष्टवानसियन्मम ॥
शुकस्तुतवभूपालपूर्वजन्मनियःसुतः ॥ २८ ॥ शुकदेवइतिख्यातोहरिणायोनुजीवितः ॥ द्वादशाब्दसहस्रायुर्भुक्त्वावैकुंठमेयिवान् ॥
॥ २९ ॥ सएवारण्यसरसिवटवृक्षंसमाश्रितः ॥ त्वामेवागतमालोक्यपितरंपूर्वजन्मनः ॥ ३० ॥ हितानामुपदेष्टारंप्रत्यक्षंदैवतं
मम ॥ संसारसागरेमग्नंविषयव्यालदूषिते ॥ ३१ ॥ अत्यंतकृपयाविष्टश्चिंतयामासकीरजः ॥ नबोधयामिचेद्भूपंममापिबंधनंभवेत् ॥
॥ ३२ ॥ पुन्नामनरकाद्यस्तुत्रायतेपितरंसुतः ॥ इतिश्रुत्यर्थबोधोपिस्यादेवाद्यान्यथामम ॥ ३३ ॥ तस्मादुपकरिष्यामिपितरंपूर्वजन्म
नः ॥ अवधार्यवचश्चेत्थंकीरजोऽजीगदन्नृप ॥३४॥ इत्येतत्कथितंसर्वंयद्यत्पृष्टंत्वयानघ ॥ अतःपरंगमिष्यामिसरयूंपापनाशिनीम् ॥३५॥
॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्येवंप्रथमजनुश्चरित्रमुक्त्वाभूपस्यप्रथितयशस्विनश्चिराय ॥ गच्छंतंमुनिमनुनीयराजराजःप्रावोच
त्किमपिनमन्नगण्यपुण्यः ॥ ३६ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्ये श्रीनारायणनारदसंवादेवाल्मीकिनोक्तदृढधन्वोपा
ख्यानेपुरुषोत्तममाहात्म्यकथनंनामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ ॥ सूतउवाच ॥ ॥ नारायणमुखाच्छ्रुत्वा
प्राक्तनंदृढधन्वनः ॥ नातितृप्तमनाविप्रानारदःपृष्टवान्मुनिम् ॥ १ ॥ ॥ नारदउवाच ॥ ॥ किमुवाचमहाराजोवाल्मीकिंमुनिसत्त
मम् ॥ तन्मेवदविनीतायतपोधनसुविस्तरम् ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्येहंयदुक्तंदृढधन्वना ॥ अनुनीयम

हाभाज्ञंवाल्मीकिंमुनिसत्तमम् ॥ ३ ॥ ॥ दृढधन्वोवाच ॥ ॥ पुरुषोत्तममासोयंकथंकार्योमुमुक्षुभिः ॥ कीदृशीकस्यपूजात्रकिंदानं कोविधिर्मुने ॥ ४ ॥ एतत्सर्वंसमाचक्ष्वसर्वलोकहितायमे ॥ सर्वलोकहितार्थायचरंतिहिभवादृशाः ॥ ५ ॥ असौमासःस्वयंसाक्षाद्भगवा न्पुरुषोत्तमः ॥ तस्मिन्कृतेमहत्पुण्यंत्वन्मुखात्संश्रुतंमया ॥ ६ ॥ पूर्वजन्मन्यहंभूत्वासुदेवोब्राह्मणोत्तमः ॥ विधिनाकृतवान्मासंदृष्ट्वापुत्रं मृतोत्थितम् ॥ ७ ॥ अजानतोपिमेब्रह्मन्पुत्रशोकादचेतसः ॥ निराहारस्यसततंगतश्चपुरुषोत्तमः ॥ ८ ॥ तस्याप्येतत्फलंजातंशुकदेवोमृ तोत्थितः ॥ अनुभूतमिमंमासंसेवेतहरिणोदितः ॥ ९ ॥ इहजन्मनितत्सर्वंविस्मृतंमेतपोधन ॥ एतत्पूजाविधानंमेवदविस्तरतःपुनः ॥ १० ॥ ॥ वाल्मीकिरुवाच ॥ ॥ ब्राह्ममुहूर्तेचोत्थायपरंब्रह्मविचिंतयेत् ॥ ततोव्रजेन्नैर्ऋतांशांबृहत्सोदकभाजनः ॥ ११ ॥ ग्रामाद्दू रतरंगच्छेत्पुरुषोत्तमसेवकः ॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः ॥ १२ ॥ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा ॥ वक्त्रंनियम्ययत्ने ननोष्ठीवेन्नोच्छ्वसेदपि ॥ १३ ॥ कुर्यान्मूत्रपुरीषंचरात्रौचेद्दक्षिणामुखः ॥ गृहीतशिश्नश्चोत्थायगृहीतशुचिमृत्तिकः ॥ १४ ॥ गंधलेपक्षयक रंकुर्याच्छौचमतंद्रितः ॥ एकालिंगेगुदेपंचत्रिर्वामेदशचोभयोः ॥१५॥ द्विसप्तपादयोश्चैवगार्हस्थ्यंशौचमुच्यते ॥ कृत्वाशौचंतुप्रक्षाल्यपादौ हस्तौचमृज्जलैः ॥१६॥ तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणा ॥ अरत्निद्वयसंचारित्यक्त्वाकुर्यादनुद्धृते ॥१७॥ पश्चात्तच्छोधयेत्तीर्थमशुद्धम न्यथाहितम् ॥ एवंशौचंप्रकुर्वीतपुरुषोत्तमसद्व्रती॥१८॥ ततःषोडशगंडूषान्प्रकुर्याद्द्वादशैववा ॥ मूत्रोत्सर्गेतुगंडूषानष्टौवाचतुरोगृही॥१९॥ उत्थायनेत्रेप्रक्षाल्यदंतकाष्ठंसमाहरेत् ॥ इमंमंत्रंसमुच्चार्यदंतधावनमाचरेत् ॥ २० ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमे

धांचत्वंनोदेहिवनस्पते ॥ २१ ॥ अपमार्गंबादरंवाद्वादशाँगुलमन्नणम् ॥ कनिष्ठांगुलिवत्स्थूलंपर्वार्द्धेकृतकूर्चकम् ॥२२॥ शुचिर्द्वादशगंडूषै
र्निषिद्धंभानुवासरे ॥ आचम्यप्रयतः सम्यक्प्रातःस्नानंसमाचरेत् ॥ २३ ॥ स्नानादनंतरंतावत्तर्पयेत्तीर्थदेवताः ॥ समुद्रगानदीस्नानमुत्तमं
परिकीर्तितम् ॥२४॥ वापीकूपतडागेषुमध्यमंकथितंबुधैः ॥ गृहेस्नानंतुसामान्यंगृहस्थस्यप्रकीर्तितम् ॥ २५ ॥ ततश्चवाससीशुद्धेशुक्लेचप
रिधायच ॥ उत्तरीयंसदाधार्यंब्राह्मणेनविजानता ॥ २६ ॥ उपविश्यशुचौदेशेप्राङ्मुखोवाउदङ्मुखः ॥ भूत्वाबद्धशिखःकुर्यादंतर्जानुभुज
द्वयम् ॥ २७ ॥ सपवित्रेणहस्तेनकुर्यादाचमनक्रियाम् ॥ नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टंतुवर्जयेत् ॥२८॥ आचम्यतिलकंकुर्याद्गोपीचंदन
मृत्स्नया ॥ ऊर्ध्वंपुण्ड्रमृजुंसौम्यंदंडाकारंप्रकल्पयेत् ॥ १९ ॥ ऊर्ध्वपुण्ड्रंत्रिपुण्ड्रेवामध्येछिद्रंप्रकल्पयेत् ॥ निवसत्यूर्ध्वपुंड्रेतुश्रियासहहरिः
स्वयम् ॥ ३० ॥ त्रिपुंड्रंधूर्जटिः साक्षादुमयासहसर्वदा ॥ विनाछिद्रंतुतंपुंड्रंशुनःपादसमंविदुः ॥ ३१ ॥ श्वेतंज्ञानकरंप्रोक्तंरक्तंवश्यकरंनृ
णाम् ॥ पीतंसर्वर्द्धिदंप्रोक्तमन्यत्तुपरिवर्जयेत् ॥ ३२ ॥ शंखचक्रादिकंधार्यंगोपीचंदनमृत्स्नया ॥ सर्वपापक्षयकरंपूजांगंपरिकीर्तितम्॥३३॥
शंखचक्रादिचिह्नानिदृश्यंतेयस्यविग्रहे ॥ मर्त्योमर्त्योनविज्ञेयःसनित्यंभगवत्तनुः ॥ ३४ ॥ पापंसुकृतरूपंतुजायतेतस्यदेहिनः ॥ शंखच
क्रादिचिह्नानियोधारयतिनित्यशः ॥ ३५ ॥ नारायणायुधैर्नित्यंचिह्नितोयस्यविग्रहः ॥ पापकोटियुतस्यापितस्यकिंकुरुतेयमः ॥ ३६ ॥
प्राणायामंततःकृत्वासंध्यावंदनमाचरेत् ॥ पूर्वसंध्यांसनक्षत्रामुपासीतयथाविधि ॥ ३७ ॥ गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम् ॥
सावित्रैरनघैर्मंत्रैरुपस्थायकृतांजलिः ॥ ३८ ॥ आत्मपादौतथाभूमौसंध्याकालेऽभिवादयेत् ॥ यस्यस्मृत्येतिमंत्रेणयदूनंपरिपूरयेत् ॥३९॥

यस्तुसंध्यामुपासीतश्रद्धयाविधिवद्द्विजः ॥ नतस्यकिंचिद्दुष्प्रापंत्रिषुलोकेषुविद्यते ॥ ४० ॥ दिवसस्यादिमेभागेकृत्यमेतदुदीरितम् ॥ एवं कृत्वाक्रियांनित्यांहरिपूजांसमाचरेत् ॥४१॥ उपलिप्तेशुचौदेशेनियतोवाग्यतःशुचिः ॥ वृत्तंवाचतुरस्रंवामंडलंगोमयेनतु ॥ ४२ ॥ विधायाष्टदलंकुर्यात्तंडुलैर्व्रतसिद्धये ॥ सौवर्णराजतंताम्रंमृन्मयंसुदृढंनवम् ॥ ४३ ॥ अव्रणंकलशंशुद्धंस्थापयेन्मंडलोपरि ॥ तत्रोदकंसमापूर्यशुद्धतीर्थाहृतंशिवम् ॥ ४४ ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाः स्मृताः ॥ ४५ ॥ कुक्षौतुसागराः सर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ ४६ ॥ अंगैश्चसहिताः सर्वेकलशंतुसमाश्रिताः ॥ एवंसंस्थाप्यकलशंतत्रतीर्थानियोजयेत् ॥ ४७ ॥ गंगागोदावरीचैवकावेरीचसरस्वती ॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥ ४८ ॥ ततःसंपूज्यकलशमुपचारैःसमंत्रकैः ॥ गंधाक्षतैश्चनैवेद्यैःपुष्पैस्तत्कालसंभवैः ॥ ४९ ॥ तस्योपरिन्यसेत्पात्रंताम्रपीतांबरावृतम् ॥ तस्योपरिन्यसेद्धैमंराधयासहितंहरिम् ॥ ५० ॥ राधयासहितःकार्यःसौवर्णःपुरुषोत्तमः ॥ तस्यपूजाप्रकर्तव्याविधिनाभक्तितत्परैः ॥ ५१ ॥ पुरुषोत्तममासस्यदैवतंपुरुषोत्तमः ॥ तस्यपूजाप्रकर्तव्यासंप्राप्तेपुरुषोत्तमे ॥ ५२ ॥ संसारसागरेमग्नमुद्धारयतियोध्रुवम् ॥ कोनसेवेततंलोकेमर्त्योमरणधर्मवान् ॥ ५३ ॥ पुनर्ग्रामाःपुनर्वित्तंपुनःपुत्राःपुनर्गृहम् ॥ पुनःशुभाशुभंकर्मनशरीरंपुनःपुनः ॥५४॥ तद्रक्षितंतुधर्मार्थेधर्मोज्ञानार्थमेवहि ॥ ज्ञानेनसुलभोमोक्षस्तस्माद्धर्मंसमाचरेत् ॥ ५५ ॥ देहरूपस्यवृक्षस्यफलंधर्मःसनातनः ॥ धर्महीनस्तुयोदेहोनिष्फलोवंध्यवृक्षवत् ॥ ५६ ॥ नमाताचसहायार्थेनकलत्रसुतादयः ॥ नपितासोदरावित्तंधर्मस्तिष्ठतिकेवलम् ॥ ५७ ॥ जराव्याघ्रीवभयदाव्याध

यःशत्रवोयथा ॥ आयुर्यातिप्रतिदिनंभग्नभांडात्पयोयथा ॥ ५८ ॥ तरंगतरलालक्ष्मीर्यौवनंकुसुमोपमम् ॥ विषयाःस्वप्नविषयाइवसर्वेनि
रर्थकाः ॥ ५९ ॥ चलंवित्तंचलंचित्तंचलंसंसारजंसुखम् ॥ एवंज्ञात्वाविरक्तःसन्धर्माभ्यासपरोभवेत् ॥ ६० ॥ अर्धग्रस्तोऽहिनाभेको
मक्षिकामत्तुमिच्छति ॥ कालग्रस्तस्तथाजीवःपरपीडाधनाहृतः ॥ ६१ ॥ मृत्युग्रस्तायुषःपुंसःकिंसुखंहर्षयत्यहो ॥ आघातंनीयमानस्य
वध्यस्येवनिरर्थकम् ॥ ६२ ॥ धर्मार्थंचयदाचित्तंनवित्तंसुलभंतदा ॥ यदावित्तंनचतदाचित्तंधर्मोन्मुखंभवेत ॥ ६३ ॥ चित्तवित्तेयदा
स्यातांसत्पात्रंनतदालभेत् ॥ एतत्रितयसंबंधोयदाकालेतुसंभवेत ॥ ६४ ॥ अविचार्यतदाधर्मंयःकरोतिसबुद्धिमान् ॥ वित्तप्राचुर्यसंसाध्य
धर्माःसंतिसहस्रशः ॥ ६५ ॥ पुरुषोत्तमेस्वल्पवित्तसाध्योधर्मोमहान्भवेत् ॥ स्नानंदानंकथायांचविष्णोःस्मरणमेवच ॥ ६६ ॥ एतन्मा
त्रोपिसद्धर्मस्त्रायतेमहतोभयात् ॥ ६७ ॥ गंगैवतीर्थंस्मरएवधन्वीवित्तंतुविद्यैवगुणास्तुरूपम् ॥ मासेषुसर्वेषुतथैवसाक्षान्मासोत्तमोयंपुरुषो
त्तमोहि ॥ ६८ ॥ यद्यप्यसौनिंद्यतमःपुरासीत्सर्वेषुकृत्येषुमखादिकेषु ॥ तथापिसाक्षाद्भगवत्प्रसादात्तन्नामनाम्नाभुविविश्रुतोऽभूत् ॥ ६९ ॥
यथाहस्तिपदेलीनंसर्वप्राणिपदंभवेत् ॥ धर्माःकालास्तथासर्वेविलीनाःपुरुषोत्तमे ॥ ७० ॥ यथामरतरंगिण्यानसमाःसकलापगाः ॥ कल्प
वृक्षेणनसमायथासकलपादपाः ॥ ७१ ॥ चिंतारत्नेनरत्नानिनसमानियथाभुवि ॥ कामधेन्वायथाधेन्वोनराज्ञापुरुषाःसमाः ॥ ७२ ॥
नवेदैःसर्वशास्त्राणिपुण्यकालास्तथाखिलाः ॥ पुरुषोत्तममासेनसमोमासोनकर्हिचित् ॥ ७३ ॥ पुरुषोत्तममासस्यदैवतंपुरुषोत्तमः ॥
तस्मात्संपूजयेद्भक्त्याश्रद्धयापुरुषोत्तमम् ॥ ७४ ॥ शास्त्रज्ञंनिपुणंशुद्धंवैष्णवंसत्यवादिनम् ॥ विप्रांचार्यमथाहूयपूजांतेनप्रकल्पयेत् ॥७५॥

संसारसागरमतीवगभीरवेगमंतस्थमोहमदनादितिमिंगिलौघम् ॥ उल्लंघ्यगंतुमभिवांछतिभारतेस्मिन्संपूजयेत्सपुरुषोत्तममादिदेवम् ॥७६॥
इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानआह्निककथनंनामविंशतितमोऽध्यायः॥ २० ॥
॥ वाल्मीकिरुवाच ॥ ॥ अनलोत्तारणंकृत्वाप्रतिमायास्ततःपरम् ॥ प्राणप्रतिष्ठांकुर्वीतह्यन्यथाधातुरेवसा ॥ १ ॥ प्रतिमायाःकपोलौ
द्वौस्पृष्ट्वादक्षिणपाणिना ॥ प्राणप्रतिष्ठांकुर्वीततस्यांदेवस्यवैहरेः ॥ २ ॥ अकृतायांप्रतिष्ठायांप्राणानांप्रतिमासुच ॥ यथापूर्वंतथाभागःस्व
र्णादीनांनदेवता ॥ ३ ॥ अन्येषामपिदेवानांप्रतिमास्वपिपार्थिव ॥ प्राणप्रतिष्ठाकर्तव्यातस्यांदेवत्वसिद्धये ॥ ४ ॥ पुरुषोत्तमबीजेनतद्वि
ष्णोरित्यनेनच ॥ तथैवहृदयेंगुष्ठंदत्त्वाशश्वच्चमंत्रवित् ॥ ५ ॥ एभिर्मंत्रैःप्रतिष्ठांतुहृदयेपिसमाचरेत् ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरं
तुच ॥ ६ ॥ अस्यैदेवत्वसंख्यायैस्वाहेतियजुरीरयन् ॥ मूलमंत्रैरंगमंत्रैर्वैदिकैरित्यनेनच ॥ ७ ॥ प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेत् ॥
अथवानाममंत्रैश्चचतुर्थ्यंतैःप्रयत्नतः ॥ ८ ॥ स्वाहांतैश्चप्रकुर्वीततत्तद्देवाननुस्मरन् ॥ एवंप्राणान्प्रतिष्ठाप्यध्यायेच्छ्रीपुरुषोत्तमम् ॥ ९ ॥
श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविम् ॥ त्रिभंगललितंध्यायेत्सराधंपुरुषोत्तमम् ॥ १० ॥ देशकालौसमुल्लिख्यनियतोवाग्यतःशुचिः ॥
षोडशैरुपचारैश्चपूजयेत्पुरुषोत्तमम् ॥११॥ आगच्छदेवदेवेशश्रीकृष्णपुरुषोत्तम ॥ राधयासहितश्चात्रगृहाणपूजनंमम ॥ १२ ॥ श्रीराधि
कासहितपुरुषोत्तमायनमःआवाहनंसमर्पयामि ॥ इत्यावाहनम् ॥ नानारत्नसमायुक्तंकार्तस्वरविभूषितम् ॥ आसनंदेवदेवेशगृहाणपुरुषो
त्तम ॥१३॥ श्रीराधिका०आसनं० ॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतम् ॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यताम् ॥ १४ ॥ इतिपा

ग्रम् ॥ नंदगोपगृहेजातोगोपिकानंदहेतवे ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे ॥ १५ ॥ इत्यर्घ्यम् ॥ गंगाजलंसमानीतंसुवर्णकलशस्थितम् ॥ आचम्यतांहृषीकेशपुराणपुरुषोत्तम ॥ १६ ॥ इत्याचमनम् ॥ कार्यंमेसिद्धिमायातुपूजितेत्वयिधातरि ॥ पंचामृतैर्मयानीतैराधिकासहितोहरे ॥ १७ ॥ इतिस्नानम् ॥ पयोदधिघृतंगव्यंमाक्षिकंशर्करातथा ॥ गृहाणेमानिद्रव्याणिराधिकानंददायक ॥ १८ ॥ इतिपंचामृतस्नानम् ॥ योगेश्वरायदेवायगोवर्धनधरायच ॥ यज्ञानांपतयेनाथगोविंदायनमोनमः ॥१९॥ गंगाजलसमंशीतंनदीतीर्थसमुद्भवम् ॥ स्नानंदत्तंमयाकृष्णगृह्यतांनंदनंदन ॥ २० ॥ इतिपुनःस्नानम् ॥ पीतांबरयुगंदेवसर्वकामार्थसिद्धये ॥ मयानिवेदितंभक्त्यागृहाणसुरसत्तम ॥२१॥ इतिवस्त्रम् ॥ आचमनम् ॥ दामोदरनमस्तेस्तुत्राहिमांभवसागरात् ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम ॥२२॥ उपवीतम् ॥ आचमनम् ॥ श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरम् ॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम् ॥२३॥ चंदनम्॥अक्षतास्तुसुरश्रेष्ठकुंकुमाक्ताःसुशोभिताः ॥ मयानिवेदिताभक्त्यागृहाणपुरुषोत्तम ॥ २४ ॥ इत्यक्षतान् ॥ ॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम् ॥ २५ ॥ ॥ इतिपुष्पाणि ॥ ॥ ततोंगपूजा ॥ ॥ नंदात्मजोयशोदायास्तनयःकेशिसूदनः ॥ भूभारोद्धारकश्चैवह्यनंतोविष्णुरूपधृक् ॥ २६ ॥ प्रद्युम्नश्चानिरुद्धश्चश्रीकंठःसकलास्त्रधृक् ॥ वाचस्पतिःकेशवश्चसर्वात्मेतिचनामतः ॥ २७ ॥ पादौगुल्फौतथाजानूजघनेचकटिंनतथा ॥ मेढ्रंनाभिंचहृदयंकंठंबाहूमुखंतथा ॥ २८ ॥ नेत्रेशिरश्चसर्वांगंविश्वरूपिणमर्चयेत् ॥ पुष्पाण्यादायक्रमशश्चतुर्थ्यंतैर्जगत्पतिम् ॥२९॥ प्रत्यंगपूजांकृत्वातुपुनश्चकेशवादिभिः ॥ चतुर्विंशतिमंत्रैश्चचतुर्थ्यंतैश्चनामभिः ॥३०॥ पुष्पमादायप्र

त्यकंपूजयेत्पुरुषोत्तमम् ॥ ३१ ॥ वनस्पतिरसोदिव्योगंधाढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोऽयंप्रतिगृह्यताम् ॥ ३२ ॥ इतिधू
पम् ॥ त्वंज्योतिःसर्वदेवानांतेजसांतेजउत्तमम् ॥ आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यताम् ॥ ३३ ॥ इतिदीपम् ॥ नैवेद्यंगृह्यतांदेवभक्तिंमे
ह्यचलांकुरु ॥ ईप्सितंमेवरंदेहिपरत्रचपरांगतिम् ॥ ३४ ॥ इतिनैवेद्यम् ॥ मध्येपानीयम् ॥ उत्तरापोशनम् ॥ गंगाजलंसमानीतंसुवर्णकल
शस्थितम् ॥ आचम्यतांहृषीकेशत्रैलोक्यव्याधिनाशन ॥ ३५ ॥ इत्याचमनम् ॥ इदंफलंमयादेवस्थापितंपुरतस्तव ॥ तेनमेसुफलावाप्ति
र्भवेज्जन्मनिजन्मनि ॥ ३६ ॥ इतिश्रीफलम् ॥ गंधकर्पूरसंयुक्तंकस्तूर्यादिसुवासितम् ॥ करोद्वर्तनकंदेवगृहाणपरमेश्वर ॥ ३७ ॥ इतिकरो
द्वर्तनम् ॥ पूगीफलसमायुक्तंसकर्पूरंमनोहरम् ॥ भक्त्यादत्तंमयादेवतांबूलंप्रतिगृह्यताम् ॥ ३८ ॥ तांबूलम् ॥ हिरण्यगर्भगर्भस्थंहेमबीजं
विभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ ३९ ॥ इतिदक्षिणाम् ॥ शारदेंदीवरश्यामंत्रिभंगललिताकृतिम् ॥ नीराजयामिदेवे
शंराधयासहितंहरिम् ॥ ४० ॥ इतिनीराजनम् ॥ रक्षरक्षजगन्नाथरक्षत्रैलोक्यनायक ॥ भक्तानुग्रहकर्तात्वंप्रदक्षिणांगृहाणमे ॥ ४१ ॥ इतिप्रद
क्षिणाम् ॥ यज्ञेश्वरायदेवायतथायज्ञोद्भवायच ॥ यज्ञानांपतयेनाथगोविंदायनमोनमः ॥ ४२ ॥ इतिमंत्रपुष्पम् ॥ विश्वेश्वरायविश्वायतथा
विश्वोद्भवायच ॥ विश्वस्यपतयेतुभ्यंगोविंदायनमोनमः ॥ ४३ ॥ इतिनमस्कारम् ॥ मंत्रहीनेतिमंत्रेणक्षमाप्यपुरुषोत्तमम् ॥ स्वाहांतैर्ना
ममंत्रैश्चतिलहोमोदिनेदिने ॥ ४४ ॥ दीपःकार्यस्त्वखंडश्चयावन्मासंचसर्पिषा ॥ पुरुषोत्तमस्यप्रीत्यर्थंसर्वार्थफलसिद्धये ॥ ४५ ॥ यस्यस्मृ
त्येतिमंत्रेणनमस्कृत्यजनार्दनम् ॥ यदूनंतत्तुसंपूर्णंविधायविचरेत्सुखम् ॥ ४६ ॥ इत्थंश्रीपुरुषोत्तमंनवघनश्यामंसराधंमुदासंप्राप्तेपुरुषो

त्तमेऽवनितलेलब्ध्वाजनुर्मानवम् ॥ भक्त्यायःपरिपूजयेत्प्रतिदिनंकृत्वागुरुंवैष्णवंभुक्त्वाद्यत्रसुखंसमस्तमतुलंपश्चात्सगच्छेत्परम् ॥ ४७ ॥
इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेपुरुषोत्तमपूजनविधिर्नामैकविंशोऽध्यायः॥२१॥
राजोवाच ॥ ॥ पुरुषोत्तमस्यनियमान्व्रतिनोवदविस्तरात् ॥ किंभोज्यंकिमभोज्यंवावर्ज्यावर्ज्यंतपोधन ॥ १ ॥ श्रीनारायणउवाच ॥
एवंसभगवान्पृष्टोभूभृतावाल्मिकोमुनिः ॥ पुंसांनिःश्रेयसार्थायतमाहबहुमानयन् ॥ २ ॥ वाल्मीकिरुवाच ॥ ॥ पुरुषोत्तममासेयेनियमाः
परिकीर्तिताः ॥ तान्शृणुष्वमयाराजन्कथ्यमानान्समासतः ॥ ३ ॥ हविष्यान्नंचभुंजीतप्रयतःपुरुषोत्तमे ॥ गोधूमाःशालयःसर्वाः
सिताभुद्गायवास्तिलाः ॥ ४ ॥ कलायकंगुनीवारावास्तुकंहिलमोचिका ॥ आर्द्रकंकालशाकंचमूलंकंदंचकर्कटी ॥ ५ ॥ रंभासैंधवसामु
द्रेलवणेदधिसर्पिषी ॥ पयोनुद्धृतसारंचपनसाम्रेहरीतकी ॥ ६ ॥ पिप्पलीजीरकंचैवनागरंचैवतिंतिडी ॥ क्रमुकंलवलीधात्रीफलान्यगुडमै
क्षवम् ॥ ७ ॥ अतैलपक्वंमुनयोहविष्यंप्रवदन्तिच ॥ हविष्यभोजनंनृणामुपवाससमंविदुः ॥८॥ सर्वामिषाणिमांसंचक्षौद्रंसौवीरकंतथा ॥
राजमाषादिकंचैवराजिकामादकंतथा ॥ ९ ॥ द्विदलंतिलतैलंचतथान्नंशल्यदूषितम् ॥ भावदुष्टंक्रियादुष्टंशब्ददुष्टंचवर्जयेत् ॥ १० ॥
परान्नंचपरद्रोहंपरदारागमंतथा ॥ तीर्थंविनाप्रयाणंचपरदेशेपरित्यजेत् ॥ ११ ॥ देववेदद्विजानांचगुरुगोव्रतिनांतथा ॥ स्त्रीराजमहतांनिंदां
वर्जयेत्पुरुषोत्तमे ॥ १२ ॥ प्राण्यंगमामिषंचूर्णंफलेजंबीरमामिषम् ॥ धान्येमसूरिकाप्रोक्ताअन्नंपर्युषितंतथा ॥१३॥ अजागोमहिषीदुग्धा
दन्यद्दुग्धादिचामिषम् ॥ द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ॥१४॥ ताम्रपात्रस्थितंगव्यंजलंचर्मणिसंस्थितम् ॥ आत्मार्थंपाचितंचान्नमा

मिषंतद्बुधैःस्मृतम् ॥ १५ ॥ ब्रह्मचर्यमधःशय्यांपत्रावल्यांचभोजनम् ॥ चतुर्थेकालेभुक्तिंचप्रकुर्यात्पुरुषोत्तमे ॥ १६ ॥ रजस्वलांत्यजेन्म्ले
च्छपतितैर्व्रात्यकैःसह ॥ द्विजद्विट्वेदबाह्यैश्चनवदेत्पुरुषोत्तमे ॥ १७ ॥ एभिर्दृष्टंचकाकैश्चसूतकान्नंचयद्भवेत् ॥ द्विःपाचितंचदग्धान्नंनैवा
द्यात्पुरुषोत्तमे ॥ १८ ॥ पलांडुंलशुनंमुस्तांछत्राकंगृंजनंतथा ॥ नालिकंमूलकंशिग्रुंवर्जयेत्पुरुषोत्तमे ॥ १९ ॥ एतानिवर्जयेन्नित्यंव्रती
सर्वव्रतेष्वपि ॥ कृच्छ्राद्यंचापिकुर्वीतस्वशक्त्याविष्णुतुष्टये ॥ २० ॥ कूष्मांडंबृहतीचैवतरुणीमूलकंतथा ॥ श्रीफलंचकलिंगंचफलंधात्री
फलंतथा ॥२१॥ नारिकेलमलाबुंचपटोलंबदरीफलम् ॥ चर्मवृंताजिकंवल्लीशाकंतुजलजंतथा ॥२२॥ शाकान्येतानिवर्ज्यानिक्रमात्प्रति
पदादिषु ॥ धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदागृही ॥२३॥ यद्यद्योवर्जयेत्किंचित्पुरुषोत्तमतुष्टये ॥ तत्पुनर्ब्राह्मणेदत्त्वाभक्षयेत्सर्वदैवहि ॥२४॥
कुर्यादेतांश्चनियमान्व्रतीकार्तिकमाघयोः ॥ ःनियमेनविनाराजन्फलंनैवाप्नुयाद्व्रती ॥ २५ ॥ उपोषणेनकर्तव्यःशक्तिश्चेत्पुरुषोत्तमः ॥
अथवाघृतपानंचपयःपानमयाचितम् ॥ २६ ॥ फलाहारादिवाकार्यंयथाशक्त्याव्रतार्थिना ॥ व्रतभंगोयथानस्यात्तथाकार्यंविचक्षणैः
॥ २७ ॥ पुण्येह्निप्रातरुत्थायकृत्वापौर्वाह्णिकीःक्रियाः ॥ गृह्णीयान्नियमंभक्त्याश्रीकृष्णंचहृदिस्मरन् ॥ २८ ॥ उपवासस्यनक्तस्य
चैकभुक्तस्यभूपते ॥ एकंचनिश्चयंकृत्वाव्रतमेतत्समाचरेत् ॥२९॥ श्रीमद्भागवतंभक्त्याश्रोतव्यंपुरुषोत्तमे ॥ तत्पुण्यंवचसावक्तुंविधातापिन
शक्नुयात् ॥ ३० ॥ शालिग्रामार्चनंकार्यंमासेश्रीपुरुषोत्तमे ॥ तुलसीदललक्षेणतस्यपुण्यमनंतकम् ॥ ३१ ॥ यथोक्तव्रतिनंदृष्ट्वामासे
श्रीपुरुषोत्तमे ॥ यमदूताःपलायंतेसिंहंदृष्ट्वायथागजाः ॥ ३२ ॥ एतन्मासव्रतंराजन्श्रेष्ठंक्रतुशतादपि ॥ क्रतुंकृत्वाप्नुयात्स्वर्गंगोलोकंपुरुषो

त्तमे ॥ ३३ ॥ पृथिव्यांयानितीर्थानिक्षेत्राणिसर्वदेवताः॰॥ तद्देहेतानितिष्ठंतियःकुर्यात्पुरुषोत्तमम् ॥ ३४ ॥ दुःस्वप्नंचैवदारिद्र्यंदुष्कृतंत्रि
विधंचयत् ॥ तत्सर्वंविलयंयातिकृतेश्रीपुरुषोत्तमे ॥३५॥ पुरुषोत्तमसेवायांनिश्चलंहरिसेवकम् ॥ विघ्नाद्रक्ष्यंतिशक्राद्याःपुरुषोत्तमतुष्टये
॥ ३६ ॥ पुरुषोत्तमस्यव्रतिनोयत्रयत्रवसंतिच ॥ भूतप्रेतपिशाचाद्यानतिष्ठन्तितदग्रतः ॥ ३७ ॥ एवंयोविधिनाराजन्कुर्याच्छ्रीपुरुषोत्त
मम् ॥ सहस्रवदनोनालंतत्फलंवक्तुमंजसा ॥ ३८ ॥ ॥ श्रीनारायणउवाच ॥ ॥ पुरुषोत्तमंप्रियममुंपरमादरेणकुर्यादनन्यमनसापुरु
षोत्तमोयः ॥ पुरुषोत्तमप्रियतमःपुरुषःसभूत्वापुरुषोत्तमेनरमतेरसिकेश्वरेण ॥३९॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीना
रायणनारदसंवादेदृढधन्वोपाख्यानेपुरुषोत्तमव्रतनियमकथनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ राजोवाच ॥ ॥ किंफलंदीपदानस्य
मासेश्रीपुरुषोत्तमे ॥ तन्मेवदमुनिश्रेष्ठकृपयादीनवत्सल ॥ १ ॥ श्रीनारायणउवाच ॥ ॥ इत्थंविज्ञापितःप्राहवाल्मीकिर्मुनिसत्तमः ॥
प्रवृद्धहर्षोराजानंविनीतंप्रहसन्निव ॥ २ ॥ ॥ वाल्मीकिरुवाच ॥ शृणुष्वराजशार्दूलकथांपापप्रणाशिनीम् ॥ यांश्रुत्वायातिविलयंपापं
पंचविधंमहत् ॥ ३ ॥ सौभाग्यनगरेराजाचित्रबाहुरितिश्रुतः ॥ सत्यसंधोमहाप्राज्ञश्चासीच्छूरतरःपरः ॥ ४ ॥ सहिष्णुःसर्वधर्मज्ञःशील
रूपदयान्वितः ॥ ब्रह्मण्योभगवद्भक्तःकथाश्रवणतत्परः ॥ ५ ॥ स्वदारनिरतःशश्वत्पशुपुत्रसमन्वितः ॥ चतुरंगबलोपेतःसमृद्ध्याधनदो
पमः ॥ ६ ॥ तस्यभार्याचंद्रकलाचतुःषष्टिकलान्विता ॥ पतिव्रतामहाभागाभगवद्भक्तिसंयुता ॥ ७ ॥ तयासहमहीपालोबुभुजेमेदिनीं
युवा ॥ विनाश्रीकृष्णदेवंसनैवजानातिदैवतम् ॥८॥ एकस्मिन्दिवसेराजाचित्रबाहुर्महीपतिः ॥ दृष्ट्वासमागतंदूरादगस्त्यंमुनिपुंगवम् ॥९॥

प्रणम्यदंडवद्भूमौविधिनातमपूजयत् ॥ कल्पयित्वासनंभक्त्यातस्थौमुनिवराग्रतः ॥ १० ॥ विनयावनतोभूत्वाजगादमुनिसत्त
मम् ॥ ॥ राजोवाच ॥ ॥ अद्यमेसफलंजन्मअद्यमेसफलंदिनम् ॥ ११ ॥ अद्यमेसफलंराज्यमद्यमेसफलंगृहम् ॥ यस्त्वंसमागतोमेद्यगृहे
श्रीकृष्णसेवकः ॥ १२ ॥ मुक्तोहंपापसंघाताद्यत्त्वयाहंनिरीक्षितः ॥ तुभ्यंसमर्पितंराज्यंगजाश्वरथसंयुतम् ॥ १३ ॥ वैष्णवोसिमुनिश्रेष्ठ
नास्त्यदेयंमयातव ॥ मेरुतुल्यंभवेत्स्वल्पंवैष्णवायसमर्पितम् ॥ १४ ॥ कपर्दिकाप्रमाणंतुव्यंजनंवान्नमुत्तमम् ॥ नयच्छतिदिनेय
स्तुवैष्णवायद्विजन्मने ॥ १५ ॥ तद्दिनंविफलंतस्यकथितंवेदपारगैः ॥ विष्णुभक्ताश्चयेकेचित्सर्वेपूज्याद्विजातयः ॥ १६ ॥
तेषांसंभावनाकार्यावाङ्मनःकायकर्मभिः ॥ कथितंममगर्गेणगौतमेनसुमंतुना ॥ १७ ॥ तावत्प्रभाचताराणांयावन्नोदयतेरविः ॥ तावद
न्येद्विजन्मानोयावन्नायातिवैष्णवः ॥ १८ ॥ ॥ अगस्त्यउवाच ॥ ॥ चित्रबाहोमहाभागधन्यस्त्वंसांप्रतंनृप ॥ इमाधन्याःप्रजाःस
र्वायस्त्वंरक्षसिवैष्णवः ॥ १९ ॥ तस्मिन्राष्ट्रेनवस्तव्यंयस्यराजानवैष्णवः ॥ वरोवासोवनेशून्येनतुराष्ट्रेह्यवैष्णवे ॥ २० ॥ चक्षुर्हीनोयथा
देहःपतिहीनायथास्त्रिया ॥ निरक्षरोयथाविप्रस्तथाराष्ट्रमवैष्णवम् ॥ २१ ॥ दर्भहीनायथासंध्यातिलहीनंचतर्पणम् ॥ वृत्त्यर्थंदेवसेवाचत
थाराष्ट्रमवैष्णवम् ॥ २२ ॥ सकेशाविधवायद्वद्व्रतंस्नानविवर्जितम् ॥ शूद्रश्चब्राह्मणीगामीतथाराष्ट्रमवैष्णवम् ॥ २३ ॥ सराजाप्रोच्यतेसद्भि
र्यःश्रीकृष्णपदाश्रयः ॥ तद्राष्ट्रंवर्धतेनित्यंसुखीभवतितत्प्रजा ॥ २४ ॥ दृष्टिर्मेसफलाराजन्यन्मयात्वंनिरीक्षितः ॥ अद्यमेसफलावाणी
ह्युच्यतेयत्त्वयासह ॥ २५ ॥ इदंराज्यंत्वयाराजन्प्रकर्तव्यंममाज्ञया ॥ प्रतिष्ठितोमयाराज्येगमिष्याम्यस्तुस्वस्तिते ॥२६॥ ॥ श्रीना

रायणउवाच ॥ ॥ इत्युक्त्वागंतुकामंतमगस्त्यंमुनिपुंगवम् ॥ ननामपरयाभक्त्यामहिषीसापतिव्रता ॥ २७ ॥ ॥ अगस्त्यउवाच ॥ ॥ अवैधव्यंसदातेस्तुभक्त्याभजपतिंशुभे ॥ दृढातेस्तुसदाभक्तिःश्रीगोपीजनवल्लभे ॥ २८ ॥ इत्थमाशीर्ददानंतंभूयःप्राहमहीपतिः ॥ बद्धांजलिपुटोभूत्वाविनयानतकंधरः ॥ २९ ॥ चित्रबाहुरुवाच ॥ ॥ विपुलामेकथंलक्ष्मीःकथंराज्यमकंटकम् ॥ पतिव्रताकथंपत्नीकिंकृतंसुकृतंमया ॥ ३० ॥ एतन्मेब्रूहिविप्रेंद्रत्वाहंशरणंगतः ॥ करस्थामलवत्सर्वंजानासित्वंमुनीश्वर ॥ ३१ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्थमावेदितोराज्ञाह्यगस्त्योमुनिपुंगवः ॥ समाहितमनाभूत्वाजगादनृपसत्तमम् ॥ ३२ ॥ ॥ अगस्त्यउवाच ॥ ॥ मयाविलोकितंसर्वंप्राक्तनंचरितंतव ॥ तत्सर्वंकथयाम्यद्यसेतिहासंपुरातनम् ॥ ३३ ॥ चमत्कारपुरेरम्येमणिग्रीवाभिधानभृत् ॥ त्वमभूःशूद्रजातीयोजीवहिंसापरायणः ॥ ३४ ॥ नास्तिकोदुष्टचारित्रःपरदारप्रधर्षकः ॥ कृतघ्नोदुर्विनीतश्चशिष्टाचारविवर्जितः ॥ ३५ ॥ याचेयंभवतोभार्यापूर्वजन्मनिसुंदरी ॥ कर्मणामनसावाचापतिसेवापरायणा ॥ ३६ ॥ पवित्रानाममहाभागाधर्मनिष्ठामनस्विनी ॥ भावंनकुरुतेदुष्टंतवोपरिकदाचन ॥ ३७ ॥ ज्ञातिभिस्त्वंपरित्यक्तोबंधुभिःपापकर्मकृत् ॥ राज्ञाक्रुद्धेनतेसर्वंगृहीतंधनमुत्तमम् ॥ ३८ ॥ ततोऽवशिष्टंयत्किंचिद्गृहीतंज्ञातिभिस्तदा ॥ गतेद्रव्येयनाकांक्षातवासीद्विपुलातदा ॥ ३९ ॥ क्षीयमाणेधनेसाध्वीनत्वामत्यजदुन्मनाः ॥ एवंतिरस्कृतःसर्वैर्गतवान्निर्जनंवनम् ॥ ४० ॥ हत्वाजीवाननेकांश्चत्वंचकर्थात्मपोषणम् ॥ एवंवर्तयतस्तस्यपत्न्यासहमहीपते ॥ ४१ ॥ एकदाधनुरुद्यम्यमणिग्रीवोवनंगतः ॥ बहुव्यालमृगाकीर्णंमृगमांसजिघृक्षया ॥ ४२ ॥ तस्मिन्निर्मानुषेऽरण्येमध्येमार्गंमहामुनिः ॥

उग्रदेवइतिख्यातोदिङ्मूढोविह्वलोऽभवत् ॥ ४३ ॥ तृषासंपीडितोत्यर्थंमध्यंदिनगतेरवौ ॥ तत्रैवपतितोराजन्मुमूर्षुरभवत्तदा ॥ ४४ ॥ तंदृष्ट्वातेदयाजातादिग्भ्रष्टंदुःखितंद्विजम् ॥ उत्थाप्यतंद्विजन्मानंगृहीत्वास्वाश्रमंगतः ॥ ४५ ॥ दंपतिभ्यांकृतासेवादुःखितस्य द्विजन्मनः ॥ उग्रोदेवोमहायोगीमुहूर्तानंतरंतदा ॥ ४६ ॥ अवाप्यचेतनांतत्रविस्मयंसमजीगमत् ॥ तत्रस्थोहंकुतश्चात्रकेनानीतोवनां तरम् ॥ ४७ ॥ ॥ श्रीनारायणउवाच ॥ ॥ मणिग्रीवोवदद्विप्रंरमणीयमिदंसरः ॥ अत्रास्तेशीतलंवारिपद्मिनीपुष्पवा सितम् ॥ ४८ ॥ तत्रस्नात्वाजलेशीतेकुरुत्वापौर्वाह्णिकीःक्रियाः ॥ कुरुभक्ष्यन्फलाहारंपिबवारिसुशीतलम् ॥ ४९ ॥ सुखेनकुरुवि श्रामंमयासंरक्षितोऽधुना ॥ उत्तिष्ठत्वंमुनिश्रेष्ठमत्प्रसादंकर्तुमर्हसि ॥ ५० ॥ ॥ अगस्त्यउवाच ॥ ॥ लब्धसंज्ञस्तदाविप्रउग्रदेवोगत श्रमः ॥ मणिग्रीववचःश्रुत्वासमुत्तस्थौतृषातुरः ॥ ५१ ॥ मणिग्रीवभुजालंबीजगामसरसीतटम् ॥ उपविष्टश्चिरंबाहोतत्तटेवटशोभिते ॥ ५२ ॥ विश्रम्यतत्क्षणंविप्रोवटच्छायामधिश्रितः ॥ स्नात्वानित्यविधिंकृत्वावासुदेवमपूजयत् ॥ ५३ ॥ देवान्पितॄंश्चसंतर्प्यपपौनीरंसु शीतलम् ॥ उग्रदेवस्ततःशीघ्रंवटमूलमुपाश्रितः ॥ ५४ ॥ मणिग्रीवःसपत्नीकोननामसुनिसत्तमम् ॥ विनयेनावदद्वाचमातिथ्यंकर्तुमुन्मु नाः ॥ ५५ ॥ ॥ मणिग्रीवउवाच ॥ ॥ अस्मत्संतारणायाद्यमदाश्रममुपागतः ॥ ब्रह्मंस्त्वद्दर्शनादेवपापंमेविलयंगतम् ॥ ५६ ॥ इत्यु क्त्वातंप्रियामाहमणिग्रीवोमुदान्वितः ॥ अयिसुंदरिपक्वानिस्वादूनियानियानिच ॥ ५७ ॥ तानिचूतफलानित्वंशीघ्रमानयमाचिरम् ॥ अन्यत्कंदादियत्किंचित्तदानयशुभानने ॥५८॥ निजनाथवचःश्रुत्वाफलान्यादायसुंदरी ॥ कंदादिकंचविप्राग्रेस्थापयामासहर्षतः ॥५९॥

मणिग्रीवःपुनर्वाक्यमुवाचमुनिसत्तमम् ॥ फलान्यंगीकुरुब्रह्मन्कृतार्थौकुरुदंपती ॥ ६० ॥ ॥ उग्रदेवउवाच ॥ ॥ त्वामहंनैवजाना मिकस्त्वंभोःकथस्वमे ॥ आज्ञातस्यनभोक्तव्यंब्राह्मणेनविजानता ॥ ६१ ॥ ॥ मणिग्रीवउवाच ॥ ॥ शूद्रोहंद्विजशार्दूलमणिग्रीवाभि धानतः ॥ स्वजनैर्ज्ञातिवर्गैश्चपरित्यक्तःस्वबांधवैः ॥ ६२ ॥ इत्थंशूद्रवचःश्रुत्वाफलाहारमचीकरत् ॥ उग्रदेवःप्रसन्नात्माततोनीरमपीपिब त् ॥ ६३ ॥ ततोविप्रंसुखासीनंमणिग्रीवोऽवदद्वचः ॥ लालयंस्तत्पदांभोजयुगंस्वांकगतंमुहुः ॥ ६४ ॥ मणिग्रीवउवाच ॥ ॥ क्वगंतव्यं मुनिश्रेष्ठकुतस्त्वंचेहकानने ॥ निर्जनेनिर्जलेदुष्टेहिंस्रजंतुसमाकुले ॥ ६५ ॥ ॥ उग्रदेवउवाच ॥ ॥ ब्राह्मणोऽहंमहाभागप्रयागंगंतुमुत्स हे ॥ अधुनाऽज्ञातमार्गेणसंप्राप्तोदारुणेवने ॥ ६६ ॥ तत्रश्रांतस्तृषाक्रांतोमुमूर्षुरभवंक्षणात् ॥ जीवितंमेत्वयादत्तंब्रूहिकिंतेददाम्यम् ॥ ६७ ॥ अरण्यंकेनदुःखेनदंपतिभ्यांसमाश्रितम् ॥ तद्दुःखमपनेष्यामिमणिग्रीववदस्वमे ॥ ६८ ॥ ॥ अगस्त्यउवाच ॥ ॥ इत्युग्रदेववचनंल लितंनिशम्यपत्न्याःसमक्षमनुनीयमुनीश्वरंतम् ॥ दारिद्र्यसागरतितीर्षुरसौस्वकीयंवृत्तांतमाहनिजकर्मविपाकमुग्रम् ॥ ६९ ॥ ॥ इति श्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ मणिग्री वउवाच ॥ ॥ चमत्कारपुरेरम्येविद्वज्जनसमाकुले ॥ ममवासोऽभवत्तत्रधर्मपत्न्यासहद्विज ॥ १ ॥ धनाढ्यस्यपवित्रस्यपरोपकृ तिशालिनः ॥ कदाचिद्दैवयोगेनदुर्बुद्धिःसमपद्यत ॥ २ ॥ निजधर्मपरित्यागःकृतोमेदुष्टबुद्धिना ॥ परस्त्रीसेवनंनित्यमपेयंपीयतेमह ॥ ३ ॥ चौर्यंहिंसापरश्चाहंपरित्यक्तःस्वबंधुभिः ॥ बृहद्बलेनभूपेनमद्गृहंलुंठितंतदा ॥ ४ ॥ अविशिष्टंचयत्किंचिद्गृहीतंबंधुभिर्धनम् ॥ एवंतिरस्कृतः

सर्वैर्वनवासमचीकरम् ॥ ५ ॥कृत्वाजीववधंनित्यंजीवेयंभार्ययासह ॥ एतस्मिन्विपिनेघोरेवसतोमेदुरात्मनः ॥ ६ ॥ कुरुष्वानुग्रहंब्रह्म
न्पापयुक्तस्यसांप्रतम् ॥ प्राचीनपुण्यपुंजेनसंप्राप्तोगहनेभवान् ॥ ७ ॥ तवाहंशरणंयातःसपत्नीकोमहामुने ॥ उपदेशप्रसादेनकृतार्थींकर्तु
मर्हसि ॥ ८ ॥ येनमेतीव्रदारिद्र्यंविलयंयातितत्क्षणात् ॥ अतुलंवैभवंलब्ध्वाविचरामियथासुखम् ॥ ९ ॥ ॥ उग्रदेवउवाच ॥ ॥ कृता
र्थोसिमहाभागयदातिथ्यंकृतंमम ॥ अतस्तेभाविकल्याणंसपत्नीकस्यसांप्रतम् ॥ १० ॥ विनाव्रतैर्विनातीर्थैर्विनादानैरयत्नतः ॥ दारिद्र्यं
तेलयंयातितथानिर्धारितंमया ॥ ११ ॥ अतःपरंतृतीयोस्तिमासःश्रीपुरुषोत्तमः ॥ भवद्भ्यांतत्रविधिनादंपतिभ्यांप्रयत्नतः ॥ १२ ॥ कर्त
व्यंदीपदानंचपुरुषोत्तमतुष्टये ॥ तेनतेतीव्रदारिद्र्यंसमूलंनाशमेष्यति ॥ १३ ॥ तिलतैलेनकर्तव्यःसार्पिषावैभवेसति ॥ तयोर्मध्येनकिं
चित्तेकाननेवसतोऽधुना ॥ १४ ॥ इंगुदीजेनतैलेनदीपःकार्यस्त्वयानघ ॥ यावन्मासंसनियमंमणिग्रीवःस्त्रियासह ॥१५॥ अस्मिन्सरोवरे
स्नात्वासहपत्न्यानिरंतरम्॥एवमेवहिकर्तव्यंमासमात्रंत्वयावने॥१६॥ अयमेवोपदेशस्तुसपत्नीकायमेकृतः ॥ त्वदातिथ्यप्रसन्नेनमयानिग
मनिश्चितम् ॥१७॥ अन्यथादीपदानंहिरमावृद्धिकरंनृणाम् ॥ विधिनाक्रियमाणंचेत्किंपुनःपुरुषोत्तमे ॥ १८ ॥ वेदोक्तानिचकर्माणिदाना
निविविधानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥ १९ ॥ तीर्थानिसकलान्येवशास्त्राणिसकलानिच ॥ पुरुषोत्तमदीपस्यकलां
नार्हंतिषोडशीम् ॥२० ॥ योगोज्ञानंतथासांख्यंतंत्राणिसकलान्यपि ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥ २१ ॥ कृच्छ्र
चांद्रायणादीनिव्रतानिनिखिलानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥ २२ ॥ वेदाभ्यासोगयाश्राद्धंगोमतीतटसेवनम् ॥

पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥ २३ ॥ उपरागसहस्राणिव्यतीपातशतानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥ ॥ २४ ॥ कुर्वादिक्षेत्रवर्याणिदंडकादिवनानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥ २५ ॥ एतद्व्रतमंवत्सनाख्येयंयस्य कस्यचित् ॥ धनधान्यपशुव्रातपुत्रपौत्रयशस्करम् ॥ २६ ॥ वंध्यावंध्यत्वशमनमवैधव्यकरंस्त्रियाः ॥ राज्यदंराज्यभ्रष्टस्यचिं तितार्थकरंनृणाम् ॥ २७ ॥ कन्याविंदेतभर्तारंगुणिनंचिरजीविनम् ॥ कांतार्थीलभतेकांतांसुशीलांचपतिव्रताम् ॥ २८ ॥ विद्यार्थीलभते विद्यांसुसिद्धिंसिद्धिकामुकः ॥ कोशकामोलभेत्कोशंमोक्षार्थीमोक्षमाप्नुयात् ॥२९॥ विनाविधिंविनाशास्त्रंयःकुर्यात्पुरुषोत्तमे ॥ दीपंतुयत्र कुत्रापिकामितंसर्वमाप्नुयात ॥ ३० ॥ किंपुनर्विधिनावत्सदीपंकुर्यात्प्रयत्नतः ॥ तस्माद्दीपःप्रकर्तव्योमासेश्रीपुरुषोत्तमे ॥ ३१ ॥ एतदुक्तं मयातेद्यतीव्रदारिद्र्यनाशनम् ॥ स्वस्तितेऽस्तुगमिष्यामिसंतुष्टःसेवयातव ॥ ३२ ॥ ॥ अगस्त्यउवाच ॥ ॥ इत्युक्त्वाविप्रवर्योसौप्रया गःसंजगामह ॥ द्विभुजंमुरलीहस्तंमनसाश्रीहरिंस्मरन् ॥ ३३ ॥ अनुगत्वोग्रदेवंतंकियन्मार्गंनिजाश्रमात् ॥ पुनराजग्मतुर्नत्वादंपतीहृष्ट मानसौ ॥ ३४ ॥ आसाद्यस्वाश्रमंभक्त्यापुरुषोत्तममानसौ ॥ निन्यतुर्मासयुगलंद्विजभक्तिपरायणौ ॥ ३५ ॥ गतेमासद्वयेश्रीमाना गतःपुरुषोत्तमः ॥ तौतस्मिंश्चक्रतुर्दीपंगुरुभक्तिपरायणौ ॥ ३६ ॥ इंगुदीजेनतैलेनवैभवार्थमतंद्रितौ ॥ एवंतयोःकृतवतोर्जगामपुरुषो त्तमः ॥ ३७ ॥ उग्रदेवप्रसादेनविनिर्धूतमनोमलौ ॥ कालस्यवशमापन्नौपुरंदरपुरींगतौ ॥ ३८ ॥ तत्रत्यंभोगमासाद्यपृथिव्यांभारताजिरे ॥ उग्रदेवप्रसादेनवरंजनुरवापतुः ॥ ३९ ॥ वीरबाहुसुतस्त्वंचचित्रबाहुरितिश्रुतः ॥ पूर्वस्मिन्योमणिग्रीवोमृगहिंसापरायणः ॥ ४० ॥ इयं

चंद्रकलानाम्नीमहिषीयाधुनातव ॥ सुंदरीतिसमाख्यातापुनर्जनुषितेंऽगना ॥ ४१ ॥ पातिव्रत्येनधर्मेणतवार्धांगार्धहारिणी ॥ पतिव्रताहियानारीपतिपुण्यार्धभागिनी ॥ ४२ ॥ कृतेनदीपदानेनमासेश्रीपुरुषोत्तमे ॥ इंगुदीजेनतैलेनतवराज्यमकंटकम् ॥ ४३ ॥ किंपुनः सर्पिषादीपंतिलतैलेनवापुनः ॥ यःकरोतिह्यखंडंवैमासेश्रीपुरुषोत्तमे ॥ ४४ ॥ पुरुषोत्तमदीपस्यफलमेतन्नसंशयः ॥ किंपुनश्चोपवासाद्यैश्चरतःपुरुषोत्तमम् ॥ ४५ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ चित्रबाहुचरितंपुरातनंसन्निरूप्यकलशोद्भवोमुनिः ॥ सत्कृतिंसमधिगम्यतत्कृतामक्षयाशिषमुदीर्यनिर्ययौ ॥ ४६ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेदीपमाहात्म्यकथनंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ७ ॥ ॥ दृढधन्वोवाच ॥ ॥ अथसम्यग्वदब्रह्मन्नुद्यापनविधिंमुने ॥ पुरुषोत्तममासीयव्रतिनांकृपयानृणाम् ॥ १ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ समासतःप्रवक्ष्यामिमासेश्रीपुरुषोत्तमे ॥ उद्यापनविधिंसम्यग्व्रतसंपूर्णहेतवे ॥ २ ॥ कृष्णपक्षेचतुर्दश्यांनवम्यांपुरुषोत्तमे ॥ अष्टम्यांवाथकर्तव्यमुद्यापनमुदीरितम् ॥ ३ ॥ यथालब्धोपहारेणमासेश्रीपुरुषोत्तमे ॥ पुण्येस्मिन्प्रातरुत्थायकृत्वापौर्वाह्णिकीःक्रियाः ॥४॥ समाहितमनाभूत्वात्रिंशद्विप्रान्निमंत्रयेत् ॥ सपत्नीकान्सदाचारान्विष्णुभक्तिपरायणान् ॥५॥ यथाशक्त्याथवासप्तपंचवित्तानुसारतः ॥ ततोमध्याह्नसमयेद्रोणमानेनभूपते ॥ ६ ॥ तदर्धेनतदर्धेननिजभक्त्यनुसारतः ॥ पंचधान्येनकुर्वीतसर्वतोभद्रमुत्तमम् ॥ ७ ॥ चत्वारःकलशाःस्थाप्याहैमावाराजताःशुभाः ॥ ताम्रावामृन्मयाःशुद्धाअव्रणामंडलोपरि ॥ ८ ॥ चतुर्दिक्षुचतुर्व्यूहप्रीतयेश्रीफलान्विताः ॥ सद्वस्त्रवेष्टितानागवल्लीदलसमन्विताः ॥ ९ ॥ वासुदेवंहलधरंप्रद्युम्नंदेवमुत्तमम् ॥

अनिरुद्धंचतुर्थ्वेवस्थापयेत्कलशेषुच ॥१०॥ पुरुषोत्तममवतारंमेस्थापितंपुरुषोत्तमम् ॥ सराधंदेवदेवेशंकलशेनसमन्वितम् ॥ ११ ॥ ततआ
नीयतन्मध्येमंडलोपरिविन्यसेत् ॥ आचार्यंवैष्णवंकृत्वावेदवेदांगपारगम् ॥१२॥ विप्राश्चत्वारएवात्रवरणीयाजपार्थिना ॥ द्वेद्वेवस्त्रेचदात
व्येहस्तमुद्रादिसंयुते ॥ १३ ॥ आचार्यंसमलंकृत्यवस्त्रभूषादिभिर्मुदा ॥ ततोदेहविशुद्ध्यर्थंप्रायश्चित्तंसमाचरेत् ॥ १४ ॥ ततःपूर्वोक्तविधि
नापूजाकार्यासहस्त्रिया ॥ चतुर्व्यूहजपःकार्योवृतैर्विप्रैश्चतुर्विधैः ॥१५॥ चतुर्दिक्षुप्रकर्तव्यादीपाश्चत्वारउद्धृताः ॥ अर्घ्यदानंततःकार्यंनारिके
लादिभिःक्रमात् ॥ १६ ॥ पंचरत्नसमायुक्तैर्जानुभ्यांसक्तभूतलः ॥ स्वपाणिपुटमध्यस्थैर्यथालब्धैःफलैःशुभैः ॥१७॥ श्रद्धाभक्तिसमायुक्तः
सपत्नीकोमुदान्वितः ॥ अर्घ्यंदद्यात्प्रहृष्टेनमनसाश्रीहरिंस्मरन् ॥ १८ ॥ अर्घ्यमंत्रः ॥ देवदेवनमस्तुभ्यंपुराणपुरुषोत्तम ॥ गृहाणार्घ्यंमया
दत्तंराधयासहितोहरे ॥१९॥ वंदेनवघनश्यामंद्विभुजंमुरलीधरम् ॥ पीतांबरधरंदेवंसराधंपुरुषोत्तमम् ॥२०॥ एवंभक्त्याहरिंनत्वासराधंपुरु
षोत्तमम् ॥ चतुर्थ्यंतैर्नाममंत्रैस्तिलहोमंचकारयेत् ॥ २१ ॥ ततस्तद्दशांशेनतर्पणमार्जने ॥ नीराजयेत्ततोदेवंसराधंपुरुषोत्तमम् ॥
॥२२॥ अथनीराजनमंत्रः ॥ नीराजयामिदेवेशमिंदीवरदलच्छविम् ॥ राधिकारमणंप्रेम्णाकोटिकंदर्पसुन्दरम् ॥ २३ ॥ अथध्यानम् ॥
अंतर्ज्योतिरनंतरत्नरचितेसिंहासनेसंस्थितंवंशीनादविमोहितव्रजवधूवृंदावनेसुन्दरम् ॥ ध्यायेद्राधिकयासकौस्तुभमणिप्रद्योतितोरस्थलंरा
जद्रत्नकिरीटकुण्डलधरंप्रत्यग्रपीतांबरम् ॥ २४ ॥ ततःपुष्पांजलिंदत्त्वाराधिकासहितेहरौ ॥ नमस्कारंप्रकुर्वीतसाष्टांगंगृहिणीयुतः ॥
॥ २५ ॥ नौमिनवघनश्यामंपीतवाससमच्युतम् ॥ श्रीवत्सभासितोरस्कंराधिकासहितंहरिम् ॥ २६ ॥ पूर्णपात्रंततोदद्याद्ब्राह्मणेसहिरण्य

कम् ॥ आचार्यायततोदद्याद्दक्षिणांविपुलांमुदा ॥ २७ ॥ आचार्यंतोषयेद्भक्त्यावस्त्रैराभरणैरपि ॥ सपत्नीकंततोदद्यादृत्विग्भ्योदक्षिणांपराम् ॥ २८ ॥ धेनुरेकाप्रदातव्यासुशीलाचपयस्विनी ॥ सचैलाचसवत्साचघंटाभरणभूषिता ॥ २९ ॥ ताम्रपृष्ठीहेमशृंगीसरौप्यखुरभूषिता ॥ घृतपात्रंततोदद्यात्तिलपात्रंतथैवच ॥ ३० ॥ उमामहेश्वरंदद्याद्दंपत्योःपरिधायकम् ॥ पदमष्टविधंदद्यादुपानद्युगलंतथा ॥ ३१ ॥ श्रीमद्भागवतंदद्याद्वैष्णवायद्विजन्मने ॥ शक्तिश्चेन्नविलंबेतचलमायुर्विचारयन् ॥ ३२ ॥ श्रीमद्भागवतंसाक्षाद्भगवद्रूपमद्भुतम् ॥ योदद्याद्वैष्णवायैवपंडितायद्विजन्मने ॥ ३३ ॥ सकोटिकुलमुद्धृत्यह्यप्सरोगणसेवितः ॥ विमानमधिरुह्यैतिगोलोकंयोगिदुर्लभम् ॥३४॥ कन्यादानसहस्राणिवाजपेयशतानिच ॥ सधान्यक्षेत्रदानानितुलादानानियानिच ॥ ३५ ॥ महादानानियान्यष्टौछंदोदानानियानिच ॥ श्रीभागवतदानस्यकलांनार्हंतिषोडशीम् ॥ ३६ ॥ तस्माद्यत्नेनतद्देयंवैष्णवायद्विजन्मने ॥ संभूष्यवस्त्रभूषाभिर्हेमसिंहासनस्थितम् ॥ ॥ ३७ ॥ कांस्यानिसंपुटान्येवत्रिंशद्देयानिसर्वथा ॥ त्रिंशत्त्रिंशदपूपैश्चमध्येसंपूरितानिच ॥ ३८ ॥ प्रत्यपूपंतुयावंतिछिद्राणिपृथिवीपते ॥ तावद्वर्षसहस्राणिवैकुंठेवसतेनरः ॥ ३९ ॥ ततःप्रयातिगोलोकंनिर्गुणंयोगिदुर्लभम् ॥ यद्गत्वाननिवर्ततेज्योतिर्धामसनातनम् ॥ ४० ॥ सार्द्धप्रस्थद्वयंकांस्यसंपुटंपरिकीर्तितम् ॥ निर्धनेनयथाशक्त्याकार्याणिव्रतपूर्तये ॥४१॥ अथवापूपसामग्रीमपक्कांसफलांपराम् ॥ तत्राधायप्रदेयानिपुरुषोत्तमप्रीतये ॥ ४२ ॥ निमंत्रितानांविप्राणांसस्त्रीकाणांनराधिप ॥ संकल्पंचप्रकुर्वीतपुरुषोत्तमसन्निधौ ॥ ४३ ॥ ॥ अथ प्रार्थना ॥ ॥ श्रीकृष्णजगदाधारजगदानंददायक ॥ ऐहिकामुष्मिकान्कामान्निखिलान्पूरयाशुमे ॥ ४४ ॥ इतिसंप्रार्थ्यगोविंदंभोज

येद्ब्राह्मणान्मुदा ॥ सपत्नीकान्सदाचारान्संस्मरन्पुरुषोत्तमम् ॥ ४५ ॥ संपूज्यविधिवद्भक्त्याभोजयेद्घृतपायसैः ॥ विप्ररूपंहरिंस्मृत्व स्त्रीरूपांराधिकांस्मरन् ॥ ४६ ॥ भोजनस्यतुसंकल्पमाचरेद्विधिनाव्रती ॥ द्राक्षाभिःकदलीभिश्चचूतैश्चविविधैरपि ॥ ४७ ॥ घृतपाचित पक्वान्नैःशुभैश्चमाषकैर्वटैः ॥ शर्कराघृतपूरैश्चफाणितैःखंडमंडकैः ॥ ४८ ॥ उर्वारुकर्कटीशाकैरार्द्रकैश्चसुनिंबुकै ॥ अन्यैश्चविविधैःशाकै राम्रैःपक्वैःपृथक्पृथक् ॥ ४९ ॥ चतुर्धाभोजनैरेवषड्रसैःसहसंगतैः ॥ वासितान्गोरसांस्तत्रपरिवेष्यमृदुब्रुवन् ॥ ५० ॥ इदंस्वादुमुदाभो ज्यंभवदर्थेप्रकल्पितम् ॥ याच्यतांरोचतेब्रह्मन्यन्मयापाचितंप्रभो ॥ ५१ ॥ धन्योस्म्यनुगृहीतोस्मिजातंमेजन्मसार्थकम् ॥ भोजयित्वामु दाविप्रान्देयास्तांबूलदक्षिणाः ॥ ५२ ॥ एलालवंगकर्पूरनागवल्लीदलानिच ॥ कस्तूरीमुरमांसीचचूर्णंचखदिरंशुभम् ॥५३॥ एतैश्चमीलि तैर्देयंतांबूलंभगवत्प्रियम् ॥ तस्मादेवंविधायैवदेयंतांबूलमादरात् ॥ ५४ ॥ तांबूलंयोद्विजाग्र्यायएवंकृत्वाप्रयच्छति ॥ सुभगश्चभवेदत्रपरत्रा मृतभुग्भवेत् ॥ ५५ ॥ परितोष्यसपत्नीकान्यस्तेदद्याच्चमोदकान् ॥ पत्नीभ्योवैणवीर्दद्यादलंकृत्यविधानतः ॥ ५६ ॥ आसीमांतमनुव्रज्य ब्राह्मणांस्तान्विसर्जयेत ॥ मंत्रहीनेतिमंत्रेणक्षमाप्यपुरुषोत्तमम् ॥ ५७ ॥ यस्यस्मृत्येतिमंत्रेणनमस्कृत्यजनार्दनम् ॥ यदूनंतत्तुसंपूर्णं विधायविचरेत्सुखम् ॥ ५८ ॥ अन्नंविभज्यभूतेभ्योयथाभागमकुत्सयन् ॥ भुंजीतस्वजनैःसार्धंमिथ्यावादविवर्जितः ॥ ५९ ॥ दर्शस्यदि वसेप्राप्तेकुर्याज्जागरणंनिशि ॥ राधिकासहितंहैमंपूजयेत्पुरुषोत्तमम् ॥ ६० ॥ पूजांतेचनमस्कृत्यसपत्नीकोमुदान्वितः ॥ व्रतीविसर्जये द्देवंसराधंपुरुषोत्तमम् ॥ ६१ ॥आचार्यायततोदद्यादुपहारंसमूर्तिकम् ॥ अन्नदानंयथायोग्यंदद्यादिच्छानुसारतः ॥ ६२ ॥ येनकेनाप्यु

पायेनव्रतमेतत्समाचरेत् ॥ कुर्याच्चपरयाभक्त्यादानंवित्तानुसारतः ॥ ६३ ॥ नारीवाथनरोवापिव्रतमेतत्समाचरेत् ॥ दुःखदारिद्र्यदौर्भाग्यंनाप्नुयाज्जन्मजन्मनि ॥ ६४ ॥ येकुर्वंतिजनाल्लोकेनानापूर्णमनोरथाः ॥ विमानान्यधिरुह्यैवयांतिवैकुंठमुत्तमम् ॥ ६५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्थंयोविधिमवलंब्यचर्करीतिश्रीकृष्णप्रियतममासमादरेण ॥ गोलोकंव्रजतिविधूयपापराशिंचात्रत्यंसुखमनुभूयपूर्वपुंभिः ॥ ६६ ॥ इतिश्रीबृहन्नारदीयपुराणेनारायणनारदसंवादेदृढधन्वोपाख्यानेव्रतोद्यापनविधिकथनंनामपंचविंशोऽध्यायः ॥ २५ ॥ अथोद्यापनानंतरंव्रतनियममोक्षणमुच्यते ॥ ॥ वाल्मीकिरुवाच ॥ ॥ अशेषपापनाशार्थंप्रीतयेगरुडध्वजे ॥ गृहीतनियमत्यागश्चोच्यतेविधिपूर्वकः॥१॥ नक्तभोजीनरोराजन्ब्राह्मणान्भोजयेदथ ॥ अयाचितव्रतेचैवस्वर्णदानंसमाचरेत् ॥२॥ अमावास्याशनोयस्तुप्रदद्याद्गांसदक्षिणाम् ॥ धात्रीस्नानंनरोयस्तुदधिवाक्षीरमेवच ॥३॥ फलानांनियमेराजन्फलदानंसमाचरेत् ॥ तैलस्थानेघृतंदेयंघृतस्थानेपयस्तथा ॥४॥ धान्यानांनियमेराजन्गोधूमाञ्शालितंडुलान् ॥ भूमौचशयनेराजन्सतूलींसपरिच्छदाम् ॥५॥ सुखदांचात्मनोन्यस्यह्यंतर्यामीप्रियोजनः ॥ पत्रभोजीनरोयस्तुभोजनंघृतशर्कराम् ॥ ६ ॥ मौनेघंटांतिलांश्चैवसहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनंचैवसस्नेहंचसुशोभनम् ॥ ७ ॥ नखकेशधरोराजन्नादर्शंदापयेद्बुधः ॥ उपानहौप्रदातव्येउपानहविवर्जनात् ॥ ८ ॥ लवणस्यपरित्यागेदातव्याविविधारसाः ॥ दीपदानेनरोदद्यात्पात्रयुक्तंचदीपकम् ॥ ९ ॥ अधिमासेनरोभक्त्यासवैकुंठेवसेत्सदा ॥ दीपंचसघृतंताम्रंकांचनीवर्तिसंयुतम् ॥ १० ॥ पलमात्रंप्रदेयंस्याद्व्रतसंपूर्णहेतवे ॥ एकांतरोपवासेनकुंभानष्टौप्रदापयेत् ॥ ११ ॥ सवस्त्रान्कांचनोपेतान्मृन्मयानथकांचनान् ॥ मासांतेमोदकांस्त्रि

गच्छत्रोपानहसंयुतान् ॥ १२ ॥ अनड्वांश्चप्रदातव्योधौरेयस्तुधुरिक्षमः ॥ सर्वेषामप्यलाभेचयथोक्तकरणंविना ॥ १३ ॥ द्विजवाक्यंस्मृतं
राजन्संपूर्णव्रतसिद्धिदम् ॥ एकान्नेननरोयस्तुमलमासंनिषेवते ॥१४॥ चतुर्भुजोनरोभूत्वासयातिपरमांगतिम् ॥ एकान्नान्नापरंकिंचित्प
वित्रमिहविद्यते ॥ १५ ॥ एकान्नान्मुनयःसिद्धाःपरंनिर्वाणमागताः ॥ अधिमासेनरोनक्तंयोभुंक्तेसनराधिपः ॥१६॥ सर्वान्कामानवाप्नोति
नरोवैनात्रसंशयः ॥ पूर्वाह्णेभुंजतेदेवामध्याह्नेमुनयस्तथा ॥ १७ ॥ अपराह्णेपितृगणाःस्वात्मार्थस्तुचतुर्थकः ॥ सर्ववेलामतिक्रम्ययस्तुभुं
क्तेनराधिप ॥ १८ ॥ ब्रह्महत्यादिपापानिनाशंयांतिजनाधिप ॥ नक्तभोजीमहीपालसर्वपुण्याधिकोभवेत् ॥ १९ ॥ दिनेदिनेऽश्वमेधस्यफ
लंप्राप्नोतिमानवः ॥ तस्मिन्विवर्जयेन्माषमधिमासेहरिप्रिये ॥ २० ॥ सर्वस्मान्मुच्यतेपापाद्विष्णुलोकंसगच्छति ॥ तिलयंत्राणिपापा
त्माकुरुतेब्राह्मणोपिसन् ॥ २१ ॥ तिलानांसंख्ययाराजन्सवैतिष्ठतिरौरवे ॥ चांडालयोनिमाप्नोतिकुष्ठरोगेणपीडयते ॥ २२ ॥
शुक्लेकृष्णेनरोभक्त्याद्वादशींसमुपोषयेत् ॥ आरुह्यगरुडंयातिनरोभूत्वाचतुर्भुजः ॥२३॥ सदेवैःपूज्यमानोपिह्यप्सरोगणसेवितः ॥ दशमीं
द्वादशींचैवएकभुक्तंचकारयेत् ॥ २४ ॥ प्रीतयेदेवदेवस्यनरःस्वर्गमवाप्नुयात् ॥ भक्त्याचसर्वदाराजन्दर्भकूर्चंनवर्जयेत् ॥२५॥ दर्भेणमार्जये
द्यस्तुपुरीषमूत्रमेवच ॥ श्लेष्माणंरुधिरंवापिविष्ठायांजायतेकृमिः ॥२६॥ पवित्राःपरमादर्भादर्भहीनावृथाक्रियाः ॥ दर्भमूलेवसेद्ब्रह्मामध्येदेवो
जनार्दनः ॥ २७ ॥ दर्भाग्रेतद्भुमानाथस्तस्माद्दर्भेणमार्जयेत् ॥ नदर्भानुद्धरेच्छूद्रोनपिबेत्कपिलापयः ॥ २८ ॥ मध्यपत्रेनभुंजीतब्रह्म
पत्रस्यभूपते ॥ नोच्चरेत्प्रणवंमंत्रंपुरोडाशंनभक्षयेत् ॥ २९ ॥ नासनंनोपवीतंचनाचरेद्वैदिकींक्रियाम् ॥ निर्विध्याचरणंकुर्वन्पितृभिः

सहमज्जति ॥ ३० ॥ पतंतिनरकेघोरेयावदिंद्राश्चतुर्दश ॥ पश्चाच्चकौकुटींयोनिंसौकरींवानरींचवा ॥ ३१ ॥ एतस्मात्कारणाच्छूद्रःप्रणवं
वर्जयेत्सदा ॥ नमस्कारेणविप्राणांशूद्रोनश्यतिभूमिप ॥ ३२ ॥ एतत्कृत्वामहाराजपरिपूर्णव्रतंचरेत् ॥ अदत्त्वादक्षिणांवापिनरकंयांतिवै
नराः ॥ ३३ ॥ व्रतवैकल्यमासाद्यह्यंधःकुष्टीप्रजायते ॥ ३४ ॥ धरामराणांवचनैर्नरोत्तमादिवौकसांवैपदमाप्नुवंति ॥ नोल्लंघयेद्भूपवचांसि
तेषांश्रेयोभिकामीमनुजःसविद्वान् ॥ ३५ ॥ इदंमयाधर्मरहस्यमुत्तमंश्रेयस्करंपापविमर्दनंच ॥ फलप्रदंमाधवतुष्टिहेतोःपठेच्चनित्यंमनसो
भिरामम् ॥ ३६ ॥ यःशृणोतिनरोराजन्पठतेवापिसर्वदा ॥ सयातिपरमंलोकंयत्रयोगीश्वरोहरिः ॥ ३७ ॥ ॥ इतिश्रीबृहन्नारदीयपुरा
णेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेगृहीतनियमत्यागोनामषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीनारायणउ
वाच ॥ इत्युक्त्वाविरतंराजामुनीश्वरमनीनमत् ॥ अपूजयत्ततोभक्त्यासपत्नीकोमुदान्वितः ॥ १ ॥ उररीकृत्यतत्पूजामाशीर्वादमुदीर
यत् ॥ स्वस्तितेस्तुगमिष्यामिसरयूंपापनाशिनीम् ॥ २ ॥ आवयोर्वदतोरेवंसायंकालोऽधुनाभवत् ॥ इत्युक्त्वाशुजगामैववाल्मीकिर्मुनि
सत्तमः ॥ ३ ॥ आसीमांतमनुव्रज्यराजाप्यागतवान्गृहम् ॥ आगत्यस्वप्रियामाहसुंदरींगुणसुंदरीम् ॥ ४ ॥ ॥ दृढधन्वोवाच ॥ ॥
अयिसुन्दरिसंसारेह्यसारेकिंसुखंनृणाम् ॥ रागद्वेषादिषट्शत्रौगंधर्वनगरोपमे ॥ ५ ॥ कृमिविड्भस्मसंज्ञांतेदेहेमेकिंप्रयोजनम् ॥ वातपि
त्तकफोद्रेकमलमूत्रासृगाकुले ॥ ६ ॥ अध्रुवेणशरीरेणध्रुवमर्जयितुंवने ॥ गमिष्यामिवरारोहेसंस्मरन्पुरुषोत्तमम् ॥ ७ ॥ तदाकर्ण्यप्रिया
प्राहसाध्वीसागुणसुंदरी ॥ विनयावनताभूत्वाबद्धांजलिपुटाशुचा ॥ ८ ॥ गुणसुंदर्युवाच ॥ ॥ अहमप्यागमिष्यामित्वयैवसहभूपते ॥

पतिव्रतानांस्त्रीणांतुपतिरेवहिदैवतम् ॥ ९ ॥ पत्यौगतेंतुयानारीगृहेतिष्ठतिसौनवे ॥ स्नुषाधीनातुसानारीशुनीवपरवेश्मनि ॥ १० ॥ मितंपितादादात्येवमितंभ्रातामितंसुतः ॥ अमितस्यप्रदातारंभर्तारंकानुनव्रजेत् ॥ ११ ॥ प्रियावाक्यमुरीकृत्यसुतंराज्येभिषिच्यच ॥ सहपत्न्याययौशीघ्रमरण्यंमुनिसेवितम् ॥ १२ ॥ हिमाचलसमीपेचगंगामासाद्यदंपती ॥ त्रिकालंचक्रतुःस्नानंसंप्राप्तेपुरुषोत्तमे ॥ १३ ॥ पुरुषोत्तमंसमासाद्यविधिनातत्रनारद ॥ तपस्तेपेसपत्नीकःसंस्मरन्पुरुषोत्तमम् ॥ १४ ॥ ऊर्ध्वबाहुर्निरालंबःपादांगुष्ठेनसंस्थितः ॥ नभोदृष्टिर्निराहारःश्रीकृष्णंतमजीजपत् ॥ १५ ॥ एवंव्रतविधौतस्यतस्थुषश्चतपोनिधेः ॥ सेवाविधौप्रपन्नासीन्महिषीसापतिव्रता ॥ १६ ॥ एवंकृतवतस्तस्यसंपूर्णेपुरुषोत्तमे ॥ विमानमागमत्तत्रकिंकिणीजालमंडितम् ॥ १७ ॥ पुण्यशीलसुशीलाभ्यांसेवितंसहसा गतम् ॥ तदृष्ट्वाविस्मयाविष्टःसपत्नीकोमहीपतिः ॥ १८ ॥ अनीनमद्विमानस्थौपुण्यशीलसुशीलकौ ॥ ततस्तौतंसपत्नीकंविमानंनि न्यतुर्नृपम् ॥ १९ ॥ विमानमधिरुह्याथसपत्नीकोनराधिपः ॥ गोलोकंगतवाञ्शीघ्रंदिव्यंधृत्वावपुर्नवम् ॥ २० ॥ एवंकृत्वातपोराजामा सेश्रीपुरुषोत्तमे ॥ निर्भयंलोकमासाद्यमुमोदहरिसन्निधौ ॥ २१ ॥ पतिव्रताचतत्पत्नीसापितल्लोकमाययौ ॥ पुरुषोत्तमेतपस्यंतंसंसेव्य निजवल्लभम् ॥ २२ ॥ ॥ श्रीनारायणउवाच ॥ ॥ वर्णयामिकिमद्याहंयदेकरसनामम ॥ पुरुषोत्तमसमंकिंचिन्नास्तिनारदभूतले ॥ २३ ॥ सहस्रजन्मतप्तेनतपसातन्नगम्यते ॥ यत्फलंगम्यतेपुंभिःपुरुषोत्तमसेवनात् ॥ २४ ॥ व्याजतोपिकृतेतस्मिन्मासेश्रीपुरुषो त्तमे ॥ उपवासेनदानेनस्नानेनचजपादिना ॥ २५ ॥ कोटिजन्मकृतानेकपापराशिर्लयंव्रजेत् ॥ यथाशाखामृगस्याशुत्रिरात्रस्नान

मात्रतः ॥ २६ ॥ अजानतोपिदुष्टस्यप्राक्तनानांकुकर्मणाम् ॥ संचयोविलयंयातोमासेश्रीपुरुषोत्तमे ॥ २७ ॥ सोपिदिव्यंवपुर्धृत्वावि
मानमधिरुह्यच ॥ अगमद्दिव्यगोलोकंजरामृत्युविवर्जितम् ॥ २८ ॥ अतःश्रेष्ठतमोमासःसर्वेभ्यःपुरुषोत्तमः ॥ दुष्टंशाखामृगंयोसौव्या
जेनापिहरिंनयत् ॥ २९ ॥ अहोमूढानसेवंतेमासंश्रीपुरुषोत्तमम् ॥ तेधन्याःकृतकृत्यास्तेतेषांचसफलोभवः ॥ ३० ॥ पुरुषोत्तममासं
येसेवंतेविधिपूर्वकम् ॥ स्नानदानजपैर्होमैरुपोषणपुरःसरैः ॥ ३१ ॥ ॥ नारदउवाच ॥ ॥ सर्वार्थसाधनंवेदेमानुषंजनुरुच्यते ॥ अयं
शाखामृगोप्यद्धामुक्तोयद्व्याजसेवनात् ॥ ३२ ॥ तद्वदस्वकथामेतांसर्वलोकहितायमे ॥ कुत्रासौकृतवान्स्नानंत्रिरात्रंतपसांनिधे ॥ ३३ ॥
कोसौकपिःकिमाहारःकुत्रजातःक्वचावसत् ॥ व्याजेनतस्यकिंपुण्यंजातंश्रीपुरुषोत्तमे ॥ ३४ ॥ तत्सर्वंविस्तरेणैवमह्यंशुश्रूषवेवद ॥ नतृप्ति
र्जायतेत्वत्तः शृण्वतोमेकथामृतम् ॥ ३५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ कश्चित्केरलदेशीयोद्विजःपरमलोलुपः ॥ नित्यंधनचयेदक्षः
सर्वेवधनप्रियः ॥३६॥ लोकेकदर्यइत्याख्यांगतस्तेनैवकर्मणा ॥ चित्रशर्मापुरानामतस्यासीत्पितृकल्पितम् ॥३७॥ सदन्नंचसुवस्त्रंचनभुक्तं
तेनकुत्रचित् ॥ नस्वाहानस्वधावापिकृतातेनकुबुद्धिना ॥ ३८ ॥ यशोर्थेनकृतंकिंचित्पोष्यवर्गोनपोषितः ॥ सर्वंभूमिगतंचक्रेधनम
न्यायसंचितम् ॥ ३९ ॥ नमाघेतिलदानंचकृतंतेनकदाचन ॥ कार्तिकेदीपदानंहिब्राह्मणानांचभोजनम् ॥ ४० ॥ वैशाखेधान्य
दानंचव्यतीपातेचकांचनम् ॥ वैधृतौराजतंदानंसर्वदानान्यमूनिच ॥४१॥ रविसंक्रमणेकालेनदत्तानिकदाचन ॥ चंद्रसूर्योपरागेचनजप्तंन
हुतंक्वचित् ॥ ४२ ॥ अवीवदद्दीनवाचंसर्वत्राश्रुपपरिप्लुतः ॥ वर्षवातातपक्लिष्टःकृशःश्यामकलेवरः ॥ ४३ ॥ चचारधनलोभेनमूढधीर्भूतले

सदा ॥ कोपियच्छतुयत्किंचित्पामरायमुहुर्वदन् ॥ ४४ ॥ सगोदोहनमात्रंहिकुत्रापिस्थातुमक्षमः ॥ लोकधिक्कारसंदग्धोबभ्रामोद्विग्नमान
सः ॥ ४५ ॥ तन्मित्रंवाटिकानाथःकश्चिदासीद्वनेचरः ॥ सतंनिवेदयामासस्वदुःखंसंरुदन्मुहुः ॥ ४६ ॥ तिरस्कुर्वंतिमांनित्यंपुटभेदनवा
सिनः ॥ अतस्तत्रमयास्थातुंनशक्यंपुटभेदने ॥ ४७ ॥ इत्येवंवदतस्तस्यकदर्यस्यद्विजन्मनः ॥ अतिदीनतरांवाचमाकर्ण्यकृपयाप्लुतः
॥ ४८ ॥ मालाकारःप्रपन्नंतंदीनंमत्वाकरोद्दयाम् ॥ हेकदर्यत्वमत्रैववाटिकायांवसाधुना ॥ ४९ ॥ मालाकारवचःश्रुत्वाकदर्यःसर्वनागरैः॥
तिरस्कृतःसतद्वाटीमध्युवासमुदायुतः ॥ ५० ॥ नित्यंतन्निकटस्थायीतदाज्ञापपरिपालकः ॥ तेनवाटीपतिस्तस्मिन्विश्वासमकरोद्दृढम् ॥
॥ ५१ ॥ अतिविश्वस्तचित्तेतुतस्मिन्सवाटिकापतिः ॥ तमेवाचीकरद्विप्रंस्वकल्पंवाटिकापतिम् ॥ ५२ ॥ ततःसर्वात्मभावेनममायमिति
निश्चयात् ॥ विहायवाटिकाचिंतांसिषेवेराजमंदिरम् ॥ ५३ ॥ राजद्वारेसदाकार्यंतस्यात्यंतमभीभवत् ॥ पराधीनतयाचासौवाटिकांनज
गामह ॥ ५४ ॥ तत्फलानिकदर्यस्तुजघासनिर्भरंमुदा ॥ अक्षीणतावशिष्टानिलोभेनातीवदुर्बलः ॥ ५५ ॥ अगृह्णाद्द्रविणंतज्जंसर्वंस्वय
मशंकितः ॥ यदापृच्छद्वनाधीशस्तदग्रेवीवदन्मुधा ॥ ५६ ॥ ग्रामंग्रामंचनगरंयाचंयाचंचभैक्षकम् ॥ घासंघासंदिवारात्रौपरिचर्यामितेव
नम् ॥ ५७ ॥ तथाप्यस्यफलान्याशन्मासंगच्छंतिपक्षिणः ॥ पश्याश्रंतोमयाकेचिन्नाशिताःखचराभृशम् ॥ ५८ ॥ तेषांमांसानिपक्षा
णिपतितानीहसर्वतः ॥ तद्दृष्ट्वातीवविश्वस्यजगामवाटिकापतिः ॥ ५९ ॥ एवंप्रवर्तमानस्यजग्मुर्वर्षाणिदुर्मतेः ॥ सप्ताशीतिःकदर्यस्यजरा
जर्जरितस्ततः ॥ ६० ॥ ममारमूढधीस्तत्रनैवापत्रत्तिदारुणी ॥ नाभुक्तंक्षीयतेपापमितिवेदविदोवदन् ॥ ६१ ॥ तस्माद्धाहाप्रकुर्वाणोमुद्गरा

घातपीडितः ॥ अजीगमन्महामार्गंकृच्छ्रेणातिविभीषणम् ॥ ६२ ॥ स्मरन्पूर्वंकृतंकर्मप्रलपन्बुद्बुदाक्षरम् ॥ अहोमेपश्यताज्ञानंकदर्यस्यच
दुर्मतेः ॥ ६३ ॥ आसाद्यमानुषंदेहंदुर्लभंत्रिदशैरपि ॥ खंडेस्मिन्भारतेपुण्येकृष्णसारमृगान्विते ॥ ६४ ॥ किंकृतंधनलोभेनव्यर्थं
नीतंजनुर्मया ॥ तद्धनंतुपराधीनंचिरकालार्जितंमया ॥ ६५ ॥ किंकरोमिपराधीनःकालपाशावृतोधुना ॥ मानुषंजनुरासाद्यनाकिंचि
त्कृतवाञ्शुभम् ॥ ६६ ॥ नदत्तंनहुतंवह्नौनतप्तंहिमगह्वरे ॥ नगांगसेवितंतोयंमाघेमकरगेरवौ ॥ ६७ ॥ उपवासत्रयंचांतेनक्तंतं
पुरुषोत्तमे ॥ नक्तंकार्तिकेप्रातःस्नानंसत्तारकागणम् ॥ ६८ ॥ नपुष्टश्चमयादेहोमानुषःपुरुषार्थदः ॥ अहोमेसंचितंद्रव्यंस्थितं
भूमौनिरर्थकम् ॥ ६९ ॥ जीवोजीवनपर्यंतंक्लेशितोदुष्टबुद्धिना ॥ कदाचिज्जाठरोवह्निर्नान्नैर्निर्वापितोमया ॥ ७० ॥ नापिसद्वसनाच्छ
न्नःस्वदेहःपर्वणिक्वचित् ॥ नज्ञातयोबांधवाश्चस्वजनाःस्वसृजाअपि ॥ ७१ ॥ जामाताचसुतावापिपितामातानुजास्तथा ॥ पतिव्रतापि
गृहिणीब्राह्मणानैवतोषिताः ॥ ७२ ॥ मिष्टान्नैरेकवारंचतर्पितानमयाक्वचित् ॥ एवंविलपमानंतंनिन्युःकीनाशसन्निधिम् ॥
॥ ७३ ॥ तंदृष्ट्वाचित्रगुप्तस्तुविलोक्यैतच्छुभाशुभम् ॥ अवोचत्स्वामिनंधर्मंकदर्योयंद्विजाधमः ॥ ७४ ॥ नकिंचित्सुकृतंत्वस्य
धनलुब्धस्यदुर्मतेः ॥ आसावचीकरत्पापंपुष्कलंवाटिकास्थितः ॥ ७५ ॥ अचूचुरत्फलान्यद्धाविश्वस्तोवाटिकापतेः ॥ ततोजघासतान्ये
वपक्वानियानियानिच ॥ ७६ ॥ अक्रीणादवशिष्टानिधनलोभेनदुर्मतिः ॥ फलचौर्यकृतंपापंविश्वासघातजंपरम् ॥ ७७ ॥ एतत्पाप
द्वयंचास्मिन्नत्युग्रंवर्ततेप्रभो ॥ अन्यान्यपिचपापानिसंत्यस्मिन्विविधानिच ॥ ७८ ॥ नारदउवाच ॥ ॥ इत्थंनिशम्यविधिनंदनचित्र

गुप्तवाक्यंक्रुधाप्रबलयाद्भुतधर्मराजः ॥ आहैषयातुकपिजन्मसहस्रकृत्वोविश्वासघातकृतिजंफलमस्यपश्चात् ॥ ७९ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेकदर्योपाख्यानेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ श्रीनारायणउवाच ॥ ॥ तन्निशम्यभटानाहचित्रगुप्तश्चिरंभृशम् ॥ पूर्वंलोभाभिभूतोयंपश्चाच्चौर्यमचीकरत् ॥ १ ॥ अतःप्रेतत्वमासाद्यपश्चाद्भवतुवानरः ॥ ततश्चाहंप्रदास्यामिबह्वींनरकयातनाम् ॥ २ ॥ अयमेवक्रमःश्रेयान्धर्मराजगृहेभटाः ॥ इत्येवंचित्रगुप्तेनसमादिष्टाविभीषणाः ॥ ३ ॥ तथाचक्रुर्भटाःशीघ्रंताडयंतश्चतंद्विजम् ॥ प्रेतत्वंप्रापितःपूर्वंकाननेविफलेद्विजः ॥ ४ ॥ निर्जलेबहुकालंचप्रेतयोनिमवाप्यसः ॥ क्षुत्तृड्भ्यांव्याकुलोत्यंतंबभ्रामगहनेवने ॥ ५ ॥ प्रेतयोनिगतंदुःखमनुभूयततःपरम् ॥ फलचौर्यसमुद्भूतांकपियोनिमजीगमत् ॥ ६ ॥ दिव्येकालंजरेशैलेजंबुखंडमनोहरे ॥ सुशीतलजलच्छायेफलपुष्पसमन्विते ॥ ७ ॥ तत्रासीद्देवराजेननिर्मितंकुंडमुत्तमम् ॥ सरोवरसमंपुण्यंसत्सेव्यंपापनाशनम् ॥ ८ ॥ मृगतीर्थमितिख्यातंसुराणामपिदुर्लभम् ॥ यस्मिन्कृतेनश्राद्धेनपितरोयांतिसद्गतिम् ॥ ९ ॥ तत्रदैत्यभयाद्देवामृगाभूत्वानिरंतरम् ॥ अभिसस्नुर्निरातंकामृगतीर्थमतोविदुः ॥ १० ॥ तत्रायंप्रथमंजन्मकापेयंलब्धवान्द्विजः ॥ फलचौर्यकृतात्पपादासाद्यमानुषींतनुम् ॥ ११ ॥ ॥ नारदउवाच ॥ ॥ त्रैलोक्यपावनेरम्येमृगतीर्थेकथंकपिः ॥ आवासमकरोद्दुष्टःपापकोटिसमन्वितः ॥ १२ ॥ छिंधिमेसंशयंनाथतपोधनमनोगतम् ॥ भवादृशांनगोप्यंहिस्वशिष्येषुकदाचन ॥ १३ ॥ ॥ सूतउवाच ॥ ॥ एवंसन्नोदितोविप्रानारदेनतपोनिधिः ॥ उवाचपरमप्रीतःसत्कुर्वन्नारदंमुनिम् ॥ १४ ॥

॥ श्रीनारायणउवाच ॥ ॥ कश्चिद्वैश्योमहानासीन्नाम्नावैचित्रकुंडलः ॥ तत्पत्नीतारकानाम्नीपातिव्रत्यपरायणा ॥ १५ ॥ तावुभौचक्रतुर्भ
क्त्यापुण्यंश्रीपुरुषोत्तमम् ॥ तयोःकृतव्रतोर्मासोगतः श्रीपुरुषोत्तमः ॥ १६ ॥ चरमेऽहनिसंप्राप्तेउद्यापनमथाकरोत् ॥ सपत्नीकोमुदायु
क्तःश्रद्धयाचित्रकुंडलः ॥ १७ ॥ द्विजानाकारयामासवेदवेदांगपारगान् ॥ उद्यापनविधिंकर्तुंसपत्नीकान्गुणान्वितान् ॥ १८ ॥ कदर्योप्य
गमत्तत्रधनलोभेननारद ॥ उद्यापनविधौपूर्णेसंजातेचित्रकुंडलः ॥ १९ ॥ अत्युग्रदानैस्तान्विप्रान्सपत्नीकानतोषयत् ॥ तुष्टेषुतेषुसर्वेषुभू
यसींदक्षिणामदात् ॥ २० ॥ तद्दत्तभूयसीतुष्टाअन्येविप्रागृहान्ययुः ॥ अतिलुब्धःकदर्यस्तुरुदंस्तस्थौतदग्रतः ॥ २१ ॥ विनयावनतोभू
त्वासगद्गदमुवाचह ॥ चित्रकुंडलवैश्येशभगवद्भक्तिभासुर ॥ २२ ॥ पुरुषोत्तमव्रतंसम्यग्भवताविधिनाकृतम् ॥ नतथाचकृतंकेनकुत्रापिपृ
थिवीतले ॥ २३ ॥ भवानद्यकृतार्थोसिभाग्यवानसिसर्वथा ॥ यत्त्वयापरयाभक्त्यासेवितःपुरुषोत्तमः ॥ २४ ॥ धन्यस्तवपिताधन्यामा
ताचपतिदेवता ॥ याभ्यामुत्पादितःपुत्रस्त्वादृशोहरिवल्लभः ॥ २५ ॥ धन्याद्धन्यतरश्चायंमासःश्रीपुरुषोत्तमः ॥ यत्सेवनादवाप्नोतिह्यैहि
कामुष्मिकंफलम् ॥ २६ ॥ दृष्ट्वाहितावकींपूजांचकितोहंविशांपते ॥ अहोमयामहत्कर्मकृतमेतन्नसंशयः ॥ २७ ॥ अन्येभ्योब्राह्मणेभ्यश्च
धनंदत्तंबृहन्मुदा ॥ नददासिकथंमह्यंभाग्यहीनायभूरिद ॥ २८ ॥ इतिविज्ञापितस्तेनतस्मैधनमदादसौ ॥ तद्गृहीत्वाकरोद्विप्रोधनंभूमिग
तंमुदा ॥ २९ ॥ तत्रानेनमहापूजादृष्टाश्रीपौरुषोत्तमी ॥ पुरुषोत्तममासश्चधनलोभेनसंस्तुतः ॥ ३० ॥ पूजादर्शनमाहात्म्यात्पुरुषोत्तम
संस्तवात् ॥ धनलोभकृताद्वापिमृगतीर्थमुपागतः ॥ ३१ ॥ ॥ सूतउवाच ॥ ॥ दर्शनात्स्तवनाद्वापिधनलोभकृतादपि ॥ दुष्टशाखामृग

स्यापिजातंसत्तीर्थसेवनम् ॥ ३२ ॥ किंपुनःश्रद्धयाकर्तुंदर्शनस्तत्रनेद्विजाः ॥ पुरुषोत्तमदेवस्यसपत्नीकस्यसादरम् ॥ ३३ ॥ ॥ नारद उवाच ॥ ॥ सुशीतलजलेब्रह्मन्स्निग्धच्छायेमनोहरे ॥ सद्वृक्षमंडितेऽरण्येतत्स्थितेःकारणंवद ॥ ३४ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणु नारदवक्ष्यामितुभ्यंशुश्रूषवेऽनघ ॥ अत्रास्तिकारणंकिंचिच्छ्रवणात्पापनाशनम् ॥ ३५ ॥ यदादाशरथीरामःसर्वार्थफलदायकः ॥ हतवान् रावणंदुष्टंबध्वासेतुंमहोदधौ ॥ ३६ ॥ विभीषणाद्दतेतेनराक्षसानावशेषिताः ॥ ततोवह्निविशुद्धासाजानकीस्वीकृताधुना ॥ ३७ ॥ चतुर्मुखमहेशानपुरंदरपुरःसरैः ॥ दशवक्त्रवधप्रीतैर्हेरामत्वंवरंवृणु ॥ ३८ ॥ इत्युक्तेऽवीवदद्रामोभक्तानामभयंकरः ॥ सुराःशृणुतम द्वाक्यंयदिदेयोवरोऽधुना ॥ ३९ ॥ अत्रयेवानराःशूरारक्षोभिर्निहताश्चते ॥ संजीवयतताना‍शुसुधावृष्ट्याममाज्ञया ॥ ४० ॥ तथेत्यु क्त्वासुधावृष्ट्यावानरान्समजीवयन् ॥ चतुर्मुखमहेशानपुरंदरपुरःसराः ॥ ४१ ॥ ततःसंजीविताःसर्वेवानराजयशालिनः ॥ अद्रुढौकन्रामभद्रेचिरंसुप्तोत्थिताइव ॥ ४२ ॥ अथपुष्पकमारुह्यवानरान्सर्वतःस्थितान् ॥ अजीगदत्सपत्नीकःप्रसन्नमुखपंकजः ॥ ॥ ४३ ॥ ॥ श्रीरामउवाच ॥ ॥ हेसुग्रीवहनूमंतौहेतारात्मजजांबवन् ॥ मित्रकार्यंकृतंसर्वंभवद्भिःसहवानरैः ॥ ४४ ॥ आज्ञापयंतुतान्सर्वान्भवंतोवानरानितः ॥ भवदाज्ञापिताः सर्वेयथेष्टंयांतुतेयतः ॥ ४५ ॥ यत्रयत्रवनेएतेमामकादीर्घजीविनः ॥ वसंतिवानरास्तत्रवृक्षाःपुष्पफलान्विताः ॥ ४६ ॥ नद्योमृष्टजलाश्चाथशीतलंसुभगंसरः ॥ नकेपिधर्षयिष्यंतिसर्वेयांतुममाज्ञया ॥ ॥ ४७ ॥ अतोरामप्रभावेणयतोवानरजातयः ॥ तत्रनद्योमृष्टजलाःसरश्चशुभगंवने ॥ ४८ ॥ लसत्फलामहावृक्षाःपुष्पपल्लवसंयुताः ॥

परंतुसुखदुःखानिप्राक्तनादृष्टजानिच ॥ ४९ ॥ यत्रयत्रवसेज्जंतुस्तत्रतत्रोपयांतिहि ॥ नाभुक्तंक्षीयतेकर्मइतिवेदानुशासनम् ॥ ५० ॥
॥ श्रीनारायणउवाच ॥ ॥ अथासौवानरस्तत्रववृधेपर्वतोपमः ॥ बृहत्क्षुत्तृट्समायुक्तोलोलुपोव्यचरद्वने ॥ ५१ ॥ जन्मतस्तस्यवक्त्रे
ऽभूत्पीडापित्तसमुद्भवा ॥ ययासृक्क्ष्च्यवतेवक्त्रव्रणतश्चदिवानिशम् ॥ ५२ ॥ अत्यंतवेदनाविष्टोनात्तुंशक्तस्तुकिंचन ॥ सचवानरचापल्या
द्रुमेभ्यःसत्फलानिच ॥ ५३ ॥ लुनीयवदनाभ्याशेनीत्वातत्याजभूरिशः ॥ नैकत्रपीडयास्थातुंशक्तोसौवानरःक्वचित् ॥ ५४ ॥
वृक्षाद्वृक्षांतरंगच्छन्मेनेमृत्युंसुखावहम् ॥ कदाचिदपतद्भूमौविललापातिदुःखितः ॥ ५५ ॥ अरूरुदद्भग्नगात्रोनीरभ्रष्टोयथाझषः ॥ असौ
क्षुत्तृट्समाविष्टःश्लथदेहोगलन्मुखः ॥ ५६ ॥ पेतुर्दंतास्तथस्सर्वेव्रणरोगेणपीडितः ॥ पूर्वजन्मकृतात्पापादेवंदुःखमजीगमत् ॥ ५७ ॥
एवंप्रवर्त्तमानस्यनिराहारस्यनित्यशः ॥ दैवयोगात्समागच्छन्मासःश्रीपुरुषोत्तमः ॥ ५८ ॥ तस्मिन्नपितथैवास्तेशीतवातादिपीडितः ॥
कदाचिद्वहुलेपक्षेविचरन्गहनेवने ॥ ५९ ॥ तृषितःकुंडनिकटेनाशक्नोत्पातुममृतम् ॥ क्षुधाविष्टोपिचापल्यात्तत्रोच्चैर्वृक्षमारुहत् ॥ ६० ॥
वृक्षाद्वृक्षांतरंगच्छन्मध्येकुंडमपीपतत् ॥ सचिरायनिराहारःश्लथदिंद्रियजर्जरः ॥ ६१ ॥ निर्बलःशिथिलप्राणःकुंडप्रांतमुपाश्रितः ॥
एवंदिनानिचत्वारिदशमीदिनतःकपेः ॥ ६२ ॥ गतानिलुंठतःकुंडेमासेश्रीपुरुषोत्तमे ॥ पंचमेदिवसेप्राप्तेमध्यंदिनगतेरवौ ॥ ६३ ॥ व्यसुः
पपाततत्तीर्थेतोयक्लिन्नवपुःकपिः ॥ सतंदेहंसमुत्सृज्यविनिर्धूतमलाशयः ॥ ६४ ॥ सद्योदिव्यवपुःप्रापदिव्याभरणभूषितम् ॥ इंदीवरदल
श्यामंकोटिकंदर्पसुंदरम् ॥ ६५ ॥ स्फुरद्रत्नकिरीटंचसुचारुझषकुंडलम् ॥ लसत्पीतपटंपुण्यंसद्रत्नकटिमेखलम् ॥ ६६ ॥ लसत्के

यूरवलयंमुद्रिकाहारशोभितम् ॥ नीलकुंचितसुस्निग्धचिकुरावृतसन्मुखम् ॥ ६७ ॥ नृत्यदेवांगनंदिव्यंगायद्गंधर्वकिन्नरम् ॥
तन्निरीक्ष्यमहाभागोदिव्यदेहधरःकपिः ॥ ६८ ॥ विस्मयंपरमंयातोमहापापस्यमेकुतः ॥ एतत्पुण्यतमस्यैवयोग्यंवैमानिकंसुखम्
॥ ६९ ॥ अथकाचित्तदुपरिदधारच्छत्रमिंदुभम् ॥ चक्रतुश्चामरेतस्यकेचिदप्सरसोमुदा ॥७०॥ काचित्तांबूलहस्ताचननर्तचाप्सराःपुरः ॥
काचिद्भृंगारकंहैमंस्वर्धुनीवारिसंभृतम् ॥ ७१ ॥ हस्तेकृत्वापुरस्तस्थौगीतवाद्यादितत्परा ॥ एवंवैभवमालोक्यचित्रन्यस्तइवाभवत् ॥
॥ ७२ ॥किमेतत्केनपुण्येनममापुण्यस्यदुमतेः ॥ नास्तिमेसुकृतंकिंचिद्येनयामिहरेःपदम् ॥ ७३ ॥ ॥ श्रीनारायणउवाच ॥ ॥
इत्थंतर्कयतोबृहत्सुखनिधिंदिव्यंविमानंपुरोदृष्ट्वाविस्मितचेतसोहरिभटौज्ञात्वास्यहार्दंपरम् ॥ बद्धाग्रेकरसंपुटंसविनयंनत्वातदीयंपदंवाक्यं
सुंदरमूचतुःकपिजनुस्त्यक्त्वापुरःसंस्थितम् ॥७४॥ इतिश्रीबृहन्नारदीयपुराणे पु॰मा॰श्रीनारायणनारदसंवादेकदर्योपाख्यानेकपिजन्मनि
विमानागमनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ पुण्यशीलसुशीलावूचतुः ॥ विभोप्रयाहिगो
लोकंकथमत्रविलंबसे ॥ पुरुषोत्तमसान्निध्यंत्वयालब्धंविशेषतः ॥ १ ॥ ॥ कदर्यउवाच ॥ बहूनिममकर्माणिसंतिभोग्यान्यनेकशः ॥
केनमेनिष्कृतिर्जातायतोगोलोकमाप्नुयाम् ॥ २ ॥ यावंत्योवर्षधाराश्चतृणानिभूरजःकणाः ॥ यावंत्यस्तारकाव्योम्नितावत्पापानिसंतिमे
॥ ३ ॥ कथमेतन्मयाप्राप्तंवपुर्दिव्यंमनोहरम् ॥ एतत्कारणमत्युग्रंमह्यंब्रूतंहरेःप्रियौ ॥ ४ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इतिवाच
मुपाकर्ण्यहरेर्दूतावथोचतुः ॥ हरिदूतावूचतुः ॥ अहोदेवकथंनैवविज्ञातंसाधनंमहत् ॥ ५ ॥ प्रभोनज्ञायतेकस्मान्मासःसर्वोत्तमोत्तमः ॥

विष्णुप्रियोमहापुण्योनाम्नावैपुरुषोत्तमः ॥ ६ ॥ तस्मिंस्त्वयातपश्चीर्णमशक्यंयत्सुरैरपि ॥ अविज्ञातंमहाराजकपिदेहेनकानने ॥७॥ मुख
रोगादनाहारव्रतंजातमजानतः ॥ त्वयाचकपिचांचल्यात्फलान्युत्कृत्यवृंततः ॥ ८ ॥ क्षिप्तानिपृथिवीपीठेतृप्तास्तैरितरेजनाः ॥ पानीयम
पिनोपीतमंतर्दुःखेनभूरिशः ॥ ९ ॥ संजातंतेतपस्तीव्रमज्ञानात्पुरुषोत्तमे ॥ परोपकारःसंजातःफलपातेनतेऽनघ ॥ १० ॥ शीतवातात
पारौद्राःसोढाविचरतावने ॥ महातीर्थेवरेरम्येपंचाहंप्लवनंकृतम् ॥ ११ ॥ तस्मात्तेस्नानजंपुण्यंमासेश्रीपुरुषोत्तमे ॥ एवंरुग्णस्यतेजातम
ज्ञानात्तपउत्तमम् ॥ १२ ॥ तदेतसुफलंजातमनुभूतंत्वयाधुना ॥ व्याजतोपिकृतेनैवसफलंस्याद्यथातव ॥ १३ ॥ किंपुनःश्रद्धयैतस्मि
न्मासेश्रीपुरुषोत्तमे ॥ विधिनाकुर्वतःकर्मज्ञात्वामाहात्म्यमुत्तमम् ॥ १४ ॥ यस्त्वयासाधितःस्वार्थस्तादृक्कर्तुंचकःक्षमः ॥ यस्मिन्नेकोपवा
सेनमुच्यतेपापराशिभिः ॥ १५ ॥ नैतत्तुल्यंभवेत्किंचित्पुरुषोत्तमप्रीतिदम् ॥ तेधन्याःकृतकृत्यास्तेतद्व्रतंयेप्रकुर्वते ॥ १६ ॥ दुर्लभंमानु
षंजन्मभूखण्डेभारताजिरे ॥ तादृशंजनुरासाद्यसेवंतेपुरुषोत्तमम् ॥ १७ ॥ तेसदासुभगाःपुण्यास्तेषांचसफलोभवः ॥ येषांसर्वोत्तमोमासः
स्नानदानजपैर्गतः ॥ १८ ॥ दानानिपितृकार्याणितपांसिविविधानिच ॥ तानिकोटिगुणान्येवसंप्राप्तेपुरुषोत्तमे ॥ १९ ॥ धिक्तंचना
स्तिकंपापंशठंधर्मध्वजंखलम् ॥ पुरुषोत्तममासाद्यस्नानदानविवर्जितः ॥ २० ॥ ॥ श्रीनारायणउवाच ॥ ॥ पुण्यशीलसुशीलाभ्या
महृष्टंवर्णितंनिजम् ॥ तच्छ्रुत्वाचकितोहृष्टःपुलकांकितविग्रहः ॥ २१ ॥ तीर्थदेवान्नमस्कृत्यकालंजरगिरिंततः ॥ ननामकाननाधीशान्स
र्वगुल्मलतातरून् ॥ २२ ॥ ततःप्रदक्षिणीकृत्यविमानंविनयान्वितः ॥ आरुरोहघनश्यामोलसत्पीतांबरावृतः ॥ २३ ॥ पश्यत्सुसर्वदेवेषु

गंधर्वाद्यैरभिष्टुतः ॥ वाद्यमानेषुवाद्येषुकिन्नराद्यैर्मुहुर्मुहुः ॥ २४ ॥ पुष्पवृष्टिंमुचोदेवामदंमदंमुदान्विताः ॥ सादरंपूजयांचक्रुःपुरंदरपुरःसराः ॥ २५ ॥ ततोजगामगोलोकंसानंदंयोगिदुर्लभम् ॥ गोपगोपीगवांसेव्यंरासमंडलमंडितम् ॥ २६ ॥ यत्रगत्वानशोचंतिजरामृत्युविवर्जिते ॥ तत्रासौचित्रशर्माचपुरुषोत्तमसेवनात् ॥ २७ ॥ व्याजेनापिमुमोदोच्चैर्विहायवानरंवपुः ॥ द्विभुजंमुरलीहस्तंदृष्ट्वाश्रीपुरुषोत्तमम् ॥ ॥ २८ ॥ श्रीनारायणउवाच ॥ ॥ इदमाश्चर्यमालोक्यदेवाःसर्वेसुविस्मिताः ॥ स्वंस्वंस्थानंययुःसर्वेशंसंतःपुरुषोत्तमम् ॥ २९ ॥ ॥ नारदउवाच ॥ ॥ दिवसस्यादिमेभागेत्वयाह्निकमुदीरितम् ॥ तद्दिवापरभागीयंकथंकार्यंतपोधन ॥ ३० ॥ गृहस्थस्योपकारायवदमेवदतांवर ॥ सदासर्वोपकारायचरंतिहिभवादृशाः ॥ ३१ ॥ ॥ श्रीनारायणउवाच ॥ ॥ प्रातःकालोदितंकर्मसमाप्यविधिवत्ततः ॥ कृत्वामाध्याह्निकींसंध्यांतिलतर्पणमाचरेत् ॥ ३२ ॥ देवामनुष्याःपशवोवयांसिसिद्धाश्चयक्षोरगदैत्यसंघाः ॥ प्रेताःपिशाचाउरगाःसमस्तायेचान्नमिच्छंतिमयात्रदत्तम् ॥ ३३ ॥ ततःपंचमहायज्ञान्कुर्याद्भूतबलिंततः ॥ काकस्यचशुनश्चैवबलिंदत्त्वैवमुच्चरन् ॥ ३४ ॥ इत्युक्त्वासर्वभूतेभ्योबलिंदद्यात्पुनःपृथक् ॥ ततआचम्यविधिवच्छ्रद्धयाप्रीतमानसः ॥ ३५ ॥ द्वारावलोकनंकुर्यादतिथिग्रहणायच ॥ गोदोहकालंभाग्यात्तुप्रातश्चेदतिथिर्यदि ॥ ३६ ॥ आदौसत्कृत्यवचसादेववत्पूजयेत्सुधीः ॥ तोषयेत्परयाभक्त्यायथाशक्त्यन्नपानतः ॥ ३७ ॥ भिक्षांचभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे ॥ आकल्पितान्नादुद्धृत्यसर्वव्यंजनसंयुतात् ॥३८॥ यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ ॥ तयोरन्नमदत्त्वैवभुक्त्वाचांद्रायणंचरेत् ॥३९॥ यतिहस्तेजलंदद्याद्भैक्ष्यंदद्यात्पुनर्जलम् ॥ तद्भैक्ष्यंमेरुणातुल्यंतज्जलंसागरोपमम् ॥४०॥ सत्कृत्यभि

वेभिक्षांयःप्रयच्छतिमानवः ॥ गोप्रदानसमंपुण्यमित्याहभगवान्यमः ॥ ४१ ॥ ततश्चभोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः ॥ प्रशस्तेशुद्ध
पात्रेचभुंजीतान्नमकुत्सयन् ॥ ४२ ॥ नैकवासाःसमश्नीयात्स्वासनेनिजभाजने ॥ स्वयमासनमारुह्यस्वस्थचित्तःप्रसन्नधीः ॥४३॥ एकएव
तुयोभुंक्तेस्वकीयेकांस्यभाजने ॥ चत्वारितस्यवर्धंतआयुःप्रज्ञायशोबलम् ॥ ४४ ॥ सत्यंत्वर्त्तेतिमंत्रेणजलमादायपाणिना ॥ परिषिच्यच
भोक्तव्यंसघृतंव्यंजनान्वितम् ॥४५॥ भोजनात्किंचिदन्नाद्यमादायैवंसमुच्चरेत् ॥ नमोभूपतयेपूर्वंभुवनपतयेनमः ॥४६॥ भूतानांपतयेपश्चा
द्धर्मायचततोबलिम् ॥ दत्त्वाचचित्रगुप्तायभूतेभ्यइदमुच्चरेत् ॥४७॥ यत्रक्वचनसंस्थानांक्षुत्तृषोपहतात्मनाम् ॥ भूतानांतृप्तयेऽक्षय्यमिदमस्तु
यथासुखम्॥४८॥प्राणायापानसंज्ञायव्यानायचततःपरम् ॥ उदानायततोब्रूयात्समानायततःपरम् ॥ ४९ ॥ प्रणवंपूर्वमुच्चार्यस्वाहांतेचघृत
प्लुतम् ॥ पंचकृत्वोग्रसेदन्नंजिह्वयानतुदंशयेत् ॥५०॥ ततश्चतन्मनाभूत्वाभुंजीतमधुरंपुरः ॥ लवणाम्लौतथामध्येकटुतिक्तौततःपरम् ॥५१॥
प्राग्द्रवंपुरुषोऽश्नीयान्मध्येतुकठिनाशनम् ॥ अंतेपुनर्द्रवाशीतुबलारोग्येनमुंचति॥५२॥अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः ॥ द्वात्रिं
शच्चगृहस्थस्यत्वमितंब्रह्मचारिणः ॥ ५३ ॥ नाद्याच्छास्त्रविरुद्धंतुभक्ष्यभोज्यादिकंद्विजः ॥ अभोज्यंप्राहुराहारंशुष्कंपर्युषितंतथा ॥५४॥
सर्वंसशेषमश्नीयाद्घृतपायसवर्जितम् ॥ अग्रांगुलिषुतच्छेषंनिधायभोजनोत्तरम् ॥ ५५ ॥ जलपूर्णांजलिंकृत्वापीत्वाचैवतदर्धकम् ॥ अग्रां
गुलिस्थितंशेषंभूमौदत्त्वांजलेर्जलम् ॥ ५६ ॥ शेषंनिषिंचेत्तत्रैवपठन्मंत्रमिमंबुधः ॥ अन्यथापापभाग्विप्रःप्रायश्चित्तेनशुध्यति ॥ ५७ ॥
रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् ॥ अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु ॥५८॥ निषिच्यानेनमंत्रेणकुर्यादंतविशोधनम् ॥ आचम्यपात्र

मुत्सार्यकिंचिदार्द्रेणपाणिना ॥ ५९ ॥ ततःपरंसमुत्थायबहिः स्थित्वासमाहितः ॥ शोधयेन्मुखहस्तौचमृदाशुद्धजलेनच ॥ ६० ॥ कृत्वा षोडशगंडूषान्शुद्धोभूत्वासुखासनः ॥ इमौमंत्रौपठन्नेवपाणिनोदरमालभेत् ॥ ६१ ॥ अगस्त्यंकुंभकर्णंचशनिंचवडवानलम् ॥ आहारपरि पाकार्थंस्मरेद्भीमंचपंचमम् ॥ ६२ ॥ आतापीमारितोयेनवातापीचनिपातितः ॥ समुद्रःशोषितोयेनसमेऽगस्त्यःप्रसीदतु ॥ ६३ ॥ ततःश्री कृष्णदेवस्यकुर्वीतस्मरणंमुदा ॥ भूयोप्याचम्यकर्तव्यंततस्तांबूलभक्षणम्॥६४॥भुक्तोपविष्टःश्रीकृष्णंपरंब्रह्मविचारयेत् ॥ सच्छास्त्रादिविनो देनसन्मार्गाद्यविरोधिना ॥ ६५ ॥ ततश्चाध्यात्मविद्यायाःकुर्वीतश्रवणंसुधीः ॥ सर्वथावृत्तिहीनोपिमुहूर्त्तंस्वस्थमानसः ॥६६॥ श्रुत्वाधर्मं विजानातिश्रुत्वापापंपरित्यजेत् ॥ श्रुत्वानिवर्ततेमोहःश्रुत्वाज्ञानामृतंलभेत् ॥ ६७॥ नीचोपिश्रवणेनाशुश्रेष्ठत्वंप्रतिपद्यते ॥ श्रेष्ठोपिनीच तांयातिरहितःश्रवणेनच ॥ ६८ ॥ व्यवहारंततःकुर्याद्बहिर्गत्वाप्यथासुखम् ॥ श्रीकृष्णंमनसाध्यायेत्सर्वार्थसिद्धिदायकम् ॥ ६९ ॥ सूर्येऽस्त शिखरंप्राप्तेतीर्थंगत्वाथवागृहम्॥ सायंसंध्यामुपासीतधौतांघ्रिसपवित्रकः ॥७०॥ यःप्रमादान्नकुर्वीतसायंसंध्यांद्विजाधमः ॥ सगोवधमवाप्नो तिमृतेरौरवमाप्नुयात् ॥७१॥ कदाचित्काललोपेपिसंकटेवापथिस्थितः ॥ आनिशीथात्प्रकुर्वीतसायंसंध्यांद्विजोत्तमः ॥७२॥ यस्त्रिसंध्या मुपासीतब्राह्मणःश्रद्धयान्वितः ॥ तत्तेजोवर्धतेत्यन्तंघृतेनेवहुताशनः ॥ ७३ ॥ सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम् ॥ प्राणाना यम्यसंप्रोक्ष्यमंत्रेणाब्दैवतेनतु ॥ ७४ ॥ सायमग्निश्चमेत्युक्त्वाप्रातःसूर्येत्यपःपिबेत् ॥ प्राङ्मुखोपविष्टस्तुवाग्यतःसुसमाहितः ॥ ७५ ॥ प्रणवव्याहृतियुतांगायत्रींतुजपेत्ततः ॥ अक्षसूत्रंसमादायसम्यगातारकोदयात् ॥ ७६ ॥ वारुणीभिस्तदादित्यमुपस्थायप्रदक्षिणाम् ॥

कुर्वन्दिशोनमस्कुर्यादिगीशांश्चपृथक्पृथक् ॥ ७७ ॥ उपास्यपश्चिमांसंध्यांहुत्वाग्निमश्रियात्ततः ॥ भृत्यैःपरिवृतोभूत्वानातितृप्तोथसंविशेत् ॥ ७८ ॥ सायंप्रातर्वैश्वदेवःकर्तव्योबलिकर्मच ॥ अनश्नतापिसततमन्यथाकिल्बिषीभवेत् ॥ ७९ ॥ कृतपादादिशौचस्तुभुक्त्वा सायंततोगृही ॥ गच्छेच्छय्यांततोमृद्वीमुपधानसमन्विताम् ॥ ८० ॥ स्वगृहेप्राक्शिराःशेतेश्वाशुरेदक्षिणाशिराः ॥ प्रवासेपश्चिमशिरानकदाचिदुदक्शिराः ॥ ८१ ॥ रात्रिसूक्तंजपेत्स्मृत्वादेवांश्चसुखशायिनः ॥ नमस्कृत्याव्ययंविष्णुंसमाधिस्थःस्वपेन्निशि ॥ ८२ ॥ अगस्त्योमाधवश्चैवमुचुकुंदोमहाबलः ॥ कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः ॥ ८३ ॥ मांगल्यंपूर्णकुंभंचशिरःस्थानेनिधायच ॥ वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः ॥ ८४ ॥ ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा ॥ पर्ववर्जंव्रजेदेनांतद्व्रतीरतिकाम्यया ॥ ८५ ॥ प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् ॥ यामद्वयंशयानस्तुब्रह्मभूयायकल्पते ॥ ८६ ॥ एतत्सर्वमशेषेणकृत्यजातंदिनेदिने ॥ कर्तव्यंगृहिभिःसम्यग्गृहस्थाश्रमलक्षणम् ॥ ८७ ॥ अहिंसासत्यवचनंसर्वभूतानुकंपनम ॥ शमोदानंयथाशक्तिगार्हस्थ्योधर्मउच्यते ॥ ८८ ॥ परदारेष्वसंसर्गोधर्मस्त्रीपरिरक्षणम् ॥ अदत्तादानविरमोमधुमांसविवर्जनम् ॥ ८९ ॥ एषपंचविधोधर्मोबहुशाखःसुखोदयः ॥ देहिभिर्देहपरमैःकर्तव्योदेहसंभवः ॥ ९० ॥ ॥ श्रीनारायणउवाच ॥ ॥ अशेषवेदोदितसच्चरित्रमेतद्गृहस्थाश्रमलक्षणंहि ॥ उक्तंसमासेनचलक्षणेनतुभ्यंमुनेलोकहितायसम्यक् ॥ ९१ ॥ ॥ इति श्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेआह्निककथनंनामएकोनत्रिंशोऽध्यायः ॥ ॥ २९ ॥ ॥ नारदउवाच ॥ ॥ स्तुतापतिव्रतानारीत्वयापूर्वंतपोनिधे ॥ तल्लक्षणानिसर्वाणिसमासेनवदस्वमे ॥ १ ॥ ॥ सूतउ

वाच ॥ नोदितोनारदेनेत्थंपुरातनमुनिःस्वयम् ॥ पतिव्रतायाःसर्वाणिलक्षणान्याहभूसुराः ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदव
क्ष्यामिसतीनांव्रतमुत्तमम् ॥ कुरूपोवाकुवृत्तोवासुस्वभावोथवापतिः ॥ ३ ॥ रोगान्वितःपिशाचोवाक्रोधनोवाथमद्यपः ॥ वृद्धोवाप्यविद
ग्धोवामूकोंऽधोबधिरोपिवा ॥ ४ ॥ रौद्रोवाथदरिद्रोवाकदर्यःकुत्सितोपिवा ॥ कातरःकितवोवापिललनालंपटोपिवा ॥ ५ ॥ ॥ सततंदे
ववत्पूज्यःसाध्व्यावाक्कायकर्मभिः ॥ नजातुविषमंभर्तुःस्त्रियाकार्यंकथंचन ॥ ६ ॥ बालयावायुवत्यावावृद्धयावापियोषिता ॥ नस्वातंत्र्येण
कर्त्तव्यंकिंचित्कार्यंगृहेष्वपि॥७॥अहंकारंविहायाथकामक्रोधौचसर्वदा॥मनसोरंजनंपत्युःकार्यंनान्यस्यकुत्रचित्॥८॥सकामंवीक्षिताप्यन्यैः
प्रियवाक्यैःप्रलोभिता॥स्पृष्टावाजनसंमर्देनविकारमुपैतिया ॥९॥ यावंतोरोमकूपाःस्युःस्त्रीणांगात्रेषुनिर्मिताः॥तावद्वर्षसहस्राणिनाकंताःपर्यु
पासते॥१०॥पुरुषंसेवतेनान्यंमनोवाक्कायकर्मभिः॥लोभितापिपरेणार्थैःसासतीलोकभूषणा॥११॥दौत्येनप्रार्थितावापिबलेनविधृतापिवा॥
वस्त्राद्यैर्वासितावापिनैवान्यंभजतेसती ॥ १२ ॥ वीक्षितावीक्षतेनान्यैर्हासितानहसत्यपि ॥ भाषिताभाषतेनैवसासाध्वीसाधुलक्षणा
॥ १३ ॥ रूपयौवनसंपन्नागीतेनृत्येऽतिकोविदा ॥ स्वानुरूपंनरंदृष्ट्वानयातिविकृतिंसती ॥ १४ ॥ सुरूपंतरुणंरम्यंकामिनीनांचवल्लभम् ॥
यानेच्छतिपरंकांतंविज्ञेयासामहासती ॥ १५ ॥ देवोमनुष्योगंधर्वःसतीनांनापरःप्रियः ॥ अप्रियंनैवकर्तव्यंपत्युःपत्न्याकदाचन ॥ १६ ॥
भुक्तेभुंक्तेयथापत्यौदुःखितेदुःखिताचया ॥ मुदितेमुदितात्यर्थंप्रोषितेमलिनांबरा ॥ १७ ॥ सुप्तेपत्यौचयाशेतेपूर्वमेवप्रबुध्यति ॥ प्रविशेच्चै
वयावह्नौयातेभर्त्तरिपंचताम् ॥ १८ ॥ नान्यंकामयतेचित्तेसाविज्ञेयापतिव्रता ॥ भक्तिंश्वशुरयोःकुर्यात्पत्युश्चापिविशेषतः ॥ १९ ॥ धर्म

कार्येनुकूलत्वमर्थकार्येपिसंचये ॥ गृहोपस्करसंस्कारेसक्तायाप्रतिवासरम् ॥ २० ॥ क्षेत्राद्वनाद्वाग्रामाद्वाभर्त्तारंगृहमागतम् ॥ प्रत्युत्थाया
भिनंदेतआसनेनोदकेनच ॥ २१ ॥ प्रसन्नवदनानित्यंकालेभोजनदायिनी ॥ भुक्तवंतंतुभर्त्तारंनवदेदप्रियंक्वचित् ॥ २२ ॥ आसनेभोजने
दानेसंमानेप्रियभाषणे ॥ दक्षयासर्वदाभाव्यंभार्ययागृहमुख्यया ॥ २३ ॥ गृहव्ययनिमित्तंचयद्द्रव्यंप्रभुणार्पितम् ॥ निर्भृत्यगृहकार्यंसाकिं
चिद्बुद्ध्यावशेषयेत् ॥ २४ ॥ त्यागार्थमर्पितद्रव्यंलोभात्किंचिन्नधारयेत् ॥ भर्तुराज्ञांविनानैवस्वबंधुभ्योदिशेद्धनम् ॥ २५ ॥ अन्यालाप
मसंतोषंपरव्यापारसंकथाः ॥ अतिहासातिरोषंचक्रोधंचपरिवर्जयेत् ॥ २६ ॥ यच्चभर्त्तानपिबतियच्चभर्त्तानखादति ॥ यच्चभर्त्तानचा
श्नातिसर्वंतद्वर्जयेत्सती ॥ २७ ॥ तैलाभ्यंगंतथास्नानंशरीरोद्वर्तनक्रियाम् ॥ मार्जनंचैवदन्तानांकुर्यात्पतिमुदेसती ॥ २८ ॥ त्रेताप्रभृ
तिनारीणांमासिमास्यार्तवंमुने ॥ तदादिनत्रयंत्यक्ताशुद्धास्याद्गृहकर्मणि ॥ २९ ॥ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी ॥ तृतीयेरज
कीप्रोक्ताचतुर्थेहनिशुध्यति ॥ ३० ॥ स्नानंशौचंतथागानंरोदनंहसनंतथा ॥ यानमभ्यंजनंनारीद्यूतंचैवानुलेपनम् ॥ ३१ ॥ दिवास्वप्नंवि
शेषेणतथावैदंतधावनम् ॥ मैथुनंमानसंवापिवाचिकंदेवतार्चनम् ॥ ३२ ॥ वर्जयेच्चनमस्कारंदेवतानांरजस्वला ॥ रजस्वलायाःसंस्पर्शंसं
भाषांचतयासह ॥ ३३ ॥ त्रिरात्रंस्वमुखंनैवदर्शयेच्चरजस्वला ॥ स्ववाक्यंश्रावयेन्नैवयावत्स्नातानशुद्धितः ॥३४॥ स्नात्वान्यंपुरुषंनारीनप
श्येच्चरजस्वला ॥ ईक्षेतभास्करंदेवंब्रह्मकूर्चंततःपिबेत् ॥ ३५ ॥ केवलंपंचगव्यंचक्षीरंवात्मविशुद्धये ॥ यथोपदेशंनियतावर्तयेतवरांगना
॥ ३६ ॥ गर्भिणीचेद्भवेन्नारीतदानियमतत्परा ॥ अलंकृतासुप्रयताभर्त्तुःप्रियहितेरता ॥ ३७ ॥ तिष्ठेत्प्रसन्नवदनास्वधर्मनिरताशुचिः ॥

कृतरक्षासुभूषाचवास्तुपूजनतत्परा ॥ ३८ ॥ कुस्त्रीभिर्नाभिभाषेतशूर्पवातंचवर्जयेत् ॥ मृतवत्सादिसंसर्गंपरपाकंचसुन्दरी ॥ ३९ ॥ नबीभत्संकिंचिदीक्षेन्नरौद्रांशृणुयात्कथाम् ॥ गुरुंवात्युष्णमाहारमजीर्णंनसमाचरेत् ॥ ४० ॥ अनेनविधिनासाध्वी शोभनंपुत्रमाप्नुयात् ॥ अन्यथागर्भपतनंस्तंभनंवाप्रपद्यते ॥ ४१ ॥ हीनांनिजगुणैरन्यांसपत्नींनैवगर्हयेत् ॥ ईर्ष्यारागसमुद्भूते विद्यमानेपिमत्सरे ॥ ४२ ॥ अप्रियंनैवकर्त्तव्यंसपत्नीभिःपरस्परम् ॥ नगायेदन्यनामानिनकुर्यादन्यवर्णनम् ॥ ४३ ॥ नव सेद्दूरतःपत्युःस्थेयंवल्लभसन्निधौ ॥ निर्दिष्टेचमहीभागेवल्लभाभिमुखावसेत् ॥ ४४ ॥ नावलोक्यादिशःस्वैरंनावलोक्यःपरोजनः ॥ विलासैरवलोक्यंस्यात्पत्युराननपंकजम् ॥ ४५ ॥ कथ्यमानाकथाभर्त्राश्रोतव्यासादरंस्त्रिया ॥ पत्युःसंभाषणस्याग्रेनान्यत्संभाषयेत्स्व यम् ॥ ४६ ॥ आहूतासत्वरंगच्छेद्रतिस्थानंरतोत्सुका ॥ पत्यौगायतिसोत्साहंश्रोतव्यंहृष्टचेतसा ॥ ४७ ॥ गायंतंचपतिंदृष्ट्वाभवेदानंद निर्वृता ॥ भर्तुःसमीपेनस्थेयंसोद्वेगंव्यग्रचित्तया ॥ ४८ ॥ कलहोनविधातव्यःकलियोग्येप्रियेस्त्रिया ॥ भर्त्सितानिंदितात्यर्थंताडि तापिपतिव्रता ॥ ४९ ॥ व्यथितापिभयंत्यक्त्वाकंठेगृह्णीतवल्लभम् ॥ उच्चैर्नरोदनंकुर्यान्नैवाक्रोशेच्चतंप्रति ॥ ५० ॥ पलायनंनकर्त्तव्यंनिज गेहाद्बहिःस्त्रिया ॥ उत्सवादिषुबंधूनांसदनंयदिगच्छति ॥ ५१ ॥ लब्ध्वानुज्ञांतदापत्युर्गच्छेदध्यक्षरक्षिता ॥ नवसेत्सुचिरंतत्रप्रत्याग च्छेद्गृहंसती ॥ ५२ ॥ प्रस्थानाभिमुखेपत्यौमासन्मंगलभाषिणी ॥ नवार्योसौनिषेधोक्त्यानकार्यंरोदनंतदा ॥ ५३ ॥ अकृत्वोद्वर्तनंनित्यं पत्यौदेशांतरेगते ॥ वधूर्जीवनरक्षार्थंकर्मकुर्यादनिंदितम् ॥ ५४ ॥ श्वश्रूश्वशुरयोःपार्श्वेनिद्राकार्यानचान्यतः ॥ प्रत्यहंपतिवार्ताचतया

न्वेष्याप्रयत्नतः ॥ ५५ ॥ दूताःप्रस्थापनीयाश्चपत्युःक्षेमोपलब्धये ॥ देवतानांप्रसिद्धानांकर्त्तव्यमुपयाचनम् ॥ ५६ ॥ एवमादिविधा
तव्यंसत्याप्रोषितकांतया ॥ अप्रक्षालनमंगानांमलिनांबरधारणम् ॥ ५७॥ तिलकांचनहीनत्वंगंधमाल्यविवर्जनम् ॥ नखरोम्णामसंस्का
रोदशनानाममार्जनम् ॥ ५८ ॥ उच्चैर्हासःपरैर्नर्मपरचेष्टाविचिंतनम् ॥ स्वेच्छापर्यटनंचैवपरपुंसांगमर्दनम् ॥५९॥ अटनंचैकवस्त्रेणनिर्लज्ज
त्वंयथागतिः ॥ इत्यादिदोषाःकथितायोषितोनित्यदुःखदाः ॥ ६० ॥ निर्वृत्यगृहकार्याणिहरिद्रालेपनैस्तनुम् ॥ प्रक्षाल्यशुचितोयेनकुर्या
न्मंडनमुज्ज्वलम् ॥ ६१ ॥ समीपंप्रेयसोगच्छेद्विकसन्मुखपंकजा ॥ अनेननारीवृत्तेनमनोवाग्देहसंयुता ॥ ६२ ॥ आहूतागृहकार्याणि
त्यक्त्वागच्छेच्चसत्वरम् ॥ किमर्थंव्याहृतास्वामिन्सप्रसादोविधीयताम् ॥ ६३ ॥ माचिरंतिष्ठतेद्वारिनद्वारमुपसेवयेत् ॥ स्वामिनादापितं
किंचित्कस्मैचिन्नददात्यपि ॥ ६४ ॥ सेवयेद्भर्तुरुच्छिष्टमिष्टमन्नफलादिकम् ॥ महाप्रसादइत्युक्त्वामोदमानानिरंतरम् ॥ ६५ ॥ सुखसुप्तंसु
खासीनंरममाणंयदृच्छया ॥ आतुरेष्वपिकार्येषुपातिंनोत्थापयेत्क्वचित् ॥ ६६ ॥ नैकाकिनीक्वचिद्गच्छेन्ननग्नास्नानमाचरेत् ॥ भर्तृवि
द्वेषिणींनारींसाध्वींनोभावयेत्क्वचित् ॥ ६७ ॥ नोलूखलेनमुसलेनवर्धिन्यांदृषद्यपि ॥ नयंत्रकेपिदेहल्यांसतीचोपविशेत्क्वचित्
॥ ६८ ॥ तीर्थस्नानार्थिनीनारी पतिपादोदकंपिबेत् ॥ शंकरादपिविष्णोर्वापतिरेवाधिकःस्त्रियः ॥ ६९ ॥ व्रतोपवासनियमंपति
मुल्लंघ्ययाचरेत् ॥ आयुष्यंहरतेभर्तुर्मृतानरकमृच्छति ॥ ७० ॥ उक्ताप्रत्युत्तरंदद्यान्नारीक्रोधेनतत्परा ॥ सरमाजायतेग्रामेसृगालीनिर्ज
नेवने ॥ ७१ ॥ स्त्रीणांहिपरमश्चैकोनियमःसमुदाहृतः॥ अभ्यर्च्यभर्तुश्चरणौभोक्तव्यंचसदास्त्रिया ॥ ७२ ॥ याभर्तारंपरित्यज्यमिष्टम

श्रातिकेवलम् ॥ उलूकीजायतेक्रूरावृक्षकोटरशायिनी ॥ ७३ ॥ याभर्तारंसमुत्सृज्यरहश्चरतिकेवलम् ॥ ग्रामेवासूकरीभूयाद्वल्गुलीवाश्वविड्भुजा ॥ ७४ ॥ याहुंकृत्याप्रियंब्रूतेसामूकाजायतेखलु ॥ यासपत्नीसदेर्ष्येतदुर्भगासान्यजन्मनि ॥ ७५ ॥ दृष्टिंविलुप्यभर्तुर्याकंचिदन्यंसमीक्षते ॥ काणावाविमुखीचापिकुरूपाचैवजायते ॥ ७६ ॥ बाह्यादागतमालोक्यत्वरिताचजलासनैः ॥ तांबूलैर्व्यजनैश्चैवताल्संवाहनादिभिः ॥ ७७ ॥ अतिप्रियतरैर्वाक्यैर्भर्तारंयासुसेवते ॥ पतिव्रताशिरोरत्नंसानारीकथिताबुधैः ॥ ७८ ॥ भर्त्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच ॥ तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत् ॥ ७९ ॥ जीवहीनोयथादेहःक्षणादशुचितांव्रजेत् ॥ भर्तृहीनातथायोषित्सुस्नाताप्यशुचिःसदा ॥ ८० ॥ अमंगलेभ्यःसर्वेभ्योविधवाह्यत्यमंगला ॥ विधवादर्शनात्सिद्धिर्जातुकापिनजायते ॥ ८१ ॥ विहायमातरंचैकामाशीर्वादप्रदायिनीम् ॥ अन्याशिषमपिप्राज्ञस्त्यजेदाशीविषोपमाम् ॥ ८२ ॥ कन्यांविवाहसमयेवाचयेयुरितिद्विजाः ॥ भर्तुःसहचरीभूयाज्जीवतोजीवितापिवा ॥ ८३ ॥ तस्माद्भर्तानुयातव्योदेहवच्छाययास्त्वया ॥ एवंसत्यासदास्थेयंभक्त्यापत्यनुकूलया ॥ ८४ ॥ व्यालग्राहीयथाव्यालंबिलादुद्धरतेबलात् ॥ एवमुत्क्रम्यदूतेभ्यःपतिंस्वर्गंनयेत्सती ॥ ८५ ॥ यमदूताःपलायंतेसतीमालोक्यदूरतः ॥ अपिदुष्कृतकर्माणमुत्सृज्यपतितंपतिम् ॥ ८६ ॥ यावत्स्वलोमसंख्यास्तितावत्कोट्ययुतानिच ॥ भर्त्रास्वर्गसुखंभुंक्तेरममाणापतिव्रता ॥ ८७ ॥ शीलभंगेनदुर्वृत्ताःपातयंतिकुलद्वयम् ॥ पितुःकुलंतथापत्युरिहामुत्रचदुःखिताः ॥ ८८ ॥ अनुयातिनभर्तारंयदिदैवात्कथंचन ॥ तत्रापिशीलंसंरक्ष्यंशीलभंगात्पतत्यधः ॥ ८९ ॥ तद्वैगुण्यात्पितास्वर्गात्पतिःपततिनान्यथा ॥ विध

वाकबरींबंधोभर्तृबंधायजायते ॥ ९० ॥ शिरसोवपनंकार्यंतस्माद्विधवयासदा ॥ एकाहारःसदाकार्योनद्वितीयःकदाचन ॥ ९१ ॥ पर्यंक
शायिनीनारीविधवापातयेत्पतिम् ॥ तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया ॥ ९२ ॥ नैवांगोद्वर्तनंकार्यंनतांबूलस्यभक्षणम् ॥ गंधद्रव्य
स्यसंभोगोनैवकार्यस्तयाक्वचित्॥९३॥तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् ॥९४॥ श्वेतवस्त्रंस
दाधार्यमन्यथारौरवंव्रजेत् ॥ इत्येवंनियमैर्युक्ताविधवापिपतिव्रता ॥ ९५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ नैतादृशंदैवतमस्तिकिंचित्सर्वेषुलो
केषुसदैवतेषु॥यदापतिस्तुष्यतिसर्वकामाँल्लभेत्प्रकामंकुपितश्चहन्यात् ॥९६॥ तस्मादपत्यंविविधाश्चभोगाःशय्यासनान्यद्भुतभोजनानि ॥
वस्त्राणिमाल्यानितथैवगंधाःस्वर्गेचलोकेविविधाचकीर्तिः ॥ ९७ ॥ ॥ इतिश्रीबृ०पुयेमा०पतिव्रताधर्मनिरूपणेत्रिंशोऽध्यायः ॥ ३० ॥
॥ सूतउवाच ॥ ॥ इत्थंपतिव्रताधर्ममाकर्ण्यनारदोमुनिः ॥ किंचित्प्रष्टुमनाविप्रामुनिमाहपुरातनम् ॥ १ ॥ ॥ नारदउवाच ॥ ॥ सर्व
दानाधिकंकांस्यसंपुटंपरिकीर्तितम् ॥ एतत्कारणमव्यक्तंवदमेबदरीपते ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥ एकदैतद्व्रतंब्रह्मन्नची
करदुमापुरा ॥ तदापृच्छन्महादेवंकिंदेयंदानमुत्तमम् ॥ ३ ॥ येनसंपूर्णतांयातिव्रतंमेपौरुषोत्तमम् ॥ तन्मेवददयासिंधोसर्वेषांहितहेतवे ॥
॥ ४ ॥ तच्छुत्वामनसिध्यायन्ध्यायञ्श्रीपुरुषोत्तमम् ॥ उमामजीगदच्छंभुःसर्वलोकहितैषिणीम् ॥ ५ ॥ ॥ श्रीमहादेवउवाच ॥ ॥
नशक्यंकिञ्चिदेवास्तिदानंश्रीपुरुषोत्तमे ॥ व्रतपूर्णविधिंकर्तुमपर्णेछंदसिक्वचित ॥ ६ ॥ यद्यद्दानंगिरिसुतेह्युत्तमंपरिकीर्तितम् ॥ श्रीकृष्णव
ल्लभेमासितत्सर्वंगौणतांगतम् ॥ ७ ॥ तस्मादेतादृशंदानंनैवास्तिकापिसुंदरि ॥ येनतेव्रतसंपूर्तिर्भवेच्छ्रीपुरुषोत्तमे ॥ ८ ॥ पुरुषोत्तममासे

स्मिन्व्रतसंपूर्णहेतवे ॥ ब्रह्मांडसंपुटाकारंतदहंदेयमंगने ॥ ९ ॥ नशक्यंतत्तुकेनापिदातुंक्कापिवरानने ॥ तस्मादेतत्प्रतिनिधिंकृत्वाकांस्य
स्यसंपुटम् ॥ १० ॥ तन्मध्येपूरयित्वैवापूपांस्त्रिंशन्मितान्मुदा ॥ सप्ततंतुभिरावृत्यसंपूज्यविधिवत्प्रिये ॥ ११ ॥ देयंविप्रायविदुषेव्रतसं
पूर्तिहेतवे ॥ एवंत्रिंशन्मितान्येवदेयानिसतिवैभवे ॥ १२ ॥ इत्याकर्ण्यवचोरम्यंधूर्जटेरुपकारकम् ॥ अबीभवदुमाहृष्टासर्वलोकहितैषिणी ॥
॥ १३ ॥ त्रिंशत्कांस्यानिविद्वद्भ्यःसंपुटानिव्यतीर्यसा ॥ पूर्णंव्रतविधिंकृत्वामुमोदातीवनारद ॥ १४ ॥ ॥ सूतउवाच ॥ ॥ इत्याकर्ण्य
मुनिर्विप्रानारायणवचोमृतम् ॥ पुनराहातितृप्तोसौनामंनामंपुनःपुनः ॥ १५ ॥ ॥ नारदउवाच ॥ ॥ सर्वेभ्यःसाधनेभ्योयंमासःश्रीपु
रुषोत्तमः ॥ वरीयान्निश्चितोमेद्यश्रुत्वामाहात्म्यमुत्तमम् ॥ १६ ॥ श्रुत्वापिजायतेभक्त्यामहापापक्षयोनृणाम् ॥ किंपुनःश्रद्धयाकर्तुर्विधिना
चेतिमेमतिः ॥ १७ ॥ अतःपरंनकिंचिन्मेश्रोतव्यमवशिष्यते ॥ पीयूषात्यंतसंतृप्तोनान्यत्तोयंसमीहते ॥ १८ ॥ ॥ सूतउवाच ॥ ॥
इत्युक्त्वाविरतोविप्रोनारदोमुनिसत्तमः ॥ अनीनमत्पादपद्मंपुरातनमुनेःपरम् ॥ १९ ॥ भारतेजन्तुरासाद्यपुरुषोत्तममुत्तमम् ॥ नसेवंतेनशृ
ण्वंतिगृहासक्तानराधमाः ॥ २० ॥ गतागतंभजंतेत्रदुर्भगाजन्मजन्मनि ॥ पुत्रमित्रकलत्राप्तवियोगाद्दुःखभागिनः ॥ २१ ॥ अस्मिन्मा
सेद्विजश्रेष्ठानासच्छास्त्राण्युदाहरेत् ॥ नस्वपेत्परशय्यायांनालपेद्वितथंक्वचित् ॥ २२ ॥ परापवादान्नब्रूयान्नकथंचित्कदाचन ॥ परान्नंचन
भुंजीतनकुर्वीतपरक्रियाम् ॥ २३ ॥ वित्तशाठ्यमकुर्वाणोदानंदद्याद्विजातये ॥ विद्यमानेधनेशाठ्यंकुर्वाणोरौरवंव्रजेत् ॥ २४ ॥ दिने
दिनेद्विजेंद्रायदत्त्वाभोजनमुत्तमम् ॥ दिवसस्याष्टमेभागेव्रतीभोजनमाचरेत् ॥ २५ ॥ धन्यास्तेपुरुषालोकेयेनित्यंपुरुषोत्तमम् ॥ अर्चयं

तिविधानेनभक्त्याप्रेमपुरःसरम् ॥ २६ ॥ इंद्रद्युम्नःशतद्युम्नोयौवनाश्वोभगीरथः ॥ पुरुषोत्तममाराध्यययुर्भगवदंतिकम् ॥ २७ ॥
तस्मात्सर्वप्रयत्नेनसंसेव्यःपुरुषोत्तमः ॥ सर्वसाधनतःश्रेष्ठःसर्वार्थफलदायकः ॥ २८ ॥ गोवर्धनधरंवंदेगोपालंगोपरूपिणम् ॥ गोकुलो
त्सवमीशानंगोविंदंगोपिकाप्रियम् ॥ २९ ॥ कौंडिन्येनपुराप्रोक्तमिमंमंत्रंपुनःपुनः ॥ जपन्मासंनयेद्भक्त्यापुरुषोत्तममाप्नुयात् ॥ ३० ॥
ध्यायेन्नवघनश्यामंद्विभुजंमुरलीधरम् ॥ लसत्पीतपटंरम्यंसराधंपुरुषोत्तमम् ॥ ३१ ॥ ध्यायंध्यायंनयेन्मासंपूजयन्पुरुषोत्तमम् ॥ एवं
यःकुरुतेभक्त्यास्वाभीष्टंसर्वमाप्नुयात् ॥ ३२ ॥ गुह्याद्गुह्यतरंचैतन्नवाच्यंयस्यकस्यचित् ॥ मयापिकथितंनैवकस्याप्यग्रेतपोधनाः ॥
॥ ३३ ॥ श्रोतव्यमेतत्सततंपुराणमभीष्टदंपावनमादरेण ॥ श्लोकैकमात्रश्रवणेनपुंसामघानिसर्वाणिनिहंतिविप्राः ॥ ३४ ॥ गंगादिसर्व
तीर्थेषुमज्जतोयत्फलंभवेत् ॥ तत्फलंशृण्वतस्तस्यमाहात्म्यंमुनिसत्तमाः ॥ ३५ ॥ इलांप्रदक्षिणीकुर्वन्यत्पुण्यंलभतेनरः ॥ तत्पुण्यं
शृण्वतस्तस्यमाहात्म्यंपौरुषोत्तमम् ॥ ३६ ॥ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियोवसुधाधिपः ॥ वैश्योधनपतिर्भूयाच्छूद्रःसत्तमतांलभेत् ॥ ३७॥
येन्येकिरातहूणाद्याःपशुचर्यापरायणाः ॥ तेसर्वेमुक्तिमायांतिश्रुत्वामाहात्म्यमुत्तमम् ॥ ३८ ॥ पुरुषोत्तममाहात्म्यंलेखयित्वाद्विजन्मने ॥
संभूष्यवस्त्रभूषाभिर्विधिनायःप्रयच्छति ॥ ३९ ॥ कुलत्रयंसमुद्धृत्यगोलोकंयातिदुर्लभम् ॥ यत्रास्तेगोपिकावृंदैर्वेष्टितःपुरुषोत्तमः ॥ ४० ॥
लिखित्वाधारयेद्यस्तुगृहेमाहात्म्यमुत्तमम् ॥ तद्गृहेसर्वतीर्थानिविलसंतिनिरंतरम् ॥ ४१ ॥ मासोत्तमस्यमहिमानमनंतपुण्यंश्रुत्वासुवि
स्मितधियोमुनयश्चसर्वे ॥ ऊचुश्चसूततनयंविनयेनविष्वक्सेनांघ्रिसेवनविधौनिपुणानितांतम् ॥ ४२ ॥ ॥ ऋषयऊचुः ॥ ॥ सूतसूत

महाभागधन्योसित्वंमहामते ॥ त्वन्मुखामृतपानेनकृतार्थाःस्मोवयंभृशम् ॥ ४३ ॥ चिरंजीवसदासूतपौराणिकशिरोमणे ॥ अस्तुतेशाश्वतीकीर्तिर्जगत्पावनपावनी ॥ ४४ ॥ तुभ्यंप्रदत्तंनिमिषालयस्थैर्ब्रह्मासनंपूज्यतमंमुनीशैः ॥ त्वदीयवक्त्रांबुजनिर्गतश्रीमुकुंदवार्तामृतपानलोलैः ॥ ४५ ॥ विष्टरश्रवसएवपवित्रायावदेववितताभुविकीर्तिः ॥ तावदत्रमुनिवर्यसमाजेश्रीहरेर्वदकथांकमनीयाम् ॥ ४६ ॥ इत्थंद्विजाशीर्वचनंप्रगृह्यप्रदक्षिणीकृत्यद्विजान्समस्तान् ॥ नत्वागमद्देवनदींस्वकीयंकृत्यंविधातुंसचसूतसूनुः ॥ ४७ ॥ अन्योन्यमूचुर्निमिषालयस्थावरिष्ठमाहात्म्यमिदंपुराणम् ॥ मासस्यदिव्यंपुरुषोत्तमस्यसमीहितार्थार्पणकल्पवृक्षम् ॥ ४८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममासमाहात्म्येश्रीनारायणनारदसंवादेपुरुषोत्तममाहात्म्यश्रवणफलकथनंनामएकत्रिंशोऽध्यायः ॥ ३१ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन स्वकीये "श्रीवेंकटेश्वर" (स्टीम्) मुद्रणालयेंकयित्वा प्रकाशितम् ।

संवत् १९६६, शके १८३१.

समाप्तोऽयं ग्रन्थः ।

॥*॥ इति पुरुषोत्तममासमाहात्म्यं समाप्तम् ॥*॥